च्छ्रायं हेमपंकजग — वत्। त्रिभागहीनविस्तारं प्रत्यासत्वमुरजाप्रकृति दशास्त्राणि सरत्नानि दात्रं सूची तथैव च।
हेमनालं सपिटकं बहिरादित्यसंयुतं। तथैवावरणं नाभेरुपवीतं त्वकांचनं। पार्श्वतस्थापयेत्तद्वद्धेमदंडकमंड
लुं। पद्माकारं पिधानं स्यात्समंतादंगुलाधिकं। मुक्तावलीसमोपेतं पद्मरागदलान्वितं। तिलद्रोणोपरिगतं वेदी
मध्ये ततोर्चयेत्। ततो मंगलशब्देन ब्रह्मघोषरवेण च। सर्वौषध्युदकस्नानस्नापितो वेदपुंगवैः। शुक्लमाल्यांबर
धरः सर्वाभरणभूषितः। इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः। नमो हिरण्यगर्भाय हिरण्यकवचाय च। सर्व
लोकसुराध्यक्ष जगद्धात्रे नमो नमः। भूर्लोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः। ब्रह्मादयस्तथा देवा नमस्ते विश्व
धारिणे। नमस्तेभुवनाधार नमस्तेभुवनाश्रय। नमो हिरण्यगर्भाय गर्भे यस्य पितामहः। यतस्त्वमेव भूतात्मा
भूते भूते व्यवस्थितः। तस्मान्मामुद्धराशेषदुःखसंसारसागरात्। एवमामंत्र्य तन्मध्यमाविश्यास्त उदङ्मुखः। मु

ष्टिभ्यां परिसंगत्वा धर्मराजश्चतुर्मुखौ। जानुमध्ये शिरः कृत्वा तिष्ठेदुल्बासपंचकं। गर्भाधानं पुंसवनं सीमंतोन्नयनं
त्तथा। कुर्याद्धिरण्यगर्भस्य ततस्ते द्विजपुंगवाः गीतमंगलघोषेण गुरुं स्थापयेत्ततः। जातकर्मादिकाः कुर्या क्रियाः षो
डश चापरा। सूत्यादिकं च गुरवे दत्वा मंत्रमिमं जपेत्। नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः। चराचरस्य जगतो गृहभू
ताय वै नमः। माताहं जनितः पूर्वं मर्त्यधर्मा ततो नमः। त्वद्गर्भसं — वादेवदिव्यदेहो भवाम्यहं। चतुर्भिः कलशैर्भूयस्तदं
गे द्विजपुंगवाः। स्नानं कुर्युः प्रसन्नाग्राः सर्वाभरणभूषिताः देवस्य त्वेति मंत्रेण स्थितस्य कनकासने। अद्यजातस्य
तेंगानि अभिषेक्ष्यामहे वयं। दिव्येनानेन वपुषा चिरं जीव सुखी — व। ततो हिरण्यगर्भाय विश्वगर्भाय वै नमः चराच
रस्य जगतो गृहभूताय वै नमः माताहं जनितः पूर्वं मर्त्यधर्मा ततो नमः। त्वद्गर्भसंभवादेव दिव्यदेहो भवाम्यहं। चतुर्भिः
कलशैर्भूयस्तदंगाद्विजपुंगवाः। स्नानं कुर्युः प्रसन्नाक्षाः सर्वाभरणभूषिताः।। देवस्य त्वेति मंत्रेण स्थितस्य कनका
सनो अद्यजातस्य तेंगानि अभिषेक्ष्यामहे वयं। दिव्येनानेन वपुषा चिरं जीव सुखी भव। ततो हिरण्यगर्भं तं तेभ्यो दद्या

दिचक्षणः। तेपूज्याः सर्वभावेनबहवोवातदाह्यया। तत्रोपकरणंसर्वंगुरवेविनिवेदयेत्। पादुकोपानहच्छत्रचाम
रासनभाजनं। ग्रामंवाविषयंवापियदन्यमपितद्भवेत्। अनेनविधिनायस्तुपुण्येहनिनिवेदयेत्। हिरण्यगर्भा
दानंसब्रह्मलोकेमहीयते। पुरेषुलोकपालानांप्रतिमन्वंतरंवसेत्। कल्पकोटिशतंयावत्ब्रह्मलोकेमहीयते। पु
रेषुलोकपालानांप्रतिमन्वंतरंवसेत्। कल्पकोटिशतंयावत्ब्रह्मलोकेमहीयते। कलिकलुषविमुक्तः पूजितः
सिद्धसंघैः रमरचमरसालावीज्यमानोप्सरोभिः। पितृशतमथवंधून्पुत्रपौत्रप्रपौत्रानपिनरकतिमग्नांस्तारये
देकएव। इतिपठतिय इत्थंयः शृणोतीहसम्यक्मधुरिपुपुरलोकेपूज्यतेसोपिसिद्धैः। मतिमपिचजनानांयोददाति
प्रियार्थं। विवुधपतिजनानांनायकः स्यादमोघः। तुलापुरुषवदितिविशेषोमदिष्टधर्मातिरिक्तसकलधर्मातिदेशः।
उपलक्षणंतयानुक्तानिचित्कल्यान्युक्तानि। एतेनोपोषितइतिपुनरुपवासविधानमुपवासप्रतिनिषेधिनक्ता
दिप्रतिषेधार्थमितिपरास्तं। ब्राह्मणैरिति। सहार्थेतृतीया ब्राह्मणैः स्वहस्वयमानमेदित्यर्थः। यद्वाब्राह्मणद्वा

रा आनापयेदिति कुंडं पात्रं। तपनीयमयमिति। यावता सुवर्णेन द्विसप्तत्यंगुलोच्छ्रायं तत्तृतीयांशन्यूनमष्टाचत्वारिं
शदंगुलविस्तृतं मध्ये किंचिन्न्यूनं मध्यस्थितसौवर्णपद्मपात्रं भवति तावत्सुवर्णं ग्राह्यं। मत्स्ये परिमाणानुक्तेः। स्त्रौ
ल्ये फल्वैजस्यमिति दामोदर हेमाद्र्यादयः। एतेन कुर्यात्सहस्रकर्षेण अधःपात्रं हिरण्यतत्तदर्धेनोर्ध्वपात्रं तु सहस्रेण
द्वयेतु वा। सपाददीनं त्वर्धं वा त्रिभागं पादमेव वा। सहस्रजं वा तत्कृत्वा स्वर्णपट्टैस्तु वेष्टयेत्। माषकल्केन चालिप्य
पंचगव्येन पूरयेदिति कामकेन अधःपात्रं सहस्रेण हिरण्मयेन विधीयते। ऊर्ध्वपात्रं तदर्धेन तदर्धेन द्वयं तु वेति। लैंगे
न हिरण्यगर्भं तं कुर्याद्धिरण्याष्टतुलाकृतमिति विष्णुधर्मोत्तरेण च परिमाणमुक्तं तदनावश्यकं। रूपनारायणादयस्तु
मात्स्याविरुद्धपुराणांतरोक्तस्य शाखांतराधिकरणन्येनांगत्वावगमात्कामिकायुक्तपरिमाणमावश्यकमित्यूचि
रेऽत्र शालेति मृदंगाकारतोऽस्या मध्ये किंचिदुत्सन्नमिति दामोदरः। क्वचिन्मृदंगे समतस्यापि दर्शनात्समत्वमेवेति मि
श्राः। दानसागरे तु मह्यास्ते सप्तधान्यक्षीराभिपूरितमिति विष्ठितं तस्य चाभिरभागइति सत्रे अभिशब्दस्यैकदेशवचन

105

त्वेनव्याख्यानादाज्यक्षीराभ्यांतथापात्रंपूरणीयंयथायजमानप्रवेशेनोछलतीत्यर्थः।दशेतिअस्त्राणिखड्गचक्र
शक्तिदंडपाशध्वजगदाशूलपरशुकुलिशानिरत्नेति।रत्नानिपंचनववा।वज्रंचमौक्तिकंचैवमाणिक्यंनीलमे
वच।तथामरकतह्येपंचमहारत्नानिपंचधेत्यारास्यागमात्।मुक्ताफलंहीरकंचवैडूर्यंपद्मरागकंपुष्परागंचगो
मेदंनीलंगारुत्मनंतथा।प्रवालयुक्तान्युक्तानिमहारत्नानिवैनवेति।रूपनारायणेविष्णुधर्मोत्तराच्चारत्नादी
निचबहिःपार्श्वतइत्येतयोःसर्वत्रसंबंधाद्धिरण्यगर्भाद्बहिःपार्श्वतःस्थापनीयानि।दानंकत्रैर्यादिसूचीक
र्णवेधार्थं।नालंजातेबालनालाकारं।पिटकं॥स्थालाकारंतदितिकेचित्।आदित्यप्रतिमोक्ता।नाभेरावरयंना
भ्याछादनवासः।उपवीतादौकांचनत्वश्रवणादन्यत्राकृतेमेवकार्यमितिके॥ ॥चित्॥तत्रकांचनत्वश्रव
णस्योपलक्षणत्वात्सर्वाणिसुवर्णमयानीत्यन्ये।रत्नान्यपहायसौवर्णानीतिन्याः।एतानिवैदशपहायुधानी
तिवदापृथक्त्वाद्धेनरत्नादिकमेवोच्यतइतिदानसागरः।रूपनारायणेतुदशांत्राणीतिपठित्वासुवर्णनिर्मितादश

दशा वालकप्रोञ्छनार्थं स्थापनीया इति व्याख्यातं। दशार्द्धानि च रत्नानीति पाठः पंचरत्नानीत्यर्थ इति विद्याधरः। अत्राद्यपक्ष एवानुष्ठेय इति दामोदरः। पद्माकारमिति वर्तुलतोऽन्यत इति दामोदरस्तत्र। लक्षणायां मानाभावात्। मुक्तेति स्वप्रांतसमया मुक्तामालया युक्तं। पद्मरागस्य दलं खंडं तेन मध्येन्वितमित्यर्थः। मुष्टि — मिति। धर्मराजस्य दक्षिणमुष्टिना तुलादाने धारणोक्तेश्चतुर्मुखस्य वाममुष्टिना धारणं। कुर्युरिति पिधानेन छादनं गुर्वृत्विजो न च हिरण्यगर्भस्य यजमानस्य गर्भाधानादित्रयं कुर्युरित्यर्थः। उत्थापयेद्यजमानमित्यर्थः। षोडश संस्कारान् गुरुरेवं कुर्यात्। उत्थापनकर्तृत्वेन तस्योपस्थितत्वात् कुर्यादित्येकवचनाच्च। यत्तु दामोदरेण गर्भाधानादौ सर्वेषां कर्तृत्वात् सर्वसंस्काराणां समानकर्तृत्वनियमाच्च सर्वेषां — इत्यसंस्कारकर्तृत्वं। कुर्यादित्येकवचनं तु साधुत्वमात्रार्थमित्युक्तं तदयुक्तं। समानकर्तृकस्य वचनेन न चाधात्। गर्भाधानवैश्वदेवयोः समानकर्तृत्वाभावाच्च। अत्र गर्भाधानादीनां केषांचित्संस्काराणां कुंडेऽसंभवादपत्नीकस्य विवाहासंभवात्कन्यांतरानयने प्रयोजकत्वापत्तेः संस्का

रकरणीभूतमेवपाठमात्रमितिप्रमोदः। मंत्राअपिनयजमानशाखानुसारिणएव। नानाशाखीयानांऋत्वि
जांतच्छाखाध्ययनप्रयोजकापत्तेः। स्त्रीशूद्रादीनामनधिकारापत्तेश्च। नवेष्टापत्तिरितिवाच्यं। गुर्वर्त्विजामदृष्टार्थ
कमंत्रपाठेनसंस्कारसंभवेप्रधानविधिसंकोचेमानाभावात्। तेच — ग्वेदेजातकर्म। नामकर्म। नामकरणं। अन्नप्राश
नं। चूडाकरणं। उपनयनं। महाना — व्रतं। महाव्रतं। उपनिषद्व्रतं। गोदानव्रतमितिचत्वारिवेदव्रतोति। स्नानंविवा
हः पंचमहायज्ञामिलिताइति। यजुर्वेदेतुप्राजापत्यमैंद्रमाग्नेयसौम्यमिति। वेदव्रतानि। नामकरणंनास्तीति। सामवेदे
नामकरणस्थानेअन्नप्राशनं। गोदानव्रतंकेशांतव्रतंमहानाम्नीव्रतंज्येष्ठसाम्नीव्रतमिति। अथर्ववेदे। जातकर्मनि
ष्क्रमणमन्नप्राशनंगोदानमुपनयनंसावित्रीव्रतंवेदव्रतंसावित्रीव्रतविसर्जनंसमावर्तनंविवाहःपंचमहायज्ञा
मिलिताइति। एतन्मंत्राश्चप्रयोगेस्फुटाः। रूपनारायणस्तुजातकर्मनामकरणंनिष्क्रमणमन्नप्राशनंचूडाकरणो
पनयनव्रतचतुष्टयविवाहपंचमहायज्ञरूपान्षोडशसंस्कारान्सामान्यतएवगणपतिस्माप्रयोगकालेचाति

रिक्तानपिसंस्कारमंत्रान्‌लिखतिस्म तच्च। अतिरिक्तकरणेमानाभावात्‌। शाकाभेदेनसंस्कारभेदाच्च। सूच्यादिक
मिति। अत्रकेचिद्दानीरत्नादिदशकमेवदेयाखङ्गादिद्वादशकंतुरक्षिणादानोत्तरमित्याहुः॥ तत्र आदिपदेन सर्वेषां
ग्रहणात्‌। नचमंत्रेजनितइतिपुपुल्लिंगनिर्देशादपूर्वमंत्रऊहाभावाच्चस्त्रीणामनधिकारइतिवाच्यं। आत्माभि
प्रायेणपुल्लिंगोपपत्तेः॥ भ्योगुर्वादिभ्यस्त्रयोदशभ्यः॥ अत्रतुलापुरुषवत्सर्वैविभागोज्ञेयः॥ तेपूज्याः सर्वभावेनपू
र्णभक्तोस्त्वर्थः। त्रयोदशत्तेभ्योपिदेयमितिपक्षांतरमाह। बहवोवेति। अत्रापितु— वद्विभागोज्ञेयः। उपकरणेपा
डुकादीनिचगुरवेदेयानीतिकेचित्‌। वस्त्रजस्त्रउपकारणादीनांप्रागेवदानोक्तेरुपकरणशब्देनपादुकादीन्येवो
च्यंते। विषयोग्रामसमूहः परिगणाइतिमध्यदेशेप्रसिद्धः॥ इतिहिरण्यगर्भमहादानविधिः॥ ॥अथप्रयोगः॥ कृ
तौदेशकालौसंकीर्त्यमहापातकनाकल्पकोटिशतावच्छिन्नब्रह्मलोकमहितत्वप्रतिलोकपालपुराधिकरण
कमन्वंतरवामकलिकलुषविहीमवहुसिद्धसाध्यपूजितवक्षसरःकर्तृकामरचामरमालावीज्यमानत्वप्रयुक्तपित

17

शतबहुवंधुपुत्रपौत्रप्रपौत्रस्य तारणकामोऽहं हिरण्यगर्भमहादानमहं प्रतिपादयिष्य इति संकल्प्य मधुपर्कां
तंडुलापुडषवलूलाषोडशारेपरिपुष्पाणि विकीर्य तदुपरि द्रोणपरिमितांस्तिलान्त्रिधाय हिरण्यगर्भकुंडं अ
ग्निगादिद्वारा तत्साहिसेन स्वयं चास्मानीयतिलोपरि संस्थाप्य तन्मध्ये घृतक्षीरे तुल्यपरिमाणे यजमानास्थि
तियोग्यदेये। हिरण्यगर्भपार्श्वे च खड्गचक्रशक्तिदंडपाशध्वजगदाशूलपरशुकुलिशरूपाणि दशास्त्राणि तथा
रत्नदात्रमसूचीनालपिंडकादिव्यप्रतिमाना – वरणयज्ञोपवीतदंडकमंडलून्दशसुवर्णनिर्मितान्तत्तदा
कृतीन्तथा पादुकोपानहं छत्रचामरासनभाजनपात्राणि प्राकृतालेवस्थापयेत्। कुंडमध्ये हैमं पद्मं न्यसेत्। कुंडो
परिपद्माकारं पूर्वोक्तलक्षणं पिधानं दद्यात्। अथ संध्योत्तरमग्निस्थापनादिदांत्रिकृत्से प्रातश्च यजमानाभिषेकां
ते कृते यजमानो गृहीतपुष्पांजलिर्हिरण्यगर्भं त्रिः प्रदक्षिणीकृत्य मंत्रान्पठेत्। नमो हिरण्यगर्भाय हिरण्यक
वचाय च। सर्वलोकसुराध्यक्षजगद्धात्रे नमो नमः। भूलोकप्रमुखा लोकास्तव गर्भे व्यवस्थिताः। ब्रह्मादयस्तथा दे

धानमस्तेविश्वधारिणे। नमस्तेभुवनाधारनमस्तेभुवनाश्रय। नमोहिरण्यगर्भायगर्भेयस्यपितामहः। यतस्त्वमेवभू
तात्माभूतेभूतेव्यवस्थितः। तस्मात्मामुद्धराशेषदुःखसंसारसागरात्। ततःपुष्पांजलिनाहिरण्यगर्भंसंपूज्य
विधानमपसार्यहिरण्यगर्भेप्रविश्यदक्षिणेनपाणिनाधर्मराजंवामेनच चतुर्मुखंधृत्वाजानुहृत्पमध्येशिरःकृत्वो
ऊर्ध्वमुखः श्वासपंचकमासीत। गुरुणाचोपरिपिधानंदेयं। गर्भतादृशायांचगर्भाधानपुंसवनसीमंतोन्नयनप्रधा
नमन्त्रास्त्वस्त्वष्टारवीयाशुर्वर्त्विजः पठेयुः आश्वलायनमंत्राः। विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु। आसिं
चतुप्रजापतिर्धातागर्भंदधातुते। गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति। ग — ते अश्विनौदेवावाधत्तांपुष्करस्र
जौ। हिरण्ययीअरणीयंनिर्मंथतोअश्विना। तंतेगर्भंहवामहेदशमेमासिसूतवे। नेजमेषपरापतसुपुत्रःपुनरा
पत। अस्यैमेपुत्रकामायैगर्भमाधेहियःपुमान्। यथेयंपृथिवीमह्युत्तानागर्भमादधे। एवंतंगर्भमाधे
हिदशमेमासिसूतवे। विष्णोः श्रेष्ठेनरूपेणास्यांनार्यांगवीन्यां। पुमांसंपुत्रमाधेहिदशमेमासिसूतवे। प्रजा

(108)

पतेनत्वदेतास — विश्वाजाताविपरितावभूव। यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां। अयनः शोशु
चदघमग्नेशुशुग्धगरयिं। अपनः शोशुचदघंपाः। फलिनीयीअफलाअपुष्यायाश्चपुष्पिणीः। बृहस्पतिप्र
सूतास्तानोमुंचंत्वंहसः। इतिगर्भाधानं। यत्तेसुसीमेहृदयेहितमंतः। प्रजापतौ। मन्येहंमांतद्विद्वांसंमाहंपौत्रमयं
नियां। इतिपुंसवनं। ॐभूर्भुवस्स्वरोत्रिः। इतिसीमंतोन्नयनं। अथकात्यायनानां। ॐपूषाभगंसवितादधातुरुद्रः। गर्
भंधेहिसिनीवालिगर्भंधेहिपृथुष्टुके। गर्भंतेअश्विनौदेवावाधत्तांपुष्करस्रजौ। रेतोमूत्रंविजहातियोनिंप्रविश
दिंद्रियं। गर्भोजरायुणावृतउल्वंजहातिजन्मनोपत्तेसुसीमेहृदयंदिविचंद्रमसिश्रितं। वेदाहंतन्मांतद्विद्यात्पश्ये
मशरदःशतंजीवेमशरदः। शृणंशृणुयामशरदःशतं। इतिगर्भाधानं। हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपति
रेकआसीत्। सदाधारेपृथिवीद्यामुतेमांकस्मैदेवायहविषाविधेम। अद्भ्यःसंभृतःपृथिव्यैरसाच्चविश्वकर्मणः
समवर्त्तताग्रे। तस्यत्वष्टाविदधद्रूपमेति। तन्मर्त्यस्यदेवत्वमाजातमग्रे। इतिपुंसवनं। ॐभूर्भुवस्वर्वितपामि। इति

सीमंतोन्नयनं। अथसामगानां। ॐविष्णुर्योनिं। दधातुते। ते। गर्भंधेहि पुष्करस्रजौ। इतिगर्भाधानं। ॐपुमांसौमित्रा
वरुणौपुमांसावश्विनावुभौ। पुमानग्निश्चवायुश्चपुमान्गर्भस्तवोदरे। पुमानग्निःपुमानिंद्रःपुमान्देवोबृहस्प
तिः। पुमांसंपुत्रंविदस्वतंपुमाननुजायतां। इतिपुंसवनं। अथमर्जीवंतोवृक्षकजीवफलिनी—वा। पर्णवनस्पतेनुत्वा
नुत्वास्त्वपतोरयिः। ॐभूः ॐभुवः ॐस्वः ॐयेनादितेःसीमानंनयतिप्रजापतेर्महतेसौभगाय। तेनाहमस्यैसीमा
नंनयामिप्रजामस्यैजरदष्टिंकृणोमि। राकामहंसुहवांसुष्टुतीहुवेशृणोतुनःसुभगाबोधतुत्मना। सीव्यत्वपःस
च्याच्छिद्यमानयाददातुवीरंशतदायमुक्थ्यं। यास्तेराकेसुमतयःसुपेशसोयाभिर्ददासिदाशुषेवसूनि। ताभिर्नो
अद्यसुमनाउ। यागहिसहस्रपोषंसु—गेरराणा। ॐकिंपश्यसि। प्रजांपशून्सौभाग्यंमह्यंदीर्घायुष्ट्वंपत्युः। इतिसी
मंतोन्नयनं। अथाथर्वणानां। पर्वतादिवोयोने रंगादंगात्समाभृतां। शेपोगर्भस्यरेतोधाःसरौपर्णमिवादधन्।
यथेयंपृथिवीमहीभूतानांगर्भमादधे। एवादधामितेगर्भंतस्मैत्वामवसेहुवे। गर्भंधेहिसिनीवालिगर्भंधातादधा

तुते॥ विष्णुर्योनिं॰ इत्यनुते। यद्वेद राजा वरुणो यद्वु देवी सरस्वती। यदिंद्रो वृत्रहा वेद तद्ग— करणं पिब॥ गर्भो अस्योषधी
नां गर्भो वनस्पतीनां। गर्भो विश्वस्य भूतस्य सो अग्ने गर्भमेह धाः॥ अधिस्कंध वीरयस्व गर्भमाधेहि योन्यां। वृषासि वृ
ष्ण्यावन्प्रजायै त्वा नयामसि। विजिहीष्व बृहत्सामे गर्भस्ते योनिनाशयात्। अदुष्टे देवाः पुत्रं सोमपाठ— याद्विनं॥ धातः
श्रेष्ठेन रूपेणास्यां नार्यां गवीन्योः। पुमांसं पुत्रमाधेहि दशमे मासि सूतवे॥ त्वष्टः श्रेष्ठेनः सूतवे॥ सवितः श्रेष्ठेनः सू
तवे। प्रजापतेः श्रेष्ठेनः सूतवे॥ इति गर्भाधानं॥ येन वेहद्बभूविथ नाशयामसि तत्त्वत्। इदं तदन्यत्र त्वदप दूरे निद
धासि। आ ते योनिं ग— एतु पुमान्बाण इवेषुधिं। आ वीरो त्र जायतां पुत्रस्ते दशमास्यः। पुमांसं पुत्रं जानयतं पु
मान नु जानयतं पुमाननु जायतां। भवासि पुत्राणां माता जातानां जनयाश्च याः॥ यानि भद्राणि बीजान्यृषभा जन
यंति च। तैस्त्वं पुत्रं विंदस्व सा प्रसूर्धेनुका भव। कृणोमि ते प्राजापत्यमा योनिं गर्भ एतु ते। विंदस्व त्वं पुत्रं नार्य्यस्त
— शमच्छमु तस्मै त्वं भव। यासां द्यौः पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव। तास्त्वा पुत्रावेद्याय दैवीः प्रा

वत्सौषधयः॥ इतिपुंसवनं। यातेमातोन्ममार्जजातायाः पतिवेदनौ। दुर्नामातत्रमागृधीदलीशउतवत्सयः।
पलीलानुपलालौशंकुंकोकंमलिम्लुचंपलीजकं। आश्रेषंवाव्रिवाससंमृक्षग्रीवंप्रमीलिनं। मासंवृतोमोपसृ
पऊरूमावसृपोंतरां। कृणोम्यस्यैभेषजंबजंदुर्णामचातनं। दुर्णामाचसुनामाचोभाकंसंवृतमिच्छतः। अरायान
पहन्मश्रुनामास्त्रैणमिच्छतां। यः कृष्णः केश्यसुरस्तंबजउततुंडिकाः॥ अरायानस्यामुष्काभ्यांभंससोपहन्मसि।
अनुजिघ्रंप्रमृशंतंक्रव्यादमुतरेरिहं। अरायांश्वकिष्किणोवजःपिंगोअनीनशत्। यस्त्वास्वप्नेनिपद्यतेभ्राताभूत्वा
पितेचवाजस्तांसहतामितः क्लीवरूपास्तिरीटिनः॥ यस्त्वास्वपंतींसरतियस्त्वादीप्सतिजाग्रतीं। छायामिवप्रता
न्सूर्यपरिक्रामन्ननीनशत्। यः कृणोतिमृतवत्सामवतोकामिमांस्त्रियं॥ तमोषधेत्वंनाशयास्याः कमलमंजिवं।
येशालापरिनृत्यंतिसायंगर्दभनादिनः॥ कुसूलायेचकक्षिलाः ककुभाःकरूमास्त्रिमाः॥ तानोषधेत्वंगंधेन
विषूचीनान्विनाशय॥ इतिसीमंतोन्नयनं। ततोगुरुः श्वासपंचककालोत्तरंगीतमंगलध्वनिनापिधानमप

नीयपजमानमुत्थापयेत्। ततोबहिर्निःसृतेयजमानेस्वगृह्याखीपान्नषोडशसंस्कारसंबंधिनः प्रबाधनमावान्य
ठेत्। तत्राश्वलायनानां। प्रतेददामि मधुनो घृतस्य वेदं सवित्राप्रसूतं मघोनां। आयुष्मान्गुप्तोदेवताभिः शतं
जीवशरदोलोस्मिन्। मेधांतेदेवः सवितामेधांदेवीसरस्वती। मेधांते अश्विनौदेवावाधत्तांपुष्करस्रजा। अश्मा
भवपरशु — र्भवहिरण्यमस्तृतंभव। वेदोवैपुत्रनामासिसजीवशरदः शतं। इंद्रश्रेष्ठानिद्रविणानिधेहिचित्तिंदक्ष
स्यसुभ — गत्वमस्मे। पोषंरयीणामरिष्टिंतनूनांस्वाद्मानंवाचःसुदिनत्वमह्नां। अस्मेप्रयंधिमघवन्नृजीषिन्निंद्रा
योविश्ववारस्यभूरेः। अस्मेशतंशरदोजीवसेधाः। अस्मेवीरान्छश्वतइंद्रशिप्रिन्। जातकर्मः। त्वममुकनामासीति
नामकरणंमंत्रः। अन्नपतेन्नस्यनोधेह्यनमीवस्यशुष्मिणः। प्रप्रदातारंतारिष ऊर्जंनोधेहिद्विपदेचतुष्प
दे। इत्यन्नप्राशनं। येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्। तेनब्रह्मणोवपतेदमस्यायुष्मान्
जरदष्टिर्यथासत्। येनधाताबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्। तेनत आयुषेवपामिसुश्लोक्यायस्वस्तये। येन

भूयश्च रात्र्यां ज्योक्च पश्यति सूर्यं। तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये। एतान्येव मंत्रान्पुरनपि वारद्वयं पठेत्। इति चूडाकरणं। प्रणवव्याहृतिपूर्वसावित्र्यनुवचनमित्यनुमंत्रः। त्वं व्रतानां व्रतपतिरसि। भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः। शन्न इंद्राग्नी भवतामवोभिः शन्न इंद्रावरुणा रातहव्या। शमिंद्रासोमा सुविताय शंयोः शन्न इंद्रपूषणा वाजसातौ। कयानश्चित्र आभुव इती सदावृधः सखा। कया शचिष्ठया वृता। स्योना पृथिवी भवानृक्षरा निवेशनी यच्छा नः शर्म सप्रथः। तच्चक्षुर्देवहितं शुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं। इति महानाम्नीव्रतं। त्वं व्रतानां व्रतपतिरसि महाव्रताय स्वाहा। इति महाव्रतं। त्वं व्रतानां व्रतपतिरसि उपनिषदे स्वाहा। इति उपनिषद्व्रती येनावपत्सविता क्षुरेणेत्यादि चूडाकरणमंत्रैः पठेत् इति गोदानव्रतं॥ ऋतं च मे अनृतं च मे तन्म उ—यव्रतं। प्रज्ञा च मे अप्रज्ञा च मे तन्म उभयव्रतं। इष्टं च मे अनिष्टं च मे तन्म उ—यव्रतं। दत्तं च मे अदत्तं च मे तन्म उ—यव्रतं। श्रुतं च मे अश्रुतं च मे

तन्मउभयव्रतं। व्रतंचमेऽव्रतंचमेतन्मउभयव्रतं। यद्ग्नेसेंदस्यस प्रजापतिकस्यसऋषिकस्यसऋषिराजन्यस्यसपितृकस्यसपितृराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाकाशस्यसानक्षत्रस्यसप्रतीकाशस्यसप्रतीकाशस्यसदेवमनुष्यस्यसगंधर्वाप्सरसस्यसहारण्यैश्चपशुभिर्ग्राम्यैश्चयन्मआलनः अ्रसेनिव्रतंतन्मेसर्वव्रतमिदमहमग्नेसर्वतोभवामिस्वाहा। ममाग्नेवर्चोविहवेष्वस्तुवयंत्वंधानास्तन्वंपुषेम। मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षेमपृतनाजयेम। ममदेवाविहवेसंतुसर्वऽ इंद्रवंतोमरुतोविष्णुरग्निः। ममांतरिक्षमुरुलोकमस्तुमह्यंवातः पवतांकामेऽअस्मिन्। मयिदेवाद्रविणमायजंतांमय्याशीरस्तुमयिदेवहूतिः। दैव्याहोतारोनुषंतपूर्वोरिष्टास्यामतन्वासुवीराः। मह्यंयजंतममयानिहव्याकूतिः। सत्यामनसोमेअस्तु। एनोमानिगांकतमच्चनाहंविश्वेदेवासो। अधिवोचतानः। देवीःषळुर्वीरुरुणः कृणोतविश्वेदेवासइहवीरयध्वं। माहास्महिप्रजयामातनूभिर्मारिषामद्विषतेसोमराजन्। अग्नेमन्युंप्रतिनुदन्परेषामदब्धोगोपाःप

रिषाहिनस्त्वं। प्रत्यंवोयंतनिरुतः पुनस्त्वे इमेषांचित्तंप्रबुधांविनेशत्। धाताधातृणांभुवनस्ययस्पतिर्देवं
त्रातारमभिमातिषाहं। इमंयज्ञमश्विनोभावृहस्पतिर्देवाः पांतुयजमानंन्यर्थात्। उरुव्यचानोमहिषः शर्मयं
सदस्मिन्हवेपुरुहूतः पुरुक्षुः सनः प्रजायैहर्यश्वमृलेयंद्रमानोरीरिषोमापरादाः। येनः सपत्ना। अपतेभवं
तिंद्राग्निभ्यामवबाधामहेतान्। वसवोरुद्रा। आदित्याउपरिस्पृशंमोग्रंचेत्तारमधिराजक्रमन्। अर्वांचमिंद्रममु
तोहवामहेयोगोजिद्धनजिविश्वजियः। इमन्नोयज्ञंविहवेजुषस्वास्यकुर्मोहरिमोमेदिनंत्वा॥ इतिसमावर्त्त
ने॥ गृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः। भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्या
यदेवाः। इतिविवाहे। सर्पायस्वाहा। प्रजापतयेस्वाहा। सोमायवनस्पतयेस्वाहा। अग्नीषोमाभ्यांस्वाहा। इंद्राग्नी
भ्यांस्वाहा। द्यावापृथिवीभ्यांस्वाहा। धन्वंतरयेस्वाहा। इंद्रायस्वाहा। विश्वेभ्योदेवेभ्यस्वाहा। गृहायस्वाहा। गृहदेवता
भ्यस्वाहा। इंद्रायस्वाहा। इंद्रपुरुषेभ्यःस्वाहा। यमायस्वाहा। यमपुरुषेभ्यःस्वाहा। विश्वेभ्योदेवेभ्यःस्वाहा। वरुण

पुरुषेभ्यः स्वाहा। सोमाय स्वाहा। सोमपुरुषेभ्यः स्वाहा। ब्रह्मणे स्वाहा। ब्रह्मपुरुषेभ्यः स्वाहा। विश्वेभ्यो देवेभ्यः स्वाहा।
सर्वैभ्यो भूतेभ्यः स्वाहा। दिवाचारिभ्य स्वाहा। रक्षोभ्यः स्वाहा। इति भूतयज्ञः। स्वधा पितृभ्य इत्यैक एव यज्ञमंत्रः। सन
कादिमनुष्येभ्यो हंतलेक मनुष्ययज्ञमंत्रः। गायत्री पठित्वा। अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं। होतारं रत्न
धातमं। एवमादि यथाशक्ति ऋचः पठित्वा नमो ब्रह्मणे नमोस्त्वग्नये नमः पृथिव्यै नमः ओषधीभ्यो नमो वाचे न
मो वाचस्पतये नमो विष्णवे महते करोमि। इति ब्रह्मयज्ञः। अथ कालायनानां। ॐ भूस्त्वयि दधामि। ॐ भुवस्त्व
यि दधामि। ॐ स्वस्त्वयि दधामि। ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि। अग्निरायुष्मान् स वनस्पतिभिरायुष्मांस्तेन त्वा
युषायुष्मंतं करोमि। सोम आयुष्मान् स ओषधीभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि। ब्रह्म आयुष्मत्तद्ब्राह्मणै
रायुष्मत्तेन त्वायुषायुष्मंतं करोमि। पितर आयुष्मंतस्तेन वाभिरायुष्मंतस्तेन त्वायुषायुष्मंतं करोमि। यज्ञ आ
युष्मान् स दक्षिणाभिरायुष्मांस्तेन त्वायुषायुष्मंतं करोमि। समुद्र आयुष्मान् स स्रवंतीभिरायुष्मांस्तेन त्वायु

ष्मंतंकरोमि। एतस्यमंत्रस्यवारत्रयंजपः। ॐ आयुषंजमदग्नेः कश्यपस्यत्र्यायुषंयद्देवेषुत्र्यायुषंतन्नोअस्तु
त्र्यायुषंमितित्रिर्जपेत्। ॐ प्राण। ॐ व्यान। ॐ अपान। ॐ उदान। ॐ समान ॐ अश्माभावपरशु—र्वहिरण्य
मस्तृतंभव। आत्मावैपुत्रनामासिसजीवशरदः शतं। इतिदशजातकर्ममंत्राः। तच्चक्षुर्देवहितंपुरस्ताच्छुक्र
मुच्चरत्। पश्येमशरदःशतंजीवेमशरदःशतं। शृणुयामशरदःशतंप्रब्रवामशरदःशतंमदीनाश्यामशरदः
शतंभूयश्चशरदःशतंभूयश्चशरदःशताच। इत्येकएवनिष्क्रमणमंत्रः। ॐ हन्तताइत्येकएवात्रप्राशनमं
त्रः। ॐ येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्। तेनब्रह्मणोवपतेदमस्यायुष्यजरदष्टिर्यथासत्।
ॐ त्र्यायुषंजमदग्नेः कश्यपस्यत्र्यायुषंयद्देवेषुत्र्यायुषंतन्नोअस्तुत्र्यायुषं। येनभूयश्चरादिवज्योक्पश्चाद्धि
सूर्यं। तेनतेवपामिब्रह्मणाजीवातवेजीवनायसुश्लोक्यायस्वस्तये। ॐ यत्क्षुरेणमज्जयतासुपेशसाव
प्त्वावावयतिकेशांश्छिंधिशिरोमास्यायुःप्रमोषीः। इतिचत्वारश्चूडाकरणमंत्राः। सावित्रीमंत्रमात्रपाठः।

इत्युपनयवमंत्रः। प्रजापतयेस्वाहा। इंद्रायस्वाहा। अग्नयेस्वाहा। सोमायस्वाहा। अंतरिक्षायस्वाहा। वायवेस्वाहा
ब्रह्मणेस्वाहा। प्रजापतयेस्वाहा। देवेभ्यःस्वाहा। ऋषिभ्यस्वाहा। श्रद्धायैस्वाहा। मेधायैस्वाहा। सदसस्पतयेस्वाहा। अ
नुमतयेस्वाहा। एतेपंचदशवेदव्रतचतुष्टयमंत्राः। ॐ येस्वंतरग्नयः। प्राविशागोह्यउपगोह्योमयूषोमनोहास्व
चक्षुरेकविंजनस्तनूदुषुरिंद्रियहा। तान्विजहामि योरोचनस्तमिहगृह्णामि तेनरमामभिषिंचामिश्रियैयशसेब्र
ह्मणेब्रह्मवर्चसाय। येनश्रियमकृणुतांयेनावमृशतांसुरां। येनाक्षावभ्यषिंचतांयद्वांतदश्विनायशः। ॐ
आपोहिष्ठामयोभुवस्तानऊर्जेदधातनमहेरणायचक्षसेयोवःशिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमा
तरः। तस्मा अरंगमामवोयस्यक्षयायजिन्वथाआपोजनयथाचनः। इतिपंचस्नानमंत्राः। गृभ्णामितेसौभग
त्वायहस्तंमयापत्याजरदष्टिर्यथासः। भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः। अमोहम
स्मिसात्वंसात्वमस्यमोहंद्यौरहंपृथिवीत्वंतावेहिविवहावहैसहरेतोदधावहैप्रजांप्रजनयावहैपुत्रान्विंदाव

हैवहून्।तेसंतुजरदष्टयःसंप्रियौरोविष्णुसुमनस्यमावौपश्येमशरदः शतंजीवेमशरदः शतंशृणुयामशरदः श
तं। इतिविवाहमंत्राः॥ ॐ ब्रह्मणेस्वाहा॥ ॐ प्रजापतयेस्वाहा॥ गृह्याभ्यःस्वाहा॥ ॐ कश्यपायस्वाहा॥ ॐ अनुम
तयेस्वाहा॥ इतिपंचदेवयज्ञमंत्राः॥ ॐपर्जन्यायनमः॥ ॐअद्भ्योनमः॥ पृथिव्यैनमः॥ धात्रेनमः॥ वायवेनमइति
मंत्रावारचतुष्टयंप्राच्यैनमः॥ वायव्यैनमः॥ प्रतीच्यैनमः॥ उदीच्यैनमः॥ ब्रह्मणेनमः॥ अंतरिक्षायनमः॥ सू
र्यायनमः॥ विश्वेभ्योदेवेभ्योनमः॥ विश्वेभ्योदेवेभ्योनमः॥ उषसेनमः॥ इतिषोडशभूतयज्ञमंत्राः॥ पितृभ्यः स्व
धानमइतिपितृयज्ञमंत्रः॥ अतिथिंप्रजातुध्यानमंत्रे। सनकादिमनुष्येहंतेतिमंत्रावापठनीयमितिमनु
ष्ययज्ञः॥ यथाशक्तिइषेत्वोर्जेत्वाइत्यादिमंत्रपाठोब्रह्मयज्ञइति। अथसामगानो। ॐ इयमाग्नेदमत्रमिद
मापुरिदममृतं। ॐ मेधांतेमित्रावरुणौमेधामग्निर्धातुतेमेधांतेअश्विनौदेवावाधत्तपुष्करस्रजौ। सदसस्पति
मद्भुतंप्रियमिंद्रस्यकाम्यं। संविमेधामयाशिषंस्वाहा॥ तेजातकर्म। ॐ कोसिकतमोस्येषोस्यमृतोसि। आस्यं

त्प मासं प्रविश श्री विष्णुशर्मन्। ॐ सत्वाह्ने परिददात्वहस्त्वा रात्र्यै परिददातु रात्रिस्त्वाहोत्राभ्यां परिददात्वहोरा
त्रौ त्वर्द्धमासेभ्य परिदत्तामर्द्धमासास्त्वा मासेभ्यः परिददतु मासास्त्वर्तुभ्यः परिददत्व तवस्त्वा पुषपुषे अजायै प
रिददातु श्री विष्णुशर्मन्। इति नामकरणं। ॐ यत्तेसुसीमे हृदये हितमंतः प्रजापतौ। वेदाहं मन्ये तद्ब्रह्म मा
हं पौत्रमघं त्रिगाम्। यत्पृथिव्या अनामृतं दिवि चंद्रमसि श्रितं। वेदामृतस्याहं पौत्रमरिषं। इंद्राग्नी शर्म यच्छ
त प्रजायै मे प्रजापती। यथा यत्र प्रमीयेत पुत्रो जनित्र्या अधि। निष्क्रमणं। आयमगात्सविता क्षुरेण। उष्णेन
वायु उदकेनैधि। आप इंदतु जीवसे विष्णो दंष्ट्रोसि। ओषधे त्रायस्वैनं स्वधिते मैवं हिंसी। ॐ येन पूषा बृह
स्पतेर्वायोरिंद्रस्यावावपत्। तेन ते वपामि ब्रह्मणा जीवा॥ तवे जीवं नाप घीपुशाय वर्चसे। अप उदंत्वित्या
दि मंत्र पंचकं पुनरपि वारद्वयं पठेत्। ॐ त्र्यायुषं जमदग्नेः कश्यपश्यपश्य त्र्यायुषं मगस्त्यस्य त्र्यायुषं यद्दे
वानां त्र्यायुषं तन्नो अस्तु त्र्यायुषं। इति चूडाकरणं सावित्री इति मंत्रपाठः। इस्तुपतयनं। ॐ अग्ने व्रतपते व्रतं

तपारेष्यामि तन्ते प्रवीमि तच्छकेयं तेनर्ध्यासमिदं महमनृतात्सत्यमुपैमि स्वाहा। ॐ वायो व्रतपते। सूर्य व्रत
पते। चंद्रव्रतपते।। व्रतानां व्रतपतः अग्ने व्रतपते। चंद्रव्रतपते। व्रतानां व्रतपतेति वेदचतुष्टयं। ॐ ये अप्स्वंत
रग्नयः प्रविष्टा गोह्य उपगोह्यो मशैको मनोहाः। खलो विरजस्तनूषिरिंहा अतितान्सृजामि। ॐ यदपां घोरं
यद्धपां क्रूरं यदयामतितत्सृजामि। ॐ यो रोचनस्तमिह गृह्णामि तेनाहं मामभिषिंचामि। ॐ यशसे तेजस
सोऽब्रह्मवर्चस्य बलायेंद्रियाय वीर्यायान्नाद्याय रायस्पोषाय त्विषा अपिचित्यौ। ॐ येन स्त्रियमकृतं। येनापा
ममृशातसुरां। येनाक्षानभ्यषिंचंत येन मा पृथिवीं महीं। यद्वां दश्विना यशस्तेन मामभिषिंचतं। एते पंच स
मावर्त्तने। ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरंधिर्मह्यं त्वादु
र्गार्हपत्याय देवाः। ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवकामा स्योना नो शंत्रो भ
वद्विपदे शं चतुष्पदे। आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा। अदुर्मंगलीः पतिलोक

115

मा विशश्रोभव द्विपदे शं चतुष्पदे। इमां त्वमिंद्रमीढ्वः सुपुत्रां सुभगां कृधि। दशास्यां पुत्राना धेहि पतिमेकादशं कुरु। संम्राज्ञी श्वशुरे भव संम्राज्ञी श्वश्र्वां भव ननांदरि संम्राज्ञी भव संम्राज्ञी अदिते वृषु। ॐ मम व्रते हृदयं ते दधातु। मम चित्तमनु चित्तं ते अस्तु। मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा युनक्तु मह्यं। इति विवाहः। ॐ भूर्भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवस्स्वः स्वाहा। ॐ देवकृतस्यैनसोवयजनमसि स्वाहा। पितृकृतस्यैनसोवयजनमसि स्वाहा। ॐ मनुष्यकृतस्यैनसोवयजनमसि स्वाहा। ॐ अस्मत्कृतस्यैनसोवयजनमसि स्वाहा। ॐ यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ यत्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमसि स्वाहा। ॐ एनस एनसोवयव — यजनमसि स्वाहा। ॐ अग्नये स्विष्टकृते स्वाहा। इति देवयज्ञः ॐ सर्वेभ्यो देवेभ्यो नमः। ॐ सर्वेभ्यो भूतेभ्यो नमः। इति भूतयज्ञः पितृयज्ञस्स्वधेति पितृयज्ञमंत्रः। अतिथिपूजानुध्यानं सनकादिमनुष्येभ्यो हंतेतिवा मनुष्ययज्ञः। यथा

शाक्कितुग्रीयांसादिमंत्रपाठोब्रह्मयज्ञः। इतिपंचमहायज्ञाः। अथ अथर्ववेदिनो। अहंरुद्रेभिर्वसुभिश्चरांम्य
हमादित्यैरुतविश्वेदेवैः। अहमित्रावरुणोभाबिभर्म्यहमिंद्राग्निःऽ अहमश्विनोभा। अहंराष्ट्रीसंगमनीवसू
नांचिकितुषीप्रथमायज्ञियानां। तांमांदेवाव्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावेशयंतः अहमेवस्वयमिदंवदा
मिजुष्टंदेवेभिरुतमानुषाणां। यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधां। मयासोऽन्नमत्तियोवि
पश्यंतियःप्राणितियीं हृशृणोत्युक्तं। अमंतोयोमांतउपक्षियंतिश्रुधिश्रुतश्रद्धिवंतेवदामि। अहंरुद्रायध
नुरातनोमिब्रह्मद्विषेशरवेहंतवाउ। अहंजनायसमदंकृणोम्यहंद्यावापृथिवीः आविवेश। अहंसोममाहतसं
बिभर्म्यहंत्वष्टारमुतपूषणंभगं। अहंदधामिद्रविणंहविष्मतेसुप्राव्यायजमानायसुन्वते। अहंसुवेपितरमस्यमू
र्धन्ममयोनिरप्स्व१तःसमुद्रेततोवितिष्ठेभुवनानिविश्वतामूंद्यांवर्ष्मणोपस्पृशामि। अहमेववातइवप्रवा
म्यारंभमाणाभुवनानिविश्वा। परोदिवापरएनापृथिव्यैतावतीमहिनासंबभूव। अष्टावेतेजातकर्ममंत्राः। शि

116

वेतेस्तां द्यावापृथिवी असंतापे अभिश्रियौ। शतेसूर्य आतपत्वस्मस्वातो वा हृदो शिवा ऽअभिक्षरन्तुत्वापो दिव्याः
पयस्वतीः शिवास्तेसंतोषमयः। उत्वाहर्षमधरस्याउत्तरां पृथिवीमभि। उद्वयंतमसस्परिरोहंतिनाकुत्तुमं। देवं
देवत्रासूर्यमगन्मज्योतिरुत्तमं। एते त्रयो निष्क्रमणमंत्राः। वौतेस्तां व्रीहियवाववलासावदोमधौ। एतौ यक्ष्मं वि
वाधेते एतौ मुंचतौ मुंचतौ अंहसः। यदश्नासि यत्पिबसि धान्यं कृष्याः पयः। यदाद्यं यदनाद्यं सर्वं ते अन्नमविषं
कृणोमि। इत्यन्नप्राशनमंत्रः। येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्मणो वपतेद
मस्य गोमानश्ववानयमस्तु प्रजावान्। इति गोदानमंत्रः। प्रणवव्याहृतिपूर्वकं सावित्र्यनुवचनमित्युवचनमि
त्युपनयनमंत्रः। अनेन व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यतां तन्मे राध्यतां तन्मे समृध्यतां तन्मे मा
व्यनशन्ततनराध्यासं तं ते प्रब्रवीमि तदुपाकरोमि। वायो व्रतपते इत्यादि॥ सूर्य व्रतपते इत्यादि। चंद्र व्रतपते इ
त्यादि। आपो व्रतपते इत्यादि। तत्र इतिस्थाने। तद्द इत्यूहो मिविशेषः। देवा व्रतपते इत्यादि। वेदा व्रतपते इत्यादि। व्र

तानां व्रतपते इत्यादि। एत्यादि। एते अष्टौ सावित्री व्रतवेदमंत्राः। इदावत्सराय परिवत्सराय कृणुता वृहन्नमः।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम। सा नो देवा अहिर्बुधी सतोकान सह पूरुषान्। संयंतं नवि
ष्यरध्यात्तं न संयमत्तमो देवजनेभ्यः। नमोस्तुसिताय नमस्तिरश्चिनाजपेस्वजाय च भवे नमो नमो देवेजने
भ्यः। शन्ते हस्तिदन्तादतः एटते हस्वाहन्नः शन्ने जिह्वापाजिह्वां शचीस्वहं। अस्यांमग्ने व्रतपते व्रतमचारिषंत
दशकं तत्समासंतन्मे राद्धं तन्मे समद्धं तन्मे माव्यनशं तेन राद्धोस्मि तछन्य ब्रवीमि तदुपाकरोमी। वाथो व्र
तपत इत्यादि। सूर्यो व्रतपत इत्यादि। चंद्र व्रतपत इत्यादि। आपो व्रतपत इत्यादि। तत्र इति पदस्थाने तद्ध इति
पद प्रक्षेपो विशेषः। दैवा व्रतपत इत्यादि। वेदा व्रतपत इत्यादि। व्रतानां व्रतपत इत्यादि। एते सावित्री वेदव्र
तविसर्जनमंत्राः। ऋतुं सायमयजामहे याभ्यां कर्माणि कुर्बते। एतावेव मंत्रौ मिलितौ पुनः पटनियौ। अ
नुमयेस्वाहा। एते त्रयः समावर्त्तनमंत्राः। येनाग्निरस्याभ्म्याहस्तं जग्राह दक्षिणां। तेन हस्तामिते हस्तं

(117)

माव्यथिष्ठमाव्यथिष्ठमयासहप्रजयाचधनेनच।देवस्तेसविताहस्तंगृह्णातुसोमोराजासुप्रजंसकृणोतु।
अग्निःसुभगांजातवदाःपत्येपत्नींजरदष्टिंकृणोतु।गृह्णामितेसौभगत्वायहस्तमग्रहीत।पत्नीत्वमसि
धर्मीणांहंगृहपतिस्तवा।ममेयमस्तुपोष्यामह्यंत्वादाद्बृहस्पतिः।मयापत्याप्रजावतीसजीवशरदःशतं।ए
तेपंचविवाहमंत्राः।ॐभूस्वाहा।ॐभुवस्वाहा।ॐस्वस्वाहा।भूर्भुवस्वस्वाहा।देवकृतस्यैनसोवयजनमसिस्वा
हा।पितृकृतस्यैनसोवयजनमसिस्वाहा।मनुष्यकृतस्यैतसोवयजेनमसिस्वाहा।आत्माकृतस्यैनसोवयजन
मसिस्वाहा।अनाज्ञाताज्ञातस्यैनसोवयजनमसिस्वाहा।यद्वोदेवाश्चकृमजिह्वयागुरुमनसोवाप्रयुतीदेव
हेडनं।आरावायोनोऽभिदुच्छुनायतेतस्मिंतदेनोवसवोनिधेतनःस्वाहा।यद्देवादेवहेडनंदेवासश्चकृमावयं।
आदित्यास्तस्मान्नोयूयमृतस्यार्तेनमुंचत।ऋतस्यर्तेनादित्यायजत्रामुंचतेहतः।यज्ञयज्ञवाहसःशिक्षंतोनो
पशेकिमा।मदस्वतायजयजमानाः—चाज्यानिजुह्वता।आकामोविश्वेवोदेवा।शिक्षंतोनोपश्चाकिमा।यदि

वे।र्त्विग्भ्यो युष्मभ्यं सहं दक्षिणां संप्रददे इति हिरण्यगर्भव्रतनीयां शंदद्यां शंदद्यात्प्रदातु तुलापुरुषोक्तयामादीतो
दक्षिणात्वेतदानं तदातस्यैव संकल्पः॥ दक्षिणाप्रतिपादने च सर्वे पक्षाः स्तुलापुरुवत्ज्ञेयाः दानोत्तरं यजमानः
पुण्याहवाचनमावाहितदेवतानामुत्तरपूजां विसर्जनं कृत्वा पादुकारिषड्क्रमेड्योपकरणादि सर्वं गुरवे प्रतिपा
द्य यथाशक्ति ब्राह्मणान्भोजयेदिति॥ ॥मीमांसैकधुरंधरः स्मृतिधरो न्यायेपि वागीश्वरः साहित्यामृतसा
गर। सुजनतावल्लीरसालद्रुमः। यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि हिरण्यगर्भददतौ सत्या
तये पद्धतिः॥ ॥अथ ब्रह्मांडमहादानं॥ मात्स्ये। अथातः संप्रवक्ष्यामि ब्रह्मांडं विधिपूर्वकं। यच्छ्रेष्ठं सर्वदाना
नां महापातकनाशनं॥ पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं। लो
केशावाहनं तद्वदधिवासनकं तथा। कुर्याद्विंशपलादूर्ध्वमासहस्राच्च शक्तितः। शकलद्वयसंयुक्तं ब्रह्मांडं कांच
नं बुधः। दिग्गजाष्टकसंयुक्तं षड्वेदांगसमन्वितं। लोकपालाष्टकोपेतं मध्यस्थितचतुर्मुखं। शिवाच्युतार्कशि

T 18

रवरसुमालक्ष्मीसमन्वितं।वस्त्रादिसमरूगर्भमहारत्नसमन्वितां॥ – स्तरेंगुलशतंयावदायामविस्तरं।कौशेयवस्त्रसंवीतंतिलद्रोणोपरिन्यसेत्।तथाष्टादशधान्यानिसमंतात्परिकल्पयेत्।पूर्वेणानंतशयनंप्रद्युम्नपूर्वदक्षिणे।प्रकृतिंदक्षिणेपार्श्वेसंकर्षणमतःपरंपश्चिमेचतुरोवेदाननिरुद्धमथापरं।अग्निमुत्तरतोहैमंवासुदेवमतःपरं।समंतात्कुउपीठस्थानर्चयेल्लोकपालान्बुधः।स्थापयेद्वस्त्रसंवीतान्पूर्णकुंभान्दशैवतु।दशैवधेनवोधयाःसहेमांबरदोहनाः।पादुकोपानहच्छत्रचामरासनदर्पणैः।भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः।होमाधिवासनांतेचस्नापितोवेदपुंगवैः।इममुच्चारयेन्मंत्रंत्रिःकृत्वाथप्रदक्षिणं।नमोस्तुविश्वेश्वरविश्वधामजगत्सवित्रेभगवन्नमस्ते।सप्ताधिलोकामरभूतलेशगर्भेणसार्द्धंवितराभिरक्षां।येदुःखितास्तेसुखिनोभवंतुप्रयांतुपापानिचराचराणां।त्वद्दानशास्त्राहतपातकानांब्रह्मांडदोषाःप्रलयंव्रजंतु।एवंप्रणम्यामरविश्वगर्भंदद्याद्द्विजे – दशधाविभज्य।भागद्वयंतत्रगुरोःप्रकल्पयेत्समंभजेच्छेषमतःक्रमेण।अल्पेचदेयेगुरुरेकएवकुर्यादथैकाग्निवि

द्वूंसोयदविद्वांसएनासिचकृमायं। यूयंनमस्तस्मान्मुंचतविश्वेदेवाः सजोयसः। यदिजाग्रद्यदिस्वपन्नेनएनस्यो
करं। भूतम्मातस्माद्भव्यंवद्रुपदादिवमुंचतं। द्रुपदादिवमुमुचानासिन्नःस्नात्वामलादिवा। पूतंपवित्रेणेवाज्यंवि
श्वेशुभंतुमैनसः। अग्नयेस्वाहा। प्रजापतयेस्वाहा। अग्नयेस्विष्टकृतेस्वाहा। एतेकुनविंशतिर्वयाज्ञमंत्राः। ब्र
ह्मणेबलिंहरामिवषट्वैश्रवणाबलिंहरामिवषट्। विश्वेभ्योदेवेभ्योबलिंहरामिवषट्सर्वेभ्योदेवेभ्योबलिंहरा
मिवषट्एतैवषट्भूतेयज्ञमंत्रापित्र — स्वधानमइतिपित्र्यज्ञमेवः। सनकादिमनुष्येभ्योहंतेंतिमनुष्याय
ज्ञमंत्रः शन्नोदेवीरभिष्टय आपोभवंतुपीतये। शंयोरभिस्रवंतुनः। इत्यादियथाशक्तिमंत्रपाठेब्रह्मयज्ञमं
त्राः। अथयजमानः। स्वर्णादिदशाकंरत्नादिदसकंचसंपूज्यजलेनाह्लाद्येदंविष्णुदैवतंतुभ्यमहंसंप्रददइतिगुर
वेदत्वाहस्तेतदानप्रतिष्ठासिध्यर्थमग्निदैवतममुंसुवर्णदक्षिणांसंप्रददेइतितंदत्वाहिरण्यगर्भस्यशब्धिमतोजनिं
बध्वातेप्रार्थयेत्। ॐनमोहिरण्यगर्भायविश्वगर्भायवैनमः चराचरस्यजगतोगृहभूतायवैनमः।

मात्राहं जनितः पूर्वं मर्त्यधर्मा नरोत्तम। त्वद्गर्भसंभवाद्देवदिव्यदेहो भवाम्यहमिति। अथ सर्वे शांतिकलशचतुष्टयोदकेन पुनर्यजमानं स्नापयेयुः। तत्र मंत्रो। देवस्य त्वा सवितुः प्रसवेश्विनो बाहुभ्यां पूष्णो हस्ताभ्यां। अथ जातस्य ते गात्राणि अभिषेक्ष्यामहे वयं। दिव्येनामेन वपुषा चिरंजीव सुखी भव। ततो यजमान उत्तराभिमुखान् गुर्वृत्विज्जापकद्वारपालान्वरणक्रमेण संपूज्य सोपकरणं हिरण्यगर्भं चोरस्यामीलुत्कादद स्वस्तुके वरणक्रमेणो वसर्वहस्तौ परिगुरोर्हस्ते कृत्वा हिरण्यगर्भोपरि जलं दत्वा कुशादीत्याद्य देशकालौ संकीर्त्य कामांतं संकल्पं वदुत्वा यामुतिलद्रोणस्थं हेमपंकजगर्भवंतं मुक्तावलीममीपेतं पद्मरागान्वितपिधानसहितं सुवर्णमयं हिरण्यगर्भं विष्णुदैवतं अमुकामुकगोत्रेभ्योऽमुकामुकशर्मभ्यो गुर्वृत्विग्भ्यो युष्मभ्यमहं संप्रददे इति गुरुहस्ते जलं दद्यात्। सर्वे स्वस्तीति वदेयुः कामस्तुतिं च पठेयुः पुनः कुशादीन्यादाय प्रकृतस्य हिरण्यगर्भदानस्य प्रतिष्ठासिध्यर्थं एतात्सुवर्णानग्निदैवतात्सुवनग्निदैवतात्सुवर्णानग्निदैवतान्गु

धानयुक्त्या। स एव संपूज्य तमोल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन। इत्थं य एतदखिलं पुरुषोत्र कुर्याद्ब्रह्मांड
दानमधिगम्य महद्विमानं। निर्धूतकल्मषविशुद्धतनुर्मुरारेरानंदकृत्समुपैति सहाप्सरोभिः संतारयेत्पितृपिताम
ह पुत्रपौत्रबंधुप्रियातिथिकलत्रशताष्टकं सः। ब्रह्मांडदानशकलीकृतपातकौघमानंदयेच्च जननीकुलमप्य
शेषं। इति पठति शृणोति वा य एतत्सुरभवनेषु गेहेषु धार्मिकाणां। मपि मपि च ददाति मोदते सा च मरपते भव
ते सहाप्सरोभिः। अथात इति। यद्यप्यत्र महापातकनाश एव फलमुक्तं तथाप्येते वक्ष्यमाणमपि फलं ज्ञेयं।
पुण्ये स्यादि सार्धश्लोकेनाविशुद्धतुलापुरुषधर्मातिदेशः क्रियते। अविरोधप्रदर्शनार्थमेव च केषांचिदुक्तेः
कुर्यादिति पूर्वतः पश्चाच्च संबध्यते। पलं सुवर्णाश्चत्वारस्तु रूपलविंशतेरधिकं सहस्रपलपर्यंतं सुवर्णस्य
च ब्रह्मांडं कुर्यात्। दिग्गजाद्युपकरणसुवर्णमेतन्मध्य एव न भिन्नं। प्राकृतप्रतिमासुवर्णं तु भिन्नमिति केचि
त्। अन्ये तु दिग्गजाद्युपकरणसुवर्णमपि भिन्नं। अग्रे कांचनानीति पुनः कांचनश्रवणादित्याहुः। शाकलेति

120

।शाकलद्वयं संयुक्तं यस्मिन्नित्यर्थः। यद्वा शाकलद्वयं च संयुक्तं चेति समासः। कुंभच्छायो भवेद्यादृक् प्रतीच्यां
दिशि चंद्रमाः उदेति शुक्लपक्षादौ वपुरंडस्य तादृशमिति ब्रह्मांडपुराणात्। अत एव दामोदरेण वटफलाद्यंडाकारं व
र्तुलं ब्रह्मांडमित्युक्तं। अत एवांडद्वयात्मकमिति दामोदरग्रंथात्तन्मतमित्यां एकस्यैव वर्तुलाकारस्य शाकलद्व
यात्मकत्वेनांडद्वयात्मकत्वमपि सिध्यतीति तदर्थात्। शाकलद्वयं चोपर्यधोभावेन स्थापनीयं। अन्यथा तन्मध्ये
ब्रह्मस्थापनायोगात्। दिग्गजेत्यादि। ऐरावतः पुंडरीको वामनः कुमुदोंजनाः। पुष्पदंतः सार्वभौमः सुप्रतीक
श्च दिग्गजा इत्युक्तं। दिग्गजाष्टकेन संयुक्तं संलग्नं स्थापनीयमित्यर्थः। एतेषां लोकपालानां पंचमाद्यादिक्रमे
णाब्रह्मांडा इत्युक्तं। दिग्गजाष्टकेन संयुक्तं संलग्नं स्था — पं मित्यर्थः। एतेषां लोकपालानां पंचमाद्यादिक्रमे
णब्रह्मांडाद्बहिरेवस्थापनमिति दामोदरः। शिक्षा कल्पो — करणं निरुक्तं ज्योतिषं तथा। छंदश्चेति षडंगानि
वेदानां चैव प्रवक्ष्यत इति षडंगानि। तेषां च लक्षणं। मत्तीमिव ब्रह्मणा लोके साक्षसूत्राणि तानि तु। द्विभुजा निष्प्रभा

स्यानि वामे दधति कुंडिका इति कुंडिकाः कमंडलून् । एतासां वामे धारणो के रक्षस्त्राणो दक्षिणे धारणं । वेदानां पश्चिमे स्थापनस्य वक्ष्यमाणत्वात् गां नाम पितृत्वैवस्थामः । ब्रह्मणे नमः । अंतरिक्षाय नमः । सूर्याय नमः । विश्वेभ्यो देवेभ्यो नमः । विश्वेभ्यो भूतेभ्यो नमः । उषसे नमः । इति षोडश भूतयज्ञमंत्राः । पितृभ्यः स्वधा नम इति पितृयज्ञमंत्रः । अतिथि पूजा । तु ध्यानमंत्रैः । सनकादिमनुथेभ्यो हंतेनि मंत्रा वा पठनीयमिति मनुष्ययज्ञः । यथाशक्ति इषेत्वोर्जेत्वा इत्यादि मंत्रपाठो ब्रह्मयज्ञ इति । अथ सामगानां । ॐ द्यमाग्नेदमन्नमिदमायुरिदममृतं । ॐ मेधां ते मित्रावरुणो मेधामग्निर्धीतु ते मेधां ते अश्विनौ देवा वाधत्तपुष्करस्रजो । सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं । सनिं मेधामयाशिषं स्वाहा । ते जातकर्म । ॐ कोसि कतमोस्येषोस्यमृतोसि । आस्यत्सं मासं प्रविश श्री विष्णुशर्मन् । ॐ मत्वाह्ने परिददात्वहस्त्वा रात्र्यै परिददातु रात्रिस्त्वाहोरात्राभ्यां परिददात्वहोरात्रौ त्वर्द्धमासेभ्यः परिदत्तामर्द्धमासास्त्वा मासेभ्यः परिददतु मासास्त्वर्तुभ्यः परिददत्स्तवस्त्वायुषे जजायै परिददातु श्री विष्णुशर्मनः । इति

नामकरणं॥ ॐ मनेसुशीमेहृदयेहितमंतः प्रजापतौ। वेदाहेसन्येतद्धूलमाहंपौत्रमघत्रिगाम्॥यत्पृथिव्याअ
नामृतंदिविचंद्रमसिश्रितं। वेदाष्टनस्याहंपौत्रमरिषं। इंद्राग्नीशर्मयछतप्रजापैमेप्रजापती। यथायन्नप्रमीयेत
पुत्रोजनिश्याअधि॥ निष्क्रमणं। आयमगात्सविताक्षुरेण उष्णेनवायुउदकेनैधि। आपउंदंतुजीवसेविष्णोर्दंष्ट्रो
सि। ओषधेत्रायस्वैनंस्वधितेमैनं। हिंसीः॥ ॐ येनपूषाबृहस्पतिर्वायोरिंद्रस्यवाचपत्। तेनतेवपामिब्रह्मणाजी
वा। तवेजीवंतायदीर्घायुष्यायवर्चसे। अपउंदंत्विसादिमंत्रपंचकंपुनरपिवारद्वयंपठेत्। ॐ आयुषंजमदग्नेः
कश्यपश्यत्र्यायुषंमगस्त्यस्यत्र्यायुषंयदेचानांत्र्यायुषंतत्रोअस्तुत्र्यायुषं। इतिचूडाकरणंसावित्रीहृतिमं
त्रपाठः॥ इत्युपनयनं। ॐ अग्नेव्रतपतेव्रतंचारिष्यामितत्तेप्रवीमितछकेयंतेनध्यासमिदमहमनृतात्सत्यमु
पैमिस्वाहा। ॐ वायोव्रतपतेः। सूर्यव्रतपतेः। चंद्रव्रतपतेः। व्रतानांव्रतपतेः। अग्नेव्रतपतेव्रतमचारिषंतत्ते
प्रव्रवीमितदशकंतेनारात्समिदमहमनृतात्ससमुपागंस्वाहा। वायोव्रतपते। सूर्यव्रतपते। सूर्यव्रतपते। चंद्र

व्रतपते। व्रतानां व्रतपतेति वेदचतुष्टयं। ॐ येऽन्वंतरेग्नयः प्रविष्टागोह्यउपगोह्योमरौकोमनोहाः खलोविर
जस्तनूषिरिंहा अतितान्सृजामि। ॐ पद्यांघोरंपद्रूपांक्रूरंपदयामतितत्सृजामि। ॐ घोरोचनस्तमिहग्रह्णामिते
न्माहंमाममभिषिंचामि। ॐ पत्रासेतेजतसोहब्रलयर्चसाबलायेंद्रियायचीर्यायाचाघापरांयस्पोषायत्विषाऽप
विसै। ॐ येनस्त्रियमकृतं। येनांपाममृज्ञातसुरांम्योनाक्षामभ्यंषिंचंतंयेनमापृथिवीमह्री। यद्वर्दस्त्रिनायज्ञास्ते
नमामभिषिंचेतं। एतेषंचसमावर्त्तने। ॐ गृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः। भगोअर्यमा
सविताप्रुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः। ॐ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यः सुमनाःसुवर्चाः। वीरसूर्देवका
मास्योनानान्नोभवद्विपदेशंचतुष्पदे। आ नः प्रजांजनयतुप्रजापतिराजरसायसमनक्त्वर्यमा। अदुर्मंगलीः पतिलो
कमाविश। शन्नोभवद्विपदेशंचतुष्पदे। इमांत्वमिंद्रमीढ्वः सुपुत्रांसुभगांकृधि। दशास्यांपुत्रानाधेहिपतिमेका
दशंकुरु। संप्राज्ञीश्वशुरेभवसंम्राज्ञीश्वश्रुवांभव। ननांदरिसंम्राज्ञीभवसंप्राज्ञीअदितेवृषु। ॐ ममव्रतेहृदयंद

(122)

धातु। ममचित्तमनुचित्तंतेअस्तु। ममवाचमेकव्रतोजुषस्वबृहस्पतिष्ट्वायुनक्तुमह्यं। इतिविवाहः। ॐ भूर्भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवस्वस्वाहा। ॐ देवकृतस्यैनसोवयजनमसिस्वाहा। पितृकृतस्यैनसोवयजनमसिस्वाहा। ॐ मनुष्यकृतस्यैनसोवयजनमसिस्वाहा। ॐ आत्मकृतस्यैनसोवयजनमसिस्वाहा। ॐ यद्दिवानक्तंचैनश्चकृमतस्यावयजनमसिस्वाहा। ॐ यत्स्वपंतश्चजाग्रतश्चैनश्चकृमतस्यावयजनमसिस्वाहा। ॐ यद्विद्वांसश्चाविद्वांसश्चैनश्चकृमतस्यावयजनमसिस्वाहा। ॐ एनसएनसोवयजनमसिस्वाहा। ॐ अग्नयेस्विष्टकृतेस्वाहा। इतिदेवयज्ञः। ॐ सर्वेभ्योदेवेभ्योनमः। ॐ सर्वेभ्योभूतेभ्योनमः। इतिभूतयज्ञः। पितृयज्ञस्वधेतिपितृयज्ञमंत्रः। अतिथिप्रजानुध्यानेसनकादिमनुष्येभ्योहंतेतिवामनुष्ययज्ञः। यथाशक्तिऋग्वीमांसादिमंत्रपाठोब्रह्मयज्ञः। इतिपंचमहायज्ञाः। अथअथर्ववेदिनां। अहंरुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः। अहंमित्रावरुणोभाविभर्म्यहमिंद्राग्नीः अहमश्विनोभा। अहंराष्ट्रीसंगमनीवसूनांचिकितुषीप्रथमायज्ञियानां। तांमादेवाव्यदधुःपुरुत्राभूरिस्था।

त्रांभूर्यावेशयंतः ॥ अहमेवस्वयमिदंवदामिजुष्टंदेवेभिरुतमानुषाणां। यंकामयेतंतमुग्रंकृणोमितं। ब्रह्माणंतमृ
षिंतंसुमेधांमयासो ॥ अन्नमत्तियोविपश्यतियःप्राणितियईंशृणोत्युक्तं। अमंतवोमांतउपक्षियंति श्रुधिश्रुतश्र
द्धिवंतेवदामि। अहंरुद्रायधनुरातनोमिब्रह्मद्विषेशरवेहंतवाउ। अहंजनायसमदंकृणोम्यहंद्यावापृथिवी ॥ आ
विवेश। अहंसोममाहनसंबिभर्म्यहंत्वष्टारमुतपूषणंभगं। अहंदधामिद्रविणंहविष्मतेसुप्राव्यायजमानायसुन्वते।
अहंसुवेपितरमस्यमूर्द्धन्ममयोनिरप्स्वंतःसमुद्रेततोवितिष्ठेभुवनानिविश्वतामूंद्यांवर्ष्मणोपस्पृशामि। अहमेववा
तइवप्रवाम्यारभमाणभुवनानिविश्वा। परोदिवापरपृथिव्यैतावतीमाहिनासंबभूव ॥ अष्टावेतेजातकर्ममंत्राः ॥ शि
वेनेत्वाद्यावापृथिवी असंतापे अभिश्रियौ। शंतेसूर्य्यआतपतुशंवातोवातुहृदेशिवा ॥ अभिक्षरंतुत्वापोदिव्याः
पयस्वतीः। शिवास्तेसंतोषधयउत्वाहार्षमधरस्याउत्तरांपृथिवीमभि। उद्वयंतमसस्परिरोहंतोनाकमुत्तमंदेवंदेव
त्रासूर्यमगन्मज्योतिरुत्तमं। एतेत्रयोनिष्क्रमणमंत्राः ॥ वौतेस्तांव्रीहियवावदनाद्यं सर्वत्रमविषंकृणोमि।

इत्यवपाशनमंत्राः। येनावपत्सविताक्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्मणा वपतेदमस्य गोमात
स्ववानयमस्तु प्रजावान्। इतिगोदानमंत्रः।। प्रणवव्याहृतिपूर्वकं सावित्र्यनुवचनमित्युपनयनमंत्रः।। अग्ने
नव्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मराध्यतां तन्मेसमृध्यतां तन्मेमाव्यनशन्न तनराध्यासं तंते प्रवीमि तदुपा
वाक्रोमि। वायो व्रतपते इत्यादि। सूर्य व्रतपते इत्यादि। चंद्र व्रतपते इत्यादि। आपो व्रते इत्यादि। तत्र इतिस्थाने। त
हूदत्र होमिविशेषः। देवा व्रतपते इत्यादि। विदा व्रतपते इत्यादि। व्रतानां व्रतपते इत्यादि। व्रतानां व्रतपते इत्यादि।
एतेऽष्टौ सावित्री व्रतवेदमेत्रः।। इहावत्सराय परिवत्सराय रुणुतावयहच्चमः। तेषां वयं सुमतौ यज्ञियानामपि
भद्रे सौमनसे स्याम। सानो देवा अहिर्बुध्नी सत्तो कानसहपूरुषान्। संवंतेनविष्यरघ्याव्रंनसंयमन्नमोदेवजने
भ्यः। नमोस्त्वसितापनमस्तिराश्विना जपेस्वजायचभवेन मोन नमोदेवेजनेभ्यः।। शान्तेहन्मिदृतादतः।। एण्टते ह
ताहन्। शस्तेजिह्वया जिकां शंवीस्तह। अस्मो। अग्ने व्रतपते व्रतमचारिषं तदशकं तत्समाप्तं तन्मेराद्धं तन्मे

समहंतन्मेमाव्यनश तेनराद्धोस्मितद्न्मब्रवीमितदुपाकरोमि। वायोव्रतपतइत्यादि। सूर्याव्रतपतइत्यादि। चं
द्रव्रतपतइत्यादि। आपोव्रतपतइत्यादि। तत्तइतिपदस्थानेतद्धृतिपदप्रक्षेपोविशेषः। देवाव्रतपतइत्यादि। वे
दाव्रतपतइत्यादि। व्रतानांव्रतपतइत्यादि। एतेसावित्रीवेदव्रतविसर्जनमंत्रा। ऋजंसायमयजामहेयाभ्यांक
र्माणिकुर्वते। एतेसदसिराजतोयज्ञंदेवेषुपच्छतः। ऋचंसामयदप्राक्षंहविरोजोहविर्जुर्बला। एतमातस्मामाहि
सीद्धदः पृष्टः शचीपते। एतावेवमंत्रौमिलितौपुनः पठनियौ। अनुमयेस्वाहा। एतेत्रयः समावर्त्तनमंत्राः। येना
ग्निरस्याभूम्याहस्तंजानाहदक्षिणं। तेगृह्णामितेहस्तंमाव्यथिष्ठमयासहप्रजयाचधनेनच। देवस्तेसविताहस्तं
गृह्णातुसोमोराजासुप्रजसंकृणोतु। अग्निःसुभगांजातवेदाः। पत्येपत्नीजरदष्टिंकृणोतु। गृह्णामितेसौभग
त्वायहस्तंमयापत्याजरदष्टिर्यथासः। भगोअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः। भगस्तेहस्तमग्र
हीत्सविताहस्तमग्रहीत्। पत्नीत्वमसिधर्मणाहंगृहपतिस्तव। ममेयमस्तुपोष्यामह्यंत्वादाद्बृहस्पतिः। मया

T24

पत्वा।प्रजावतीसजीवशारदःशतं।एतेपंचविवाहमंत्राः।ॐभूःस्वाहा।ॐभुवःस्वाहा।ॐस्वःस्वाहा।भूर्भुवःस्वःस्वाहा।
देवकृतस्यैनसोवयजनमसिस्वाहा।पितृकृतस्यैनसोवयजनमसिंस्वाहा।मनुष्यकृतस्यैनसोवयजनमसिस्वा
हा।आत्मकृतस्यैनसोवयजनमसिस्वाहा।अनाज्ञाताज्ञातस्यैनसोवयजनमसिस्वाहा।यद्वोदेवाश्चकृमजिह्व
यागुरुमनसोवाप्रयुतीदेवहेडनं।अरावायोनोअभिदुछुनायतेतस्मिंतदेनोवसवोनिधेतनःस्वाहा।यद्देवादे
वहेडनंदेवासश्चकृमावयं।आदित्यास्तस्मान्नोयूयमृतस्यर्तेनमुंचत।ऋतस्यर्तेनादित्यायजत्रामुंचतेहनश्चय
ज्ञयज्ञवाहसः।शिक्षंत्वोनोपशेकिम।मरुत्वतामजयजमानाः।स्नुचाज्यानिजुहत।आकामोविश्वेवोदेवा।शिक्षंतो
नोपशकिम।यद्दिवासोपदविहूंसएतासिवकृमावयं।यूयंनमस्तस्मान्मुंचतविश्वेदेवाःसजोषसः।यदिजाग्रद्यदि
स्वपन्नेनएनस्योकरं।भूतंमातस्माद्भव्यंचद्रुपदादिवमुंचतां।द्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव।पूतंपवि
त्रेणेवाज्यंविश्वेशुभन्तुमैनसः।अग्नयेस्वाहा।प्रजापतयेस्वाहा।अग्नयेस्विष्टकृतेस्वाहा।एतेकुनविंशतिर्विवाहमं

त्राः। ब्रह्मणे बलिं हरामि वषट् वैश्रवणा बलिं हरामि वषट्। विश्वेभ्यो देवेभ्यो बलिं हरामि वषट् सर्वेभ्यो देवेभ्यो ब
लिं हरामि वषट् एते वषट्कृत यज्ञमंत्राः पितृभ्यः स्वधा नम इति पितृयज्ञमंत्रः। सनकादिमनुष्येभ्यो हंते निमनुष्य
यज्ञमंत्रः। शन्नोदेवीरभिष्टय। आपो भवंतु पीतये। शंयोरभिस्रवंतु नः। इत्यादि यथाशक्ति मंत्रपाठो ब्रह्मयज्ञमं
त्राः। अथ यजमानः खड्गादिद्रव्यकं रत्नादिद्रव्यकं च संपूज्य जलेनाप्लाव्येदं यिष्टदेवतं तुभ्यमहं संप्रदद इति गुरवे
दत्वा कृतैतद्यूनप्रतिष्ठासिध्यर्थमग्निदैवतममुं सुवर्णं दक्षिणां संप्रददे इति तं दत्वा हिरण्यगर्भस्य पश्चिमतो जानिं ब
द्ध्वा तं प्रार्थयेत्। ॐ नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः। चराचरस्य जगतो गृहभूताय वै नमः। मात्राहं जनितः
पूर्वं मर्त्यधर्मा नरोत्तमः। त्वद्गर्भसंभवाद्देवदिव्यदेहो भवाम्यहमिति। अथ सर्वे शांतिकलशा चतुष्टयोदकेन पुन
र्यजमानं स्नापयेयुः। तत्र मंत्रो। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यो पूष्णो हस्ताभ्यां। अद्य जातस्य तेंगानि
अभिषेक्ष्यामहे वयं। दिव्येनानेन वपुषा चिरंजीव सुखी भव। ततो यजमान उत्तराभिमुखान् गुर्वृत्विग्जापकान्

१२४

रपालान्वरणक्रमेण संपूज्य सोपकरणं हिरण्यगर्भं वो दास्यामीत्युक्त्वा ददस्वेत्युक्ते वरणक्रमेणैव सर्वहस्तोपरि गुरोर्हस्तं कृत्वा हिरण्यगर्भौ परिजलं दत्वा कुशादीन्यादाय देशकालौ संकीर्त्य कामांतं संकल्प्य वदुक्षायामुत्तिरुद्रोणस्थं हेमपंकजगर्भस्थं तं मुक्तावलीसमीपेतं पद्मरागान्वितपिधानसहितं सुवर्णमयं हिरण्यगर्भं विष्णुदैवतं अमुकगोत्रेभ्योऽमुकामुकशर्मभ्यो गुर्वृत्विग्भ्यो युष्मभ्यमहं संप्रददे इति गुरुहस्ते जलं दद्यात्। सर्वे स्वस्तीति वदेयुः कामस्तुतिं च पठेयुः पुनः कुशादीन्यादाय प्रकृतस्य हिरण्यगर्भदानस्य प्रतिष्ठासिद्ध्यर्थं एतान्सुवर्णान्नग्निदैवतान्सुवर्णान्नग्निदैवतान् गुर्वृत्विग्भ्यो युष्मभ्यमहं दक्षिणां संप्रददे इति हिरण्यगर्भतृतीयांशं दशांशं वा दद्यात् यदा तु तुलापुरुषोक्तयामादीनां दक्षिणा तेन दानं तद्दातस्यैव संकल्पः। दक्षिणाप्रतिपादने च सर्वे पक्षाः तुलापुरुषवत् ज्ञेयाः दानोत्तरं यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरं पूजां विसर्जनं कृत्वा पादुकादिषट्कमेरूपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति॥ ॥मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः सा

हित्यामृतसागरः सुजनतावल्लीरसालद्रुमः। यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि हिरण्यग
र्भददतौ सत्प्रीतये पद्धतिः॥ ॥अथ ब्रह्मांडमहादानं॥ मात्स्ये॥ अथातः संप्रवक्ष्यामि ब्रह्मांडं विधिःपूर्वकं॥
यच्छ्रेष्ठं सर्वदानानां महापातकनाशनं। पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। ऋत्विङ्मंडपसंभारभूषणाच्छा
दनादिकं। लोकेशावाहनं तद्वदधिवासनकं तथा। कुर्याद्विंशपला — ईमासहस्राच्च शक्तितः। शकलद्वयसंयुक्तं
ब्रह्मांडं कांचनं बुधः। दिग्गजाष्टकसंयुक्तं षड्वेदांगसमन्वितं। लोकपालाष्टकोपेतं मध्यस्थितचतुर्मुखं। शिवाच्यु
तार्कशिखरं सुमालक्ष्मीसमन्वितं। वस्वादित्यमरुद्गर्भं महारत्नसमन्वितं। वितस्तेरंगुलशतं यावदायामविस्तरं।
कौशेयवस्त्रसंवीतं तिलद्रोणोपरिन्यसेत्। तथाष्टादश धान्यानि समंतात्परिकल्पयेत्। पूर्वेणानंतशयनं प्रद्युम्नं पू
र्वदक्षिणे। प्रकृतिं दक्षिणे पार्श्वे संकर्षणमतः परं। पश्चिमे चतुरो वेदाननिरुद्धमथापरं। अग्निमुत्तरतो हैमं वासु
देवमतः परं। समंतादुउपीठस्थानर्चयेत्कांचनान्बुधः। स्थापयेद्वस्त्रसंवीतान्पूर्णकुंभान्दशैव तु। दशैवधे

नवोधयाः सहेमांबरदो हृनाः । पादुकोपानहच्छत्रचामरासनदर्पणैः । भक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपनैः ।
होमाधिवासनांते च स्थापितो वेदपुंगवैः । इममुच्चारयेन्मंत्रं त्रिः कृत्वाथ प्रदक्षिणं । नमोस्तु विश्वेश्वर विश्वधाम
जगत्सवित्रे भगवन्नमस्ते । सप्ताधिलोकामरभूतलेशगर्भेण साद्धं वितराभिरक्षां । ये दुःखितास्ते सुखिनो भवंतु
प्रयंतु पानि चराचराणां । त्वद्दानशस्त्राहतपातकानां ब्रह्मांडदोषाः प्रलयं व्रजंतु । एवं प्रणम्यामरविश्वगर्भं
दद्याद्द्विजेभ्यो दशधा विभज्य भागद्वयं तच्च गुरोः प्रकल्प्य समं भजेच्छेषमतः क्रमेण । अल्पे च देये गुरुरेक एव कु
र्यादथैकाग्निविधानयुक्त्या । स एव संपूज्यतमोल्पवित्तैर्यथोक्तवस्त्राभरणादिकेन । इत्थं य एतदखिलं पुरुषो
त्कुर्याद्ब्रह्मांडदानमधिगम्य महद्विमाने । निर्धूतकल्मषविशुद्धतनुर्मुरारेरानंदकृत्समुपैति सहाप्सरोभिः ॥ सं
तारयेत्पितृपितामहपुत्रपौत्रबंधुप्रियातिथिकलत्रशताष्टकं सः । ब्रह्मांडदानशकलीकृतपातकौघमानंदये
च्च जननीकुलमप्यशेषं ॥ इति पठिगणाविवा य एतत्सुरभवनेषु गृहेषु धार्मिकाणां । मतिमपि च ददाति मोदते

साचमरपतेर्भवने सहाप्सरोभिः। अथान्तरस्ति। यद्यप्यत्र महापातकनाश एव फलमुक्तं तथाप्यंते वक्ष्यमाण
मेपि फलं ज्ञेयं। पुण्येत्यादि सार्धश्लोकेनाविरुद्धतुलापुरुषधर्मोतिदेशः क्रियते। अविरोधप्रदर्शनार्थमेव च के
षांचिदुक्तिः। कुर्यादिति पूर्वतः पश्चाच्च संबध्यते। पलसुवर्णाश्चत्वार इत्युक्तपलविंशतेरधिकं सहस्रपलपर्यंतं सु
वर्णस्य च ब्रह्मांडं कुर्यात्। दिग्गजाद्युपकरणसुवर्णमेतन्मध्य एव न भिन्नं। साकृतप्रतिमासुवर्णं तु भिन्नमि
ति केचित्। अन्ये तद्दिग्गजाद्युपकरणसुवर्णमपि भिन्नं। अये कांचनानीति पुनः कांचनश्रवणादित्याहुः। श
कलेति। शकलद्वयं संयुक्तं यस्मिन्नित्यर्थः। यद्वा शकलद्वयं च तत्संयुक्तं चेति समासः। यथा पुरुषस्यांडद्वयं सं
युक्तं तथा शकलद्वयं कृत्वा संयुक्तं कार्यमिति कश्चिन्न तत्। ब्रह्मांडमित्येकवचनबाधापत्तेः। कुं– छायेभवेद्या
दृक् प्रतीच्यां दिशि चंद्रमाः। उदेति शुक्लपक्षादौ चपुरंडस्य तादृशामिति ब्रह्मांडपुराणात्। अत एव दामोदरेण च
टकाघंडाकारं वर्तुलं ब्रह्मांडमित्युक्तं। अत एवांडद्वयात्मकत्वमपि सिध्यतीति तदर्थात्। शकलद्वयं चोपर्य

धोभावेनस्थापनीयं। अन्यथातन्मध्येब्रह्मस्थापनाप्रयोगात्। दिग्गजेत्यादि। ऐरावतः पुंडरीकोवामनः कुमुदों
जनः। पुष्पदंतः सार्वभौमः सुप्रतीकश्चदिग्गजाइत्युक्तं। दिग्गजाष्टकेनसंयुक्तंसलमेस्थापनीयमित्यर्थः। एतेषां
लोकपालानां। पंचप्राच्यादिक्रमेणब्रह्मांडाद्बहिरेवस्थापनमितिदामोदरः। शिक्षाकल्पोव्याकरणंनिरुक्तंज्योति
षंतथा। छंदश्चेतिषडंगानिवेदानांचैप्रचक्षत षडंगानि। तेषांचलक्षणं। मूर्तीनिब्रह्मणोलोकेसाक्षसूत्राणि
तानितु। द्विभुजानिशुभास्यानिवामेदधतिकुंडिका इतिकुंडिकाः कमंडलून्। एतासांवामेधारणोक्तेरक्षसूत्रा
णांदक्षिणेधारणं। वेदानांपश्चिमेस्थापनस्यवक्ष्यमाणत्वादंगानामपितत्रैवस्थापनमितिरूपनारायणः। लो
कपालादीनोलक्ष्मणातितुलायामुक्तानि। तत्रचेंद्रवाहनगजोगजाष्टकाद्भिन्नः। अग्न्यादीनांवाहनांतरोपदेशा
त्। लक्ष्मीलक्षणंतुपाशाक्षमालिकांभोजसृणिभिर्याम्यसौम्ययोः। पद्मासनस्थांकुर्वीतश्रियंत्रैलोक्यमा
तरं। गौरवर्णांसुरूपांचसर्वालंकारभूषितां। रौक्मपद्मकरव्यग्रांवरदांदक्षिणेनतु। इयंचाच्युतसन्निधौस्थाप

नीयानत्पत्नीत्वात्। वस्वादित्येति। वस्वादित्येति। वस्वादित्यमरुतां एकोनसप्ततिमूर्त्तयो गर्भे मध्ये यस्येत्यर्थः
।वसवो ष्टौ आपो ध्रुवश्च सोमश्च धरश्चैवानलो ऽनिलः। प्रत्यूषश्च प्रभासश्चेति निगमात्। एतल्लक्षणं प्रसन्नवद
नाः। सौम्या वरदाः शक्तिपाणयः। पद्मासनस्था द्विभुजा वसवो ष्टौ प्रकीर्त्तिताः। आदित्या द्वादश इंद्रो विष्णुर्भग
स्त्वष्टा वरुणों शो र्यमा रविः। पूषा मित्रो यमश्चैव पर्जन्यो द्वादशः स्मृत इति हरिवंशात एतल्लक्षणपद्मासनस्था द्वि
भुजाः पद्मगर्भांगकांतयः। करादिस्कंधपर्यंतनीलपंकजधारिणः। भ्रपः संस्थितं मेषादिराशयः प्रावृत्वांप्रिका
त्वनि मेषादीनां मूर्त्तयस्तत्तदाकाराः। धावत्कृष्णमृगे रूढा ध्वजधारिण ऊनपंचाशन्मरुतः। महारत्नानि पंचनव
वा हिरण्यगर्भदातउक्तानि। एतानि पश्चिमतः स्थाप्यानीति दामोदरः। समन्वितमिति समुपसर्गात्संलग्नतोक्ता।
वितस्तेरिति। सुवर्णो नु सरेणांगुलशतपर्यंतं तुल्यायामविस्तरो यस्येति शकलद्रूपस्य प्रसेकं विशेषणमिति दा
मोदरः। पितृचरणास्तु ब्रह्मांडविशेषणमित्याहुः। ब्रह्मांडो ऽप्युक्तायामविस्तारसमैव। वर्तुलत्वाभिधानादि

128

तिकेचित्। अन्येतूक्तताया नियमानभिधानात्कुंडादीनां दैर्घ्यस्यापि दर्शनादनियम इत्याहुः। कौशेयं कृमि
कोशोद्भवोतसरपट्टकूलादि। तच्चतद्वस्त्रं चेति कर्मधारयः। यद्वा कौशेयवस्त्रेणासंवीतमित्यर्थः। द्रोणलक्ष्
णमुक्तं हिरण्यगर्भे। अष्टादश धान्यानि मात्स्ये एवोक्तानि। एवं गोधूमधान्यानि तिलाः कंगुः कुलित्थकाः माषा
मुद्गा मसूराश्च कोद्रवाः श्यामसर्षपौ। गवेधुकाश्च नीवाराश्चाढक्यश्च कलायकाः। चणकाः श्चीनकाश्चैव धा
न्यान्यष्टादशैव तु इति पुराणांतरे सुप्रकारांतरेणोक्तान्यपि निग्राह्याणीति दामोदरः। एतानि च परिमाणानुपदेशा
द्यथेष्टं तुल्यपरिमाणानि ग्राह्याणि। पूर्वेणेत्यादि। पूर्वाद्यष्टदिक्षु गुरुनिर्मितपीठेषु अष्टावनंतशयनादीन्स्था
पयेदित्यर्थः। अनंतः शयनं यस्येति व्युत्पत्त्या शेषशायी विष्णुरुच्यते। तल्लक्षणं पीतवासाश्चतुर्बाहुः शंखचक्र
गदाधरः। योगनिद्रापरापरा चास्य सुप्तोनंततनूपरि। फणासहस्रान्वितोनंतः कार्यस्तस्योपरि प्रभुः। एवं दक्षिणे
प्रद्युम्नतल्लक्षणं। ऊर्ध्वे शंखमधश्चक्रं दक्षिणे वामतस्तथा। पद्ममूर्ध्वे गदां वाधः प्रद्युम्नोयं प्रकीर्त्तितः। दक्षिणे

प्रकृतिर्लक्ष्मीस्तल्लक्षणं। पात्राक्षमालिके स्याच्चक्रमधस्तात्। नैर्ऋत्यां संकर्षणस्तल्लक्षणं। ऊर्द्ध्वं शंखमधश्चैव गदां
दक्षिणहस्तके। वामेधश्चक्रमूर्द्ध्वं स्यात्पद्मं संकर्षणो मतः। पश्चिमे चतुरो वेदान् तल्लक्षणं। ऋग्वेदस्याक्षसूत्रं तु
यजुर्वेदस्य पंकजं। सामवेदस्य वीणा स्याद्वेणुर्दक्षिणतो न्यसेत्। अथर्ववेदस्य पुनः स्रुक्स्रुवौ कमलं करे। अत्र द
क्षिणे स्रुक्स्रुवौ वामे कमलमथर्ववेदस्य। वायव्यां अनिरुद्धं तल्लक्षणं। ऊर्द्ध्वं गदां तथाधश्चक्रं दक्षिणे वामके त
थः पद्ममूर्द्ध्वस्थिते शंखमनिरुद्धो न वेदयं। उत्तरस्यामग्निं। तल्लक्षणमुक्तं तुलादाने। ईशान्यां वासुदेवं तल्लक्षणं ऊ
र्द्ध्वं शंखमधश्चक्रं गदां दक्षिणहस्तके। वासुदेवस्य वामे धः पद्ममूर्द्ध्वं यथाक्रमं। एवं च प्रतिमाः। दिग्गजाः अष्टौ
वेदांगानि षट्। सवाहन लोकपाला अष्टौ। ब्रह्माद्याः षट्। सर्वेष्टौ। आदित्या द्वादश तदधिष्ठानं मेषाद्या द्वा
दश। मरुत एकोनपंचाशत्। अनंतशयनाद्या एकादश इति १२। हेमाद्रौ तु महारत्नसमन्वितमित्यस्य
स्थाने अनंतमिथुनान्वितमिति पठितं तत्र फणसमान्वितो नंतः पृथ्वी स्त्रीरूपधारिणी। अनंतलक्षणं

त्रेयं। स्थापयेदिति समंतादित्यनुषंगः। धेयाः स्थापनीया इत्यर्थः। एतासां स्थापनं मंडपाद्बहिरेव। सो कुर्या
त्। सहेमेति हेमशृंग्य इत्यर्थः। दोहनानि ताम्रमयानीति दामोदरः। पादुकेत्यादि। एतैः सह गावः स्थापनीया
इत्यर्थः। इदं च न प्रतिगवं भिन्नं। पादुका काष्ठस्य। भक्ष्यभोज्यान्नेति पुनरुक्तिर्नानाप्रकारार्थं शेषमिति भो
गा एकं ब्रह्मलिंगेभ्यो देयमित्यर्थः। एवं च द्वारपालादिभ्यो नादक्षिणेति ज्ञेयं। अयं च ब्रह्मांडदानस्य संप्रदानविशेष
विधिः। तुलापुरुषोक्तगुर्वृत्विग्भ्यात्र संप्रदानत्वविषयः। तेन तुलापुरुषोक्तदक्षिणाविभागपक्षोपि प्राप्नोतीति रूप
नारायणः। उपदेशेनातिदेशबाध इति तूक्तं पक्ष्यामः। स्वल्पेवेति। सहस्रस्य चतुर्थभागः स्वल्पमिति रूप
नारायणः। सुतरामल्पमिति श्रुतस्य षोडशो भाग इति दामोदरः। सहस्रपलपक्ष एवैकस्त्रिंशभागेनाल्प
त्वमित्यन्ये। एकाग्निविधाने पितुर्वैतुज्ञातेनेभ्यो भ्योपि दद्यादिति रूपनारायणः। अस्मिंश्च पक्षे न किंचि
छौरवीयो गुरुरिति दामोदरः। इंछमित्यादेरर्थः स्पष्टः। इति ब्रह्मांडमहादानविधिः। अथ प्रयोगः। यजमा

नोदेशकालौ संकीर्त्य मम लपातकनाम्नां महाविमानाधिराम पूर्वकवक्ष्णारः सहितनिर्धूतकल्मषविशुद्ध
तत्वाली मानंदरूद्धरारिपदोपगमपितृपितामहपुत्रपौत्रबंधुप्रियातिथिकलत्रज्ञातास्वकसंतारणब्रह्मलो
उहानशकलीकृतपातकौघाशेषजननीकुलानंदकामश्चो ब्रह्मांडमहादानं प्रतिपादयिष्ये इति संकल्प्य
मधुपर्कांतं तुलापुरुषवत्कृत्वा षोडशारे परितुष्पालि विकी पीतदुपरि द्रोणपरिमितास्तिलान्निधाय ब्र
ह्मांडशकलद्वयमध्ये एकं ब्रह्मांडशकलं तिलद्रोणोपरिस्थकौशेयोपरिस्थापयित्वा तन्मध्ये ब्रह्माणं वस्त्र
एकमेषादिराशिस्थद्वादशादित्यान्मगाधिरुद्रान्रूनपंचाशन्मरुतश्च स्थापयित्वोपरिद्वितीयब्रह्मांडश
कलेनापिदध्यात्। ततो ब्रह्मांडाद्बहिः पूर्वादिघष्टदिक्षु ऐरावतादि दिग्गजान् लोकपालांश्च प्रतीच्यां द्वे द्रोणानि
महारत्नपंचकं च स्थापयित्वाधःस्थितकौशेयेनोर्णांगसहितमावेष्ट्योतस्य समंताद्द्वादशधान्यानि स्था
पयेत्। अथ पूर्वादि अष्टदिक्षु गुडपीठेषु। अनंतशयनं प्रद्युम्नं प्रकृतिं संकर्षणं। चतुरो वेदान्। अनिरु

दं अग्निं वासुदेवं च संस्थाप्य ब्रह्मांडं दिग्गजाष्टकं । षडंगानि । लोकपालाष्टकं । चतुर्मुखं । उमासहितशिवं ल
क्ष्मीसहिताच्युतं । अर्कैवसून् । आदित्यान् । मरुतः । अनंतं तत्रापनादी अनंतं मों तन्नाममंत्रैः संपूज्य समंताद्रुद्राकुं
भान् स्थापयेत् । ततः समंतात् पादुकोपानह्छत्रचामरासनदर्पणभक्ष्यभोज्यान्नदीपेक्षुफलमाल्यानुलेपना
नि स्थापयेत् । मंडपाद्बहिश्च सोपस्करा दश धेनवः स्थाप्याः पूज्याश्च । ततो महावेदीयं हवेधोरुपरि वितानेव भीया
न् । अथ संध्योन्नं रात्रे कृत्ये प्रातश्च यजमानाभिषेकांते कृते यजमानो गृहीतपुष्पांजलिर्ब्रह्मांडं त्रिः प्रदक्षिणी
कृत्य प्रार्थयेत् । ॐ नमोस्तु विश्वेश्वर विश्वधामन् जगत्सवित्रे भगवन्नमस्ते । सप्ताब्धिलोकस्थल भूतलेश गभस्तिसा
द्वितरश्मिरक्षां । ये दुःखितास्ते सुखिनो भवंतु प्रयांतु याम्भिवराचरा लां । तद्दानशक्त्याहतपापकानां ब्रह्मांडउ
देयाः प्रलयं व्रजंतु । पुष्पांजलिना ब्रह्मांडं गंधाद्यैर्गुर्वीर्तैर्जनश्च संपूज्य तद्दत्तु ततः कुशादीन्यादाय देशकालौ संकी
र्त्य पर्वं विस्फलमुच्चार्य मंत्र ब्रह्मांडं तिलद्रोणोपरि स्थितं । दिग्गजाष्टकसंयुक्तं षडंगसमन्वितं लोकपालाष्टकोपेतम

ध्यस्थितं चतुर्मुखं शिवा। च्युतार्कशिखरसुमालक्ष्मीसमन्वितं वस्त्रादिस्यमरुक्मभेमहारत्नसमन्वितं कौशेयव
स्त्रसंवीतं गुडपीठस्थानं तत्शयनप्रद्युम्नप्रकृतिसंकर्षणचतुर्वैरानिरुद्धाग्निवासुदेवप्रतिमायुतं समुक्तोपकर
णसहितं विष्णुदैवत्तं सर्वपापापमगो ऽसमुच्चार्यगुर्वर्त्विग्भ्योहं संप्रददे इति सर्वहस्तोपरिस्थितगुरुहस्ते संक
ल्पयेत्। — ओमागद्ध्रुवं गुरवे मागास्कं ब्रह्मत्विग्भ्यो विभज्य दद्यात् यदा तु पथे छविभागपक्षस्तदाग्यामाग्निनागु
र्वत्विजः परितोष्य तेभ्योन्येभ्य स्वब्रह्मांडं विभज्य दद्यात्। ततः कृतस्य सोपकरणब्रह्मांडमहादानकर्मणः प्रति
ष्ठार्थं इमान् सुवर्णान् अग्निदैवतान् दक्षिणां संप्रददे इति ब्रह्मांडतृतीयांशं दशांशं वा दक्षिणां दद्यात् ग्रा
मादीनां वा दक्षिणात्वेन दानं ततो गुर्वर्त्विजः स्वस्वशाखीयं कामसूक्तिं पठेयुः। ततो यजमानः पुण्याहवाच
नमावाहितदेवतानामुत्तरपूजाविसर्जनं च कुमंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान् भो
जयेदिति मीमांसैकधुरंधरः श्रुतिस्मरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजानलमवल्लीरसालद्रुमः।

131

यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि विचार्य पद्धतिरियं ब्रह्मांडदाने धिया इति ब्रह्मांड
महादानप्रयोगः॥ अथ कल्पपादमहादानं॥ मात्स्ये॥ कल्पपादपदानाख्यमतः परमनुत्तमं। महादानं प्र
वक्ष्यामि महापातकनाशनं॥ पुण्यं दिनमथासाद्य तुलापुरुषदानवत्। पुण्याहवाचनं कुर्याल्लोकेशावाह
नं तथा॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं। कांचनं कारयेद्वृक्षं नानाफलसमन्वितं। नानाविहगव
स्त्राणि भूषणाच्छादनानि च। शक्तितस्त्रिपलादूर्द्ध्वमासहस्रात्प्रकल्पयेत्। अर्द्धतल्कप्तसुवर्णस्य कारये
त्कल्पपादपं गुडप्रस्थोपरिस्थं च सितवस्त्रयुगान्वितं। ब्रह्मविष्णुशिवोपेतं पंचशाखं सभास्करं। संता
नं पूर्वतस्तद्वत्तुरीयांशेन कल्पयेत्। कामदेवमधस्तात्तु सकलत्रं प्रकल्पयेत्। मंदारं दक्षिणे पार्श्वे श्रिया
सार्द्धं घृतोपरि पश्चिमे पारिभद्रं च सावित्र्या सह जीरके। सुरभीसहितं तद्वत्तिलेषु हरिचंदनं। तुरीयांशेन
कुर्वीत सौम्येन फलसंयुतं। कौशेयवस्त्रसंवीतान्निक्षुमाल्यफलान्वितान्। तथाष्टौ पूर्णकलशान्पादु

कासनभाजनं। दीपकोपा—हच्छत्रचामरासनसंयुतं। फलमाल्यायुतं तद्वदुपरिच्छादितानकं। तथाष्टाद
शधान्यानि संमतात्परिकल्पयेत्। होमाधिवासनांते स्नापितो वेदपुंगवैः। त्रिः प्रदक्षिणमावृत्य मंत्रम
तमुदीरयेत्। नमस्ते कल्पवृक्षाय चिंतितार्थप्रदायिने। विश्वंभराय देवाय नमस्ते विश्वमूर्त्तये। यस्मा
त्वमेव विश्वात्मा ब्रह्मा स्थाणुर्दिवाकरः। मूर्त्तामूर्त्तं परं बीजमतः पाहि सनातन। त्वमेवामृतसर्वस्वमनंतः
पुरुषो—। संतानाद्यैरुपेतः सन् पाहि संसारसागरात्। एवमामंत्र्य तं दद्याद्गुरवे कल्पपादपं। चतुर्भ्यश्चा
प्यृत्विग्भ्यः संतानादीन्प्रकल्पयेत्। स्वल्पे त्वेकाग्निवत्कुर्याद्गुरोरेवाभिपूजनं। न वित्तशाठ्यं कुर्वीत न च वि
स्मयवान्भवेत्। अनेन विधिना यस्तु महादानं निवेदयेत्। सर्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत्। अप्स
रोभिः परिवृतः सिद्धचारणकिन्नरैः। भूतान्भव्यांश्च मनुजान्स्तारयेद्रोमसम्मितान्। स्तूयमानो दिवः पृष्ठे
पुत्रपौत्रप्रपौत्रवान्। विमानेनार्कवर्णेन विष्णुलोकं स गच्छति। दिवि कल्पशतं तिष्ठेद्राजराजो भवेत्ततः।

नभायणवलोपेतोनारायणपरायणः॥नारायणकथाशक्तोनारायणपुरंव्रजेत्॥योवापठेत्सकलकल्पतरु
प्रदानंयोवाशृणोतिपुरुषोल्पधनःस्मरेद्वा।सोपीन्द्रलोकमधिगम्यमहाप्सरोभिर्म्मन्वंतरंवसतिपापविनिर्मु
क्तदेहः॥कांचनमिति। पंचसुजास्वभिप्रायेणैकवचनं। क्वचित्तुकांचनानिस्येचपाठः॥ चकारात्फलादिपंचाना
मपिकांचनमयत्वं। आच्छादनानिवृक्षस्यप्रकृतत्वात्छादयतेवृक्षोयैस्तानिपत्राणिफलशब्देनकामनाविषय
उच्यते। तेनफलानिस्त्रीपुरुषगोगजवाजिमणिभक्ष्याजाछागरत्नादिघटितपर्य्यंकबीजपूरफलाकाराणिप
अमानाभिलषितामिकार्याणीतिपृथ्वीचंद्रोदयादयः॥ अङ्गुदिति रूसंगृहीतं। प्रतिमादिकमतन्मध्ये। प्र
स्थःषोडशपलोग्राह्यइतिदामोदरः॥ तत्रपरिभाषायागुउप्रस्थस्यद्वात्रिंशत्पलिकत्वोक्तेः॥ व्रसेति। एताश्च
प्रतिमाश्चधस्तास्थापनीयाः॥रुद्धानांकांक्षायामग्नेतनस्याधस्त्वस्योपस्थितेः॥ एतल्लक्षणलक्ष्मानिपंच
शारत्नादिक्षुपध्येचासतानमिति। इतिःकल्पवृक्षस्यसर्थः॥ अवशिष्टाईश्वरीशेनमंदारादीनामपीद

मेवपरिमाणं।समंस्यादश्रुतत्वादितिन्यायात्। तद्धत्तेनपंचशराखत्वफलादिपंचकप्रयुक्तत्वसितनवस्त्रयु
गान्वितत्वगुडप्रस्थाधारत्वान्युक्तेतेमंदारादिक्षेत्रेतुआधारोपदेशात्वगुडस्यानिदेशः। अधस्तादिति।
संतानस्येतिशेषः। कामदेवप्रतिमयानैराकांक्ष्यात्तद्धत्वे तत्रफलादिप्रतिमाचतुष्टयस्यनातिदेशः। हेमाद्रौतु
कामदेवमित्यस्यपूर्वंपादात्कल्पवृक्षेमूलेकामदेवोविस्थापनीयः। संतानेचतद्धृदित्पविदेशात्प्रतिमा
पंचकमथतिदिश्यते। मंदारादिषुतुदेवतां तत्रास्त्रानान्नव्रलादिप्रतिमातिदेशइत्युक्तं। कामदेवलक्षणं
विष्णुधर्मोत्तरे। कामदेवस्तुकर्त्तव्योरूपेणाप्रतिमोभुवि। अष्टवाहुकर्त्तव्यः शंखपद्मविभूषणः। चापबा
णकरश्चैवमदांचितलोचनः। रतिः प्रीतिस्तथाशक्तिस्तथोज्वला। चतस्रस्तस्यकर्त्तव्याःपत्न्योरूपमनो
हराः। चत्वारश्चकरास्तस्यकार्याभार्यास्तनोपगाः। केतुश्चमकरः। कार्यः पंचवाणमुखोमहान्मिदारमि
ति इहापितद्धृदित्यनुषज्यते। श्रीलक्षणमुक्तंव्रतोऽदाने। एतोपरिमंदारधारणासंभवात्वात्रांतरे एतंधा

र्यै। पारिभद्रः। पारिजातः॥ सावित्रीलक्ष्मणमाह नारदः॥ पद्मासना च सा विंचीसाक्षस्त्रकमंडलुः॥ सुरभील
क्षणं ब्रह्मांडपुराणे। सचत्सारभी धेनुरागता प्रस्तुतस्तनी पंचापि वृक्षाः अश्वत्थनिंबार्कपारिभद्रबिल्ववृक्षा
काराः शिष्टाचारादितिमोदरः॥ कौशेयं पट्टवस्त्रं। तच्च चतुर्षैव। आद्यस्य वस्त्राम्नानादिति दामोदरः। एतस्य
साधारणत्वेनाम्नानात्तं चानामपि वस्त्रं कौशेये। तत्र वस्त्राणि मितानि कौत्रेयं तु केभद्रकल्पते प्रमाणाभावादि
तिनुयुक्तं। अन्नानभाजनं तं पक्वान्नपूरितं भोजनपात्रं। अष्टादश धान्यानि ब्रह्मांडेऽभिहितानि। एतानि द्रोणपरिमिता
नीति मदनरत्ने॥ प्रस्थस्योपरिस्थितत्वात्त सरिमितानीति तु युक्तं। मर्त्तं महदादि। अमर्त्तं प्रकृतिः॥ एवमिति। पं
चभ्यो दक्षिणाम्नानाद्धोतभ्य आचार्याय च दानमन्येभ्यः पारितोषिकी भिन्ना दक्षिणेति दामोदरः॥ चतुर्भ्य इत्य
स्य चतुःकुंडसंबंधिभ्य इति व्याख्यातात्रक्षं चतुष्टयस्याष्टभ्यो दानं द्वारपालादीनां च भिन्ना दक्षिणेति मदन
रत्ने। पंचभ्यो दक्षिणाम्नानात्तं चानामेव वसनं तदा च ब्रह्मत्वकार्यकर्तृत्वं होमकर्तृत्वं च चतुर्णामेवेति पित्र

चरणाः। अयं च दक्षिणाविभागः गुर्वीलिंग्या च संप्रदानत्वपक्षविषयः इति रूपनारायणादयः। उपदेशो नाति
देशबाध इति उपक्रं पश्यामः। स्वल्पेत्यादि ब्रह्मांडे व्याख्यातं॥ इति कल्पपादपमहादानविधिः अथ प्रयोगः
। यजमानो देशकालौ संकीर्त्य ॐ महापातकनाशसर्वपापविनिर्मुक्तात्मीयाश्वमेधफललाभवद्प्सरःसि
द्धचारणकिन्नरपरिवृतात्मकर्तृकस्वरोमसमितभूतभव्यस्वस्ववंश्यमनुजतारणपुरुषस्तपमानप्रचपौत्रव
शालकर्तृकार्कवर्णविमानकरणकविष्णुलोकगमनदिवधिकरणकल्पशतावस्थानतदुत्तरराजराजत्वभ
वननारायणवलोपेतनारायणपरायणनारायणकथासक्तात्मकर्तृकनारायणपुरव्रजनकामः श्वः
कल्पपादपमहादानं प्रतिपादयिष्ये इति संकल्प्य मधुपर्कान्तं तुलापुरुषवत्कृत्वा षोडशारोपरि पुष्पाणि
विकीर्य तत्र मध्ये गुडप्रस्थोपर्यश्वत्थाकारं सौवर्णं नानाफलविहगवस्त्रभूषणपल्लवयुतं सितवस्त्रयुगा
न्वितं कल्पवृक्षं तदधः पश्चिमाभिमुखा ब्रह्मविष्णुशिवभास्करप्रतिमाश्च संस्थाप्य तस्य पूर्वतः गुडप्र

स्थोपरिनिंबाकारं कल्पवृक्षं गंधयुतं संतानं तदधः कामदेवः प्रतिमां च स्थापयेत्। कल्पवृक्षात्पश्चिमे जीरकप्र
स्थोपरि पारिभद्राकारं कल्पवृक्षं गंधयुतं पारिभद्रं तदधः सावित्री प्रतिमा च स्थापयेत्। कल्पवृक्षोत्तरत
स्तिलप्रस्थोपरि बिल्ववृक्षाकारं कल्पवृक्षं गंधयुतं हरिचंदनं तदधः सुरभीप्रतिमां च स्थापयेत्। अर्द्धसुव
र्णेन सांगकल्पवृक्षः। चत्वारश्च सांगार्द्धसुवर्णेन कार्याः। ततो वृक्षान्प्रतिमाश्च नमीं तं तत्तन्नाममंत्रैः पूजये
त्। ततः सर्वानेकेन पट्टकूलेन वेष्टयेत्। एतेषां समंतात्सकलमाल्यवारिपूर्णकलशोष्टकपादुकासमदर्पभो
जनपात्रदीपिकोपानच्छत्रचामरासनादर्शाधान्यानि स्थापयेत्। ततो महावेदीग्रहवेद्योरुपरि वितानेव भी
यात्। अथ संध्योत्तरं रात्रिकृत्यं प्रातश्च यजमानाभिषेकं च कृते यजमानो गृहीतपुष्पांजलिर्वृक्षान्भक्तिः प्र
दक्षिणीकृत्य कल्पवृक्षं प्रार्थयेत्। ॐ नमस्ते कल्पवृक्षाय चिंतितार्थप्रदायिने। विश्वंभराय देवाय नमस्ते
विश्वमूर्तये। यस्मात्त्वमेव विश्वात्मा ब्रह्मस्थाणुर्दिवाकरः॥ मूर्तामूर्तपरं बीजमतः पाहि सनातनः॥ कुर्याद्

न्यादाय पूर्ववत्संकल्पमुच्चार्येमं गुडप्रस्थोपरिस्थं ब्रह्मविष्णुशिवभास्करप्रतिमासहितं सपरिकरकल्पवृक्षं कामदेवप्रतिमासहितगुडप्रस्थोपरिस्थसपरिकरसंतानसहितं श्रीप्रतिमासहितं घृतप्रस्थोपरिस्थसपरिकरं मंदारसहितं सावित्रीप्रतिमासहितजीरकप्रस्थोपरिस्थसपरिकरपारिभद्रसहितं सुरभीप्रतिमासहितं तिलप्रस्थोपरिस्थसपरिकरहरिचंदनसहितं समंततोवस्थापितेक्षुमाल्यफलवारिपूर्णकलशाष्टकपादुकासनभक्ष्यभोजनपात्रदीपिकोपानच्छत्रचामरासनादर्शधान्ययुतं वितानसहितं विष्णुदैवतं सर्वेषां नामगोत्रे समुच्चार्य गुर्वीर्त्विग्भ्योऽहं संप्रददे इति सर्वहस्तोपरिस्थितगुरुहस्तोपरि संकल्पयेत्। ततः कृतस्य सोपकरणकल्पपादपमहादानकर्मणः। प्रतिष्ठार्थमिमां सुवर्णानग्निदैवतां युष्मभ्यं दक्षिणां संप्रददे इति पंचवृक्षसुवर्णतृतीयांशं दद्यात्। यद्वा तुलोक्तग्रामादीनां दक्षिणात्वेन दानं तद्दातस्यैव संकल्पः। ततः कल्पवृक्षं गुरवे संतानादींश्च चतुर्भ्य ऋत्विग्भ्यः प्रतिपादयेत्। केचिदेतद्विभागं तुलापुरुषवदन्येभ्योपीच्छंति। ततो यजमानः पुण्या

ह्वाचनमावाहितदेवतातामुत्तरपूजां विसर्जनं च कृत्वा मंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्रा
ह्मणान् भोजयेदिति। मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसा
लद्रुमः। यो विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि सुपर्ववृक्षददतौ सन्नीतये पद्धतिः इति
कल्पपादपमहादानप्रयोगः अथ गोसहस्रमहादानं मात्स्ये। अथातः संप्रवक्ष्यामि महादानमनुत्तमं गो
सहस्रप्रदानाख्यं सर्वपापहरं शुभं। पुण्यं दिनमथासाद्य युगमन्वंतरादिकं। पयोव्रतस्त्रिरात्रं स्यादेकरात्र
मथापि वा। लोकेशावाहनं कुर्यात्तुलापुरुषदानवत्। पुण्याहवाचनं कुर्याद्धोमः कार्यस्तथैव च। ऋत्विङ्मंड
पसंभारभूषणाच्छादनादिकं। वृषं लक्षणसंयुक्तं वेदीमध्येधिवासयेत्। गोसहस्राद्विनिः कृष्य गवां दशकमे
व च। गोसहस्रं बहिः कुर्याद्वस्त्रमाल्यविभूषितं। सुवर्णशृंगाभरणं रूप्यपादसमन्वितं। अंतः प्रवेश्य दशकं
वस्त्रमाल्यैः प्रपूजयेत्। सुवर्णघंटिकायुक्तं ताम्रदोहनकान्वितं। सुवर्णतिलकोपेतं हेमपट्टैरलंकृतं। कौ

शेयवस्त्रसंवीतंमाल्यगंधसमन्वितं। हेमरत्नयुतैःशृंगैःश्चामरैरुपशोभितं।पादुकोपानहछन्नभाजनासत
संयुतं।गवांदशकमध्येस्यात्कांचनोनंदिकेश्वरः।कौशेयवस्त्रसंवीतोनानाभरणभूषितः।लवणद्रोणशिख
रेमाल्येक्षुफलसंयुतः।कुमीतलशनादूर्ध्वंसर्वमेतदशेषतः।शक्तितःफलसाहस्त्रत्रितयंयावदेवतु।गोशतेपि
दशांशेनसर्वमेतत्समाचरेत्।पुण्यंकालंसमासाद्यगीतमंगलनिस्वनैः।सर्वौषध्युदकस्नानस्नापितोवेदपुंग
वैः।इममुच्चारयेन्मंत्रंगृहीतकुसुमांजलिः।नमोवोविश्वमूर्त्तिभ्योविश्वमातृभ्यएवच।लोकाधिवासिनीभ्यश्च
रोहिणीभ्योनमोनमः।गवामंगेषुतिष्ठंतिभुवनान्येकविंशतिः।ब्रह्मादयस्तथादेवारोहिण्याद्यास्तुमातरः।गा
वोममाग्रतःसंतुगावःपृष्ठतएवच।गावःशिरसिमेनित्यंगवांमध्येवसाम्यहं।यस्मात्त्वंवृषरूपेणधर्म्मएव
सनातनः।अष्टमूर्त्तेरधिष्ठानमतःपाहिसनातन।इत्यामंत्र्यततोदद्याद्गुरवेनंदिकेश्वरं।सर्वोपकरणोपे
तंगोयुगंचविचक्षणः।ऋत्विग्भ्योधेनुमेकैकांदशकाद्धिनिवेदयेत्।गवांशतमथैकैकंतदर्द्धंवाथविंशतिं।

130

दत्त्वा पंचाथ तां दद्यादन्येभ्यस्तदनुज्ञया। नैका बहुभ्यो दातव्या यतो दोषकरी भवेत्। बह्वश्चैकस्य दातव्याः श्री
मदारोग्यवृद्धये॥ पयोव्रतः पुनस्तिष्ठेदेकाहं गोसहस्रदः। श्रावयेच्छृणुयाद्वापि महादानानुकीर्त्तनं। तद्दिनं ब्रह्म
चारी स्याद्यदिच्छेद्विपुलां श्रियं। अनेन विधिना यस्तु गोसहस्रप्रदो भवेत्। सर्वपापविनिर्मुक्तः सिद्धचारणसे
वितः। विमानेनार्कवर्णेन किंकिणीजालमालिना। सर्वेषां लोकपालानां लोके संपूज्यते सुरैः। प्रतिमन्वंतरं ति
ष्ठेत्पुत्रपौत्रसमन्वितः। सप्तलोकानतिक्रम्य ततः शिवपुरं व्रजेत्। शतमेकोत्तरं तद्वत्पितॄणां तारयेद्बुधः। मा
तामहानां तद्वच्च पुत्रपौत्रसमन्वितं। यावत्कल्पशतं तिष्ठेद्राजराजो भवेत्ततः। अश्वमेधशतं कुर्याच्छिवध्यान
परायणः। वैष्णवं योगमास्थाय ततो मुच्येत बंधनात्। पितरश्चाभिनंदंति गोसहस्रप्रदं सुतं। अपि स्यात्स कुले
स्माकं पुत्रो दौहित्र एव वा॥ गोसहस्रप्रदो भूत्वा नरकादुद्धरिष्यति। तस्य कर्म्मकरो वा स्यादपि दृष्टा तथैव च।
संसारसागरादस्माद्योस्मान्संतारयिष्यति। इति पठति य एतद्गोसहस्रप्रदानं सुरभुवनमुपेयात्संस्मरेद्वाथ

पश्येत्। अत्र — वतिमुद्दंवावाच्यमानेनिकामंमहत्तकलुषदेहः सोपियातीद्रलोकं। पयोव्रत इति। पय्येव्रतम
धिवासनोक्तेश्च। ननुपयोव्रतमुपवासवाचकमितिचेत्न्न अविरोधात् हेमाद्रौतु अधिवासनमंतर्भाव्य वप
योव्रतमुक्तं। वृषमितिलक्षणांतरस्याप्युक्तेर्मात्स्योक्तवृषोत्सर्गस्थलक्षणयुक्तमित्यर्थः। तच्चउत्तत्रतस्कंधककु
दमञ्जुलांगलकंबलं। महाकटिनटस्कंधेवैडूर्यमणिलोचने। प्रवालंशफशृंगंचसुदीर्घचलवालधिं। नवाष्टद
शसंख्यैर्वातीक्ष्णाग्रैर्दशनैः शुभैः। मल्लिकाक्षेश्चभोक्तव्योगृहेपिधनधान्यदः। प्रवालेइवारक्तेशफशृंगयस्ये
त्यर्थः। मल्लिकाक्षोरक्ताक्षः। गोसहस्रादिति अत्र दामोदरः। गवांदशकमित्यस्याधिवासयेदित्यनेनसंबंधा
त्तस्यचवेदिस्थापनरूपत्वादर्थाद्वेदिमंडपपरिमाणवृद्धिरितिव्याचख्यौ। अन्येतुनमंडपादिवृद्धिः। गवांदश
कमित्यस्यप्रपूजयेदित्यनेनान्वयादित्याहुः। गोपद्धेनुपरं। गोसहस्राद्विनिष्क्रम्यसवत्सदशकंगवामितिपुरा
णांतरात्। अग्रेधेनूनांविनियोगाच्च। इदंचगोदशकंसहस्राद्भिन्नंसहस्रस्याग्रेपुनः श्रवणात्। सुवर्णेत्यादि।

परिमाणाश्रवणादपरिमितमिति केचित्। हेमाद्रौ तु प्रत्येकं दशसौवर्णिके शृंगे खुराः पंचपल इत्युक्तं। पादुकेति।
इदं च प्रस्थैकमिति केचित्। एकमित्यन्ये। कांचनमिति कृतसुवर्णैकदेशेन नंदिकेश्वर इति। अयं च वृषाकारः
धर्मोपि वृषरूपेण नंदीनामगणाधिप इति मात्स्योक्तेरिति केचित्। अन्ये तु ऊर्ध्वस्त्रिनेत्रो द्विभुजः सौम्यास्यो नंदिके
श्वरः। वामे त्रिशूलधृग्दक्षेऽक्षमालासमन्वित इति हेमाद्र्युक्तेर्नराकृतिः कार्य इत्याहुः। प्रसंगाद्गोशतमप्याह गो
शतेपीति। दशांशेन गोसहस्रापेक्षया गवां सुवर्णस्य च दशांशेनेत्यर्थः। एको नरः शतं गावस्तत्रैकामध्ये सुवर्णं
दशपलाधिकपलशतत्रयावधि दद्यादिति गोसहस्रमिति शेषः। उपक्रमे गोसहस्रप्रदानाख्यमित्युक्तेः। नंदि
केश्वरमित्यस्य निवेदयेदित्यन्येनान्वयः। दशकात्सर्वासादितात्। तथा चामंत्रणानंतरं प्रत्यक्षवृषाद्युपकरणस
हितनंदिकेश्वरसहितगोसहस्रसंकल्पः। ततः सोपकरणनंदिकेश्वरस्य प्रत्यक्षवृषस्य गोदशकस्य च प्रतिप
त्तिरूपं यथोक्तसंप्रदानकं निवेदनं कार्यमिति समुदायार्थः। एतद्दर्शनादेव बहिःस्थितगोसहस्रेपि शतद्वयं गु

रवे एकैकं शतमृत्विग्भ्यः अथवा द्विशतं गुरवे पंचाशतं चाशदृत्विग्भ्यः अथवा चत्वारिंशद्गुरवे विंशतिं विंशतिमृ
त्विग्भ्यः अथवा दशगुरवे पंच पंचर्त्विग्भ्यः अतिशिष्टा जापकतद्भिन्नब्राह्मणदीनानाथेभ्य इति दामोदरः। तत्र।
सामान्यतो द्रव्यस्य धर्मेमानत्वाभावात् यथेच्छविभागपक्षेपि नस्वेच्छया विभागः बहुप्रकारोपदेशेन तद्बाधा
दिति भूपालः। अत्र च संकल्पभेदाभेदौ तुलापुरुषवद्द्रष्टव्यौ। पयोव्रतं दानदिने पुनः शाठ्यः पूर्वोक्तपयोव्रता
भिप्राय इति दिक्। इति गोसहस्रमहादानविधिः। अथ प्रयोगः यजमानोधिवासनदिनात्पूर्वमेकरात्रं त्रिरात्रं
वा कृतपयोव्रतोधिवासनदिने देशकालौ संकीर्त्य ॐ सर्वपापहरणसर्वपापविनिर्मुक्तः सिद्धचारणसेविताल
कर्मकसर्वलोकपाललोकाधिकरणक बहुसुरकर्तृक पूजनपुत्रपौत्रसमन्विता स्मीयसर्वलोकपाललोका
धिकरणकप्रतिमन्वंतरावस्थानार्कवर्णकिंकिणीजालमालिविमानकरणकसप्तलोकातिक्रमपूर्वकनदपा
दानकशिवपुरव्रजनपुत्रपौत्रसमन्वितैकोत्तरशतपुत्रपौत्रसमन्वितैकोत्तरमातामहशतैवंविधनारलाशि

(138)

वपुराधिकरणककल्पत्रातावस्थाननदुत्तरराजत्वभवनशिवध्यानपरायणात्मकल्किकाश्वमेधशतकरणक
वैक्षचयोगमाप्तितदुत्तरतद्धेतुकबंधमोक्षकामः श्रीगोसहस्रमहादानमहं प्रतिपादयिष्य इति संकल्प्य मधु
पर्कीतं तुलापुरुषवत्कृत्वा षोडशारोपरिपुष्पाणि विकीर्य वेदीमध्ये पूर्वोक्तलक्षणयुतं वत्स सवृषं पूजयित्वा
गोसहस्राधिकं चयेहं दत्वाकं वस्त्रयुग्ममाल्यसुवर्णघंटिकाताम्रदोहनसुवर्णतिलकसुवर्णपट्टिकाकौशेय
वस्त्ररत्नखचितहेमशृंगरत्नखचितदंडान्वितचामरयुतं वेद्यां तद्बहिर्मंडपमध्ये मंडपाद्बहिर्वा पूजयेत्। मं
डपाद्बहिश्च चतुर्दिक्षु गोसहस्रं प्रत्येकं वस्त्रयुग्ममाल्यसुवर्णशृंगरूप्यखुरं संस्थाप्य पूजयेत्। ततो वेद्यां पादुको
पानहच्छत्रभोजनभाजनपीठानि स्थापयेत्। ततो वेद्यां मध्ये द्रोणपरिमितलवणोपरि वृषाच्छातिवासोवर्णेनंदि
केश्वरं कौशेयवस्त्रहाराद्याभरणमाल्येक्षुफलसंयुतः। पूज्यः। ततो महावेदीग्रहवेद्योरुपरि वितानेवध्नीया
त्। अथ संध्योत्तरं रात्रिकृत्ये शतश्च यजमानाभिषेकांते कृत्ते यजमानः प्रत्यक्षं वृषं मंदिकेश्वरं धेनुरत्ना

कंबत्रिः प्रदक्षिणीकृत्य मंत्रं पठेत्। ॐ नमो वो विश्वमर्त्तिभ्यो विश्वमातृभ्य एव च। लोकाधिवासिनीभ्यश्च
रोहिणीभ्यो नमो नमः॥ गवामंगेषु तिष्ठंति भुवनान्येकविंशतिः॥ ब्रह्मादयस्तथा देवा रोहिण्याद्यास्तु मातरः
। गावो ममाग्रतः॥ संतु गावः पृष्ठत एव च। गावः शिरसि मे नित्यं गवां मध्ये वसाम्यहं। यस्मात्त्वं वृषरूपेण धर्म
एव सनातनः॥ अष्टमूर्त्तेरधिष्ठानमतः पाहि सनातन। अथ पुष्पांजलिना तं संपूज्य सोपस्करणगोसहस्र
यनम इति गोसहस्रं गुर्वृत्विजश्च पूजयित्वा तदनुज्ञातः कुशादीन्यादाय पूर्ववत्संकल्पमुच्चार्य प्रत्यक्षवृषसौव
र्णनंदिकेश्वरधेनुदशकसहितं गोसहस्रं सपरिकरं विष्णुदैवतं सर्वेषां नामगोत्रमुच्चार्य संप्रददे इति सर्व
हस्तो परिस्थितगुरुहस्ते संकल्पयेत्। ततः कृतगोसहस्रदानप्रतिष्ठार्थमिदं सुवर्णं गुर्वृत्विग्भ्यो दक्षिणां संप्र
ददे इति गोसहस्रतृतीयांशं शस्यदशांशस्य वा मूल्यभूतं सुवर्णं दद्यात्। ततस्ते गोपुच्छं गृहीत्वा कामः स्तुतिः प
ठनीया। ततो यजमानः प्रत्यक्षवृषसौवर्णनंदिकेश्वरधेनुदशकांतर्गतधेनुद्वयसहितं गोसहस्रांतर्गतरा

तद्वयंगुरवेप्रतिपादयामीतिप्रतिपादयेत्।ततोऋत्विग्भ्यःप्रत्येकंधेनुदशकादेकैकांधेनुंगोसहस्राच्चैकैकंशतं
प्रतिपादयेत्।यथेष्टविभागपक्षेतुग्रामादिनागुर्वृत्विजःपरितोष्यऋत्विग्भ्यःप्रत्येकंपंचाशद्विंशतिर्वागुरवेच
द्विगुणमवशिष्टंचान्येभ्यःप्रतिपादयेत्।ततोयजमानःपुण्याहवाचनमावाहितदेवतानामुत्तरपूजांविसर्जनेच
कृत्वामंडपोपकरणादिगुरवेप्रतिपाद्ययथाशक्तिब्राह्मणान्भोजयित्वागोसहस्रदानविधिंशृणुयात्।श्रीका
मेनदानदितेपिदुग्धमात्राहारःकार्यः।मीमांसैकधुरंधरःश्रुतिधरोन्यायेपिवागीश्वरःसाहित्यामृतसागरःसु
जननावल्लीरसालद्रुमः।यविद्वन्मणिशेखरोदिनकरःप्रासूतविश्वेश्वरंतेनाकारिगवांसहस्रददतोतुष्ट्यैस
तांपद्धतिः॥ ॥इतिगोसहस्रमहादानप्रयोगः अथहिरण्यकामधेनुमहादानं।मात्स्ये।अथातःशृणु
भूपालकामधेनुविधिंपरं।सर्वकामफलंनृणांमहापातकनाशनं।लोकेशावाहनंतद्वद्धोमःकार्योधिवास
नं।तुलापुरुषवत्कुर्यात्कुंडमंडपवेदिकाः।स्वल्पेत्वेकाग्निवत्कुर्यात्गुरुरेवसमाहितः।कांचनस्यातिशुद्धस्य

धेनुं वत्सं च कारयेत्। उत्तमा पलसाहस्रैस्तदर्द्धेन तु मध्यमा। कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता। शक्तित
स्त्रिपलादूर्ध्वमशक्तोपीह कारयेत्। वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितं। न्यसेदुपरि तां धेनुं महारत्नैर
लंकृतां। कुमाष्टकसमोपेतां नानाफलसमन्वितां। तथाष्टादशधान्यानि समंतात्परिकल्पयेत्। इक्षुदंडाष्टकं तद्व
न्नानाफलविभूषितं। भाजनं चासनं तद्वत्ताम्रदोहनकं तथा। कौशेयवस्त्रद्वयसंवृतांगीं दीपातपचामरला
भिरामां। सवाभरां कुंडलिनीं सघंटां गणित्रिकापादुकारौप्यपादागं। रत्नैश्च सर्वैः परितोभिजुष्टां हरिद्रयापुष्प
फलैरनेकैः। अंजाजिकुस्तुंबुरुशर्कराभिर्वितानकं चोपरि पंचवर्णं। स्नातस्ततो मंगलतूर्यघोषैः प्रदक्षिणीकु
त्यसपुष्पहस्तः। आवाहयेत्तां गुडधेनुमंत्रैर्द्विजाय दद्यादथ दर्भपाणिः। त्वं सर्वदेवगणमंदिरमंगभूता विश्वंभर
न्निपथगोदधिपर्वतानां। त्वद्दानशास्त्रशकलीकृतपातकौ-ः प्राप्तोस्मि निर्वृतिमतीव परां नमामि। लोकेपथेप्सि
तफलत्वविधायिनीं त्वामासाद्य कोहि भवदुःखमुपैति मर्त्यः। संसारदुःखशमनायपतस्व कामं तां कामधेनुमि

140

तिदेवगणा वदंति। आमंत्र्य रूपकुलशीलगुणान्विताय विप्रायपः कृतकधेनुमिमां प्रदद्यात्। प्राप्नोति धाम स पुरंदरदेवजुष्टं कल्पागमेः परिवृतः पदमिंदुमौलेः। सर्वैग्निश्रुतिस्मृतिक्लृप्तसर्वफलकं न च महादानांतरेषु प्रवृत्त्यापत्तिः। गंगास्नानज्योतिष्टोमादिवत्फले वैजात्यकल्पनात्। एकाग्निवदिति। तद्वत्। ब्रह्मांडदानोक्तपत्तिः। गंगास्नानज्योतिष्टोमादिवत्फले वैजात्यकल्पनात्। एकाग्निवदिति। तद्वत्। ब्रह्मांडदानोक्तरीत्या। धेनुवत्संचेति। वत्सनिर्माणं वं यावता सुवर्णेन धेनुः क्लृप्ते तच्चतुर्थांशेन गुडधेनौ तथा दर्शनात्। पलसाहस्रैरिति। अत्रयोवनामेति वत्सहस्रसमूहः साहस्रमिति नार्थः उत्तमा फलसाहस्रीनिपाठांतरेण विरोधापत्तेः। किंतु सहस्रमेव साहस्रं पलशतस्य च एवं निपात आर्षः। तथा च सहस्रपलैरित्यर्थ इति रूपनारायणादयः। वेद्यामिति षोडशारचक्रोपरि कृष्णाजिनं प्राक्ग्रीवमूर्ध्वलोमकमास्तीर्येत्यर्थः। चर्मोण्युपरि रोमाणि प्राक्ग्रीवाणि चेति कात्यायनोक्तेः। गुडप्रस्थो द्वात्रिंशत्पलिकः। धेनुमिति सवत्सामित्यर्थः। वत्सस्य स्थानांतराश्रवणात्। अत्र गोः

प्राङ्मुखीगुडधेनौतथादर्शनादितिदामोदरः॥ वयंतुसामान्यतोदृष्टस्याप्रमाणत्वात्सर्व्यसंमुखत्वविधानात्पूजकस्यप्राङ्मुखत्वाच्चप्रत्यङ्मुखीतियुक्तंपश्यामः॥ वत्सस्तस्तनाभिमुखः प्रत्यङ्मुखोवा॥ महारत्नान्युक्तानि हिरण्यगर्भे॥ समोपेतामिति॥ अष्टदिक्षुकुंभैः परिवृतां॥ अष्टादशधान्यान्युक्तानिव्रतखंडे॥ नानाफलेति॥ सूत्रादिताइक्षुफलानिबंधनीयानीतिभावः॥ कौशेयरूपवस्त्रद्वयेनेत्यर्थः॥ आभरणानिवक्ष्यमाणकुंडलादिभिन्नानिग्रैवेयकादीनि॥ आभरणानिकुंडलादीनिहैमानि॥ गणित्रिकापादकिंकिणी॥ अक्षमालावा॥ कर्णभूषणंवेतिदामोदरः॥ गणित्रिकादिभिर्युतपादामित्यर्थः॥ रसैरितिमधुरादिषड्रसयुतैर्भक्ष्यपदार्थैः॥ पुनःफलग्रहणंप्रकारानेकत्वसूचनाय॥ अजाजीजीरकं॥ कुस्तुंबुरुधान्यकं॥ हरिद्रादिभिः परितो॥ भिजुष्टाग्रमिसन्वयः॥ गुडधेनुमंत्राः प्रयोगेवक्ष्यंते॥ द्विजायदद्यादितिदानांगभूतमंत्रविशिष्टामंत्रणविधानार्थंवक्ष्यमाणदानानुवादः॥ आमंत्रणप्रार्थने॥ तथाचगुडधेनुमंत्रैरावाहनेत्वंसर्वदेवादिभिश्चप्रार्थ्यमितिफलितं॥

दामोदरस्तु सर्वैरामंत्रणमेवेत्याह। क्वचित्तु गुरुणोक्तमंत्रैरिति पाठः। विप्रायेति गुरव इत्यर्थः। इदं च गुर्वर्त्विङ्मा
त्रसंप्रदानत्वपक्ष एव गुरुमात्रसंप्रदानत्वविषयं। तेनर्त्विगादीनामधिवासनदक्षिणामात्रं। यदा तु यथेच्छ
विभागपक्षस्तदा ग्रामादिना गुर्वर्त्विजः परितोष्य गुर्वर्त्विग्भ्योऽन्येभ्यश्च यथाशक्ति दद्यादिति केचित्। अन्ये तु वि
प्राय इत्येकवचनस्य वाग्निपक्षपरमित्याहुः। इति हिरण्यकामधेनुमहादानविधिः। अथ प्रयोगः॥ यजमानो देश
कालौ संकीर्त्य ॐ सर्वकामफलमहापातकनाशपुरंदरदेवजुष्टकामप्राप्तिबहुकन्यापरिवृतस्त्रीयेंदुमौलि
पदप्राप्तिकामः श्वो हिरण्यकामधेनुमहादानं प्रतिपादयिष्ये इति संकल्प्य मधुपर्कांतं तुलापुरुषवत्कृत्वा षोड
शारोपरि पुष्पाणि विकीर्य तत्र प्राक्ग्रीवे ऊर्ध्वलोमके कृष्णाजिने प्रस्थपरिमितं गुडं संस्थाप्य तदुपरि शक्त्या
नुसारेण त्रिपलाधिकसहस्रपलपर्यंतसुवर्णेन नूपुरद्वयग्रैवेयककुंडलघंटापादकिंकिण्याद्याभरणयुक्तां
सवत्सां सुवर्णधेनुं निर्माय वज्रमौक्तिकमाणिक्यनीलमरकतैरलंकृतां कौशेयद्वयसंवृतां गोरोथपा चतुष्

यां संस्थाप्य तत्समं ताम्रकाछपादुकाताम्रदोहनचामरवारिपूर्णकुंभाष्टकाष्ठादशधान्यफलान्वितेक्षुदंडाकु
न्न नानाविधफलपुष्पभोजनपात्रपीठदीपिकाछत्रषड्रसवद्द्रव्याणि हरिद्राजीरकधान्याकत्राकैराश्च संस्थाप
येत्। वत्सश्च धेनुचतुर्थांशेन प्रत्यङ्मुखस्तनाभिमुखो वास्याथः। ततो महावेदीगृहवेद्योरुपरिविमाने वध्नी
यात्। ततः कामधेन्वे नम इति सवत्सां तां पूजयेत्। अथ संध्योत्तरं रात्रिकाले प्रातश्च यजमानाभिषेकांते य
जमानो गृहीतपुष्पांजलिः कामधेनुं त्रिः प्रदक्षिणीकृत्य गुडधेनुमंत्रैरावाहयेत्। ते च या लक्ष्मीः सर्वभूतानां
या च देवेष्ववस्थिता। धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु। देहस्था या च रुद्राणी शंकरस्य सदा प्रिया। धेनुरूपे
ण सा देवी मम पापं व्यपोहतु। विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः। चंद्रार्कशक्रशक्तिर्या धेनुरूपा
स्तु सा श्रिये। चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च। या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे। स्वधा या
पितृमुख्यानां स्वाहा यज्ञभुजां च या। सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छतु। ततः प्रा— येत्। त्वं सर्वदेवगणमं

गम्भ्रता विश्वेश्वरत्रिपथगादधिपर्वतानां। त्वद्दानजास्त्रवाकलीकृतपातकौघः प्राप्तोऽस्मि निर्वृतिमतीव परां न
मामि। लोके यथेप्सितफलानुविधायिनी त्वामासाद्य को हि भवदुःखमुपैति मर्त्यः॥ संसारदुःखशमनाय य
तस्व कामं त्वां कामधेनुमिति देवगणा वदंति। सर्वैः प्रार्थनमिति केचित्॥ ततः पुष्पांजलिना धेनुं गंधाद्यैर्गुर्वृत्विज
श्च संपूज्य तद्दत्तस्नानः कुशादीन्यादाय पूर्ववत्फलमुच्चार्येमां रूप्यांजिनपुच्छप्रस्थगतां सोपकरणसहितां
सवत्सां कामधेनुं विष्णुदैवतां गुरोर्नाम गोत्रे समुच्चार्य गुरवेऽहं संप्रददे इति गुरुमात्रहस्ते सर्वां कामधेनुं दद्यात्।
ऋत्विजां चाधिवासनदक्षिणामात्रं। यदा तु यथेष्टविभागः स्यात्तदा ग्रामादिना गुर्वृत्विजः परितोष्य तेभ्योऽन्येभ्यश्च
विभज्य हिरण्यकामधेनुं दद्यात्। ततः कृतस्य कामधेनुमहादानकर्मणः प्रतिष्ठार्थमिमां सुवर्णीं नन्दिदेव
तां तुभ्यमहं दक्षिणां संप्रददे इति कामधेनुसुवर्णात्तृतीयांशं दशांशं वा दद्यात्। ग्रामादीनां दक्षिणात्वेन
वा दानं। ततः कामधेनोः पुच्छं हस्ते गृहीत्वाचार्यः सर्वे — कामस्तुतिं पठेयुः॥ ततो यजमानः पुण्याहवाचनमा

वाहितदेवतानामुत्तरपूजांविसर्जनंचकृत्वामंडपोपकरणादिसर्वंगुरवेप्रतिपाद्ययथाशक्तिब्राह्मणान्भो
जयेदिति। मीमांसैकधुरंधरः श्रुतिधरोन्यायेपिवागीश्वरः साहित्सामृतसागरः सुजनतावल्लीरसालद्रुमः।
यंविद्वन्मणिशेखरोदिनकरः प्रास्तूतविश्वेश्वरंतेनाकारिहिरण्यधेनुददतोसत्प्रीतयेपद्धतिः॥ इतिहिरण्यका
मधेनुमहादानप्रयोगः॥ अथहिरण्याश्वमहादानंमात्स्ये। अथातः संप्रवक्ष्यामिहिरण्याश्वविधिंपरं। यस्य
प्रसादाद्भुवनमनंतंफलमश्नुते। पुण्यंतिथिमथासाद्यकृत्वाब्राह्मणवाचनं। लोकेशावाहनंकुर्यात्तुलापुरु
षदानवत्। ऋत्विङ्मंडपसंभारभूषणा। छादनादिकं। स्वल्पेचैकाग्निवत्कुर्याद्धेमवाजिमखंबुधः। स्थापयेद्वेदि
मध्येतुकृष्णाजिनतिलोपरि। कौशेयवस्त्रसंवीतंकारयेद्धेमवाजिनं। शक्तितस्त्रिपलादूर्ध्वमासहस्रप— द्बुधः
।पादुकोपानहच्छत्रचामरासनभाजनैः। पूर्णकुंभाष्टकोपेतंमाल्येक्षुफलसंयुतं। शय्यांसोपस्करांतद्वद्धेममार्तंड
संयुतां। ततः सर्वौषधिस्नानस्नापितोवेदपुंगवैः। इममुच्चारयेन्मंत्रंगृहीतकुसुमांजलिः॥ नमस्तेसदेवेशवेदा

193

हरणलंपटः। वाजिरूपेण मामस्मा सादिसंसारसागरात्। त्वमेव सप्तधा भूत्वा छंदोरूपेण भास्करं। यस्माद्ग्राम
यसे लोकाननतः पाहि सनातना एवमुच्चार्य गुरवे तमश्वं विनिवेदयेत्। सर्वं शय्यादिकं दत्वा भुंजीता तैलमेव च। पुरा
णश्रवणं तद्वत्कारयेद्भोजनादिकं। इमं हिरण्याश्वविधिं करोति यः पूज्यमानो द्विविदेवतेंद्रैः। विमुक्तपापः सपु
रं मुरारेः प्राप्नोति सिद्धैरभिपूज्यमानः॥ इतिपय एतद्वाजिमेधप्रदानं सकलुषप्रमुक्तः सोश्वमुक्तेन भूपः। कनक
मयविमानेनार्कलोकं प्रयाति। त्रिदशपतिसभूमिः पूज्यते योथ पश्येत् योवा शृणोति पुरुषोल्पधनः स्मरेद्वाहेमाश्व
दानमभिनंदयतीहलोके। सोपि प्रयाति हतकिल्बिषं शुद्धदेहः स्थानं पुरंदमाहेश्वरदेवजुष्टं। भुवनमिति भुवन
इति लोकलक्षणया कर्तपदमित्येके। पादत्रयस्य सामानाधिकरण्येनान्वयं कृत्वा यतो भुवनान्नच्यवते ताहशभु
वनरूपं फलं प्राप्नोतीत्यर्थ इति रामोदरः। कृष्णाजिनेति। प्राग्ग्रीवमुपरिलोमकं कृष्णाजिनं तदुपरि तिलान् त
दुपरीत्यर्थः। तिलपरिमाणं द्रोण इति मदरत्न दामोदरौ। एष्टिकमिति रत्नाकरः। पादुकाभिः सह पूर्णकुंभाष्टं

कोपेतमित्यन्वयः। हेमं वाजिनं कारयेत्तं च कौशेयवस्त्रसंवीतं पादुकादिभिः सह कृष्णाजिनतिलोपरि स्थापयो
दित्यर्थः। अष्टादश धान्यान्यप्यासाद्य पेटाग्रे तैर्वा विनियोगात्। सोपस्करमिति। पुष्पसंधानोत्तरच्छदं तं तूलादीपि
काः पादुकोपानह्छत्रचामरासनभाजनादीन्युपकरणानीति। दामोदरः। केचित्तु पादुकफलपुष्पकुंकुमकर्पूरचं
दनदर्पणकेशप्रसाधनादीन्युपकरणानीत्याहुः। इयं च शय्यासंयुतमित्यश्वविशेषण। इममिति। त्रिःप्रदक्षिणी
कृत्येति शेषः। गुरव इति। गुरुग्रहणं गुर्वृत्विग्भ्यां तत्संप्रदानत्वबाधेन गुरुमात्रे संप्रदानत्वबोधकं। तथा च ऋति
गादीनामुक्तगोदक्षिणाधिवासनदक्षिणात्वं। यदा तु पथछे विभागपक्षस्तदा ग्रामादिना गुर्वृत्विजः परितोष्य गुर्वृ
त्विग्भ्योन्येभ्यस्त्व हिरण्याश्वं विभज्य दद्यादिति केचित्। उपदेशे नातिदेश इति युक्तं पश्यामः। अन्ये तु गुरुग्रहण
मेकाग्निप्रक्षेपपरमित्याहुः॥ सर्वमिति गुरुभ्य इति शेषः। पुराणं एतद्दानीयं॥ इति हिरण्याश्वमहादानविधिः॥।
अथ प्रयोगः॥ यजमानो देशकालौ संकीर्त्य ॐ अनन्तफलभुवनप्राप्तिपापक्षयहेतुकशाश्वतभानुलोकाभिगम

154

नदिवधिकरणेवहुदेवतेंद्रसंस्तूयमानविमुक्तपापवहुसिद्धभिः पूजितात्मीयपुरारिपुरप्राप्तिकामः श्वो हिरण्याश्वमाहादानमहं प्रतिपादयिष्ये इति संकल्प्य मधुपर्कांतं तुलाउरूपवत्कृत्वा बोउद्वारोपरि उप्याणि विकीर्य तत्र प्राग्रीवे ऊर्ध्वलोमके कृष्णाजिने द्रोणपरितांतिलांनिधाय तदुपरि शक्त्यनुसारेण त्रिपलाधिकसहस्रपलपर्यंतं स्वर्णवल्पितं हेमवाजिनं श्वेतोरूपवस्त्रसंवीतं प्रत्यङ्मुखं संस्थाप्य सलंमेतां स्वर्णकुमाष्टकपादुकोपानछत्रंचामरासने भोजनपात्रमाल्येक्षुफलशाद्वाधान्यानि उपसंधानोत्तरच्छदतांबूलदीपिकापादुकोपानछत्रंचामरासनभाजनाद्युपकरणसहितामादित्यप्रतिमासहितां शय्यांच स्थापयेत्। ततो महावेदीग्रहवेद्योरुपरि विताने बध्नीयात्। अथ संध्योत्तंरा त्रिकल्ये प्रातश्च यजमानाभिषेकांते कृते यजमानो गृहीतपुष्पांजलिर्हेमवाजिनं त्रिः प्रदक्षिणीकृत्य तं प्रार्थयेत्। ॐ नमस्ते सर्वदेवेश वेदाहरणलंपट। वाजिरूपेण मामस्मात्पाहि संसारसागरात्। त्वमेव सप्तधाभूत्वा छंदोरूपेण भास्कर। यस्मद्भामयसे लोका ततः पाहि सनातन। ततः पुष्पांजलिना

हेमवाजिनं गंधाद्यैर्गुर्वर्त्विजश्च संपूज्य तदनुज्ञातः कुशादीन्यादाय पूर्ववत्फलमुच्चार्य रुक्माजिनस्थति
लद्रोणोपरिगतं कौशेयवस्त्रसंवीतं ससूर्यप्रतिमसोपस्करशय्यायुतं उक्तोपकरणसहितं हेमवाजिनं विष्णु
दैवतं गुरोर्नामगोत्रे समुच्चार्य गुरवेहं संप्रदद इति गुरुमात्रहस्ते सर्वं हेमवाजिनं संकल्पयेत्। ऋत्विग्भ्यो यथा
शक्तिगाः दद्यात्। यथेच्छ विभागपक्षे तु ग्रामादिना गुर्वर्त्विजः परितोष्य तेभ्योन्येभ्यश्च हेमवाजिनं विभज्य
दद्यात्। ततः कृतस्य हेमवाजिमहादानकर्मणः प्रतिष्ठार्थमिमां सुवर्णामग्निदैवतां तुभ्यमहं दक्षिणां
संप्रदद इति हेमवाजिसवर्णतृतीयांशं दशांशं वा दद्यात् ग्रामादीनां वा दक्षिणात्वेन दानं। ततो ऋत्विजः काम
सूक्तं पठेयुः। ततो यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरपूजां विसर्जने च कृत्वा मंडपोपकरणा
दि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति। मीमांसैकधुरंधरः श्रुतो धरो न्यायेपि वागीश्वरः
साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः। यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं। तेनाका

145

रि हिरण्यवाजिदद्तौ सत्प्रीतयेपद्धतिः इतिहिरण्याश्वमहादानप्रयोगः अथहिरण्याश्वरथमहादा
नंमात्स्ये। अथातःसंप्रवक्ष्यामिमहादानमनुत्तमं। पुण्यमश्वरथंनाममहापातकनाशनं। पुण्यंदिनमथा
साद्य कृत्वाब्राह्मणवाचनं। लोकेशावाहनंकुर्यात्तुलापुरुषदानवत्। ऋत्विङ्मंडपसंभारभूषणाच्छादनादि
कं। कृष्णाजिनेतिलान्कृत्वाकांचनंकारयेद्रथं। सप्ताश्वंचतुरश्वंवाचतुश्चक्रंसकूबरं। ऐंद्रनीलेनकुंभेनध्व
जरूपेणसंयुतं। लोकपालाष्टकोपेतंपद्मरागदलान्वितं। चत्वारःपूर्णकलशाधान्यान्यष्टादशैवतु। कौशेयव
स्त्रसंयुक्तमुपरिष्टाद्वितानकं। माल्येक्षुफलसंयुक्तंपुरुषेणसमन्वितं। छत्रचामरकौशेयवस्त्रोपानहपा
दुकाः। गोभिर्विभवतः सार्द्धं दद्याच्छयनासनं। त्र्याभावात्रिपलादूर्ध्वंशक्तितः कारयेद्बुधः अश्वाष्टकेन
संयुक्तंचतुर्भिरथवाजिभिः द्वाभ्यामथयुतंदद्याद्धेमसिंहध्वजान्वितं। चक्ररक्षावुभौतस्यतुरगस्थौवथाश्विनौ।
पुण्यंकालंततः प्राप्यपूर्ववत्स्नापितोद्विजैः। शुक्लमाल्यांवरोदद्यादिमंमंत्रमुदीरयन्। नमोनमःपापविना

र्ग्नायविश्वात्मनेवेदतुरंगमाय। धाम्नामधीशप्रभवभवायपापौघदावानलदेह्शान्तिं। यस्त्वष्टकादिस्य
मरुद्गणानांत्वमेवधातापरमंनिधानं। यतस्ततोमेहृदयंप्रयातुधर्म्मैकतानत्वमघौघनाशनत्। इतितुरगरथप्र
दानमेवंभयभवसूदनमत्रयः करोति। सकलुषपटलैर्विमुक्तदेहः परममुपैतिपदंपिनाकपाणेः। देदीप्यमान
वपुषाविजितप्रभावमाक्रम्यमंडलमखंडमचंडभानोः। सिद्धांगनानयनषट्पदपीयमानवक्त्रांबुजोंबुजभवेन
चिरंसहास्ते। इतिपठतिशृणोतिवायएतत्कनकतुरंगरथप्रदानमेव। सननरकपुरंव्रजेत्कदाचिन्नरकारि
पोर्भवनंप्रयातिभूयः। तिलानिति। चक्रोपरिकृष्णाजिनंतदुपरिसर्षः। तिलातांगजरथदानोक्तो द्रोणपरिमाणश्र
वणात्द्रोणपरिमिताइतिदामोदरः। अनियमइतिरत्नाकरः सप्ताश्वंचतुरश्वंवेतिकांचनाश्वाभिप्रायेणआ
श्वाष्टकेनेतिचप्रलक्षाश्वाभिप्रायेणकांचनपदस्याश्वचक्रंकूबर। —शिष्टेएवरथेनन्यथात्। कूबरोयुगाधा
रंकाष्ठेंद्रेति। इंद्रनीलमणिखचितसुवर्णकुंभः। ध्वजेविकनकस्तंभोपरिस्थेंद्रनीलकुं—नमभिर्युतमिल

र्थः। लोकपालानां स्थानं ब्रह्मांड इव बहिरेव। दलः खंडः। चत्वार इति स्थाप्या इति शेषः। कौशेयेति। इदं रथवि
शेषणमेति केचित्। रत्नाकरस्तु। सामान्यातिदेशप्राप्तवितानके गुणविधिरयं न कौशेयवस्त्रप्रावृतमध्यं वि
तानकं कुर्यादित्यर्थ इत्याह। पुरुषेण हरिणा तुलापुरुषदाने पुरुषपदस्य हरौ शक्तिग्रहात् तल्लक्षणं चोक्तं। गोभिरि
ति विभवतः विभवात् यथाशक्ति गावः स्थापनीया इत्यर्थः। शयनं शय्या। आसनं पीठं भारः पलसहस्रद्वयं शत
द्वयं चेत्युक्तः। द्वाभ्यां वा त्रिभ्यां हेमेति तथा च एकहस्तोपरि कुंभः सिंहोपि स्थापनीय इत्यर्थः। वक्ररक्षौ चक्रसमी
पस्थावित्यर्थः। तयोर्लक्षणं। रूपोत्तमौ शूलधरौ युवानौ कांचनघूती पद्मासनस्थौ वरदौ कार्या विश्वकुमारकौ।
एतौ च समवाहनौ एतन्महादानीयसुवर्णघटितौ। अत्र च दाने तुलापुरुषवत्। अर्द्धं गुरवे॰ ईमृत्विग्भ्यो यथेच्छवि
भागो वा प्राप्नोति। इति हिरण्याश्वरथमहादानविधिः। अथ प्रयोगः। यजमानो देशकालौ संकीर्त्य। ॐ महा
पातकनाशनभवभयसूदनबहुकलुषपटलविमुक्तदेहाल्मीयपिनाकपाणिपरमपदोपगमदेदीप्यमानवपुर्विजि

तप्रभावाखंडाचंडभानुमंडलाक्रमानंतरसिंहगनानयनप्रदीप्यमानवक्त्रांबुजात्मीयोद्भवचिरसहाव
स्थानकामः श्वोहिरण्याश्वरथमहादानमहं प्रतिपादयिष्ये इति संकल्प्य मधुपर्कांतं तुलापुरुषवत्कृत्वा षोडशा
रोपरिपुष्पाणि विकीर्य तत्र प्राग्ग्रीवे ऊर्ध्वलोमके कृष्णाजिने द्रोणपरिमितांस्तिलान्निधाय तदुपरि शक्त्यनुसारेण
त्रिपलाधिकसहस्रपलपर्यंतसुवर्णनिर्मितं चतुरस्रं उपरिसर्वदिक्षु प्राकारसहितं चतुश्चक्रं अग्रे कूबरयुतं
मध्ये हरिप्रतिमायुतं ईषाग्रे सौवर्णयुगकाष्ठाधो योजितसप्तचतुरन्यतराश्वं इंद्रनीलखचितकुंभं हेमसिंहयुतध्व
जमध्ये अष्टदिक्षु हैमलोकपालाष्टकोपेतं पद्मरागान्वितं चक्रसमीपे तुरगारूढाश्विनीकुमारप्रतिमाद्वययुतं रथं स्था
पयेत् तत्समंतात् चतुरः पूर्णकुंभानष्टादशधान्यानि माल्येक्षुफलछत्रचामरकौशेयोपानहकाष्ठपादुकाय
था शक्तिसोपस्करागाः शय्यापीठं च स्थापयेत्। ततः प्रत्यक्षाश्वानष्टौ चतुरो द्वौ रथे वध्नीयात्। ततो महावेदी
ग्रहवेद्योरुपरि विताने वध्नीयात्। अथ संध्योत्तरं रात्रिकृत्ये प्रातः स्नायजमानाभिषेकांते यजमानो गृहीतपुष्पा

जलिर्हेमाश्वरथं त्रिः प्रदक्षिणीकृत्य प्रार्थयेत्। ॐ नमो नमः पापविनाशनाय विश्वात्मने वेदतुरंगमाय। धाम्नाम
धीशाय भवाभवाय पापौघदावानल देहि शांतिं। वस्वष्टकादित्यमरुद्गणानां त्वमेव धाता परमं निधानं। यतस्ततो
मे हृदयं प्रयातु धर्मैकतानत्वमघौघनाशात्। पुष्पांजलिना हिरण्याश्वरथं गंधाद्यैर्गुर्वृत्विजश्च संपूज्य तदनुज्ञा
तः कुशादीन्यादाय पूर्ववत्फलमुच्चार्य मंत्रिरुद्रोणोपरिस्थं सप्तचतुरन्यतमसुवर्णाश्वयुतं चतुरष्टद्व्यन्यतमचक्रा
क्षयुतं इंद्रनीलकुं— सिंहध्वजयुतं उक्तोपकरणसहितं चक्ररक्षतुरगवाहनाश्विनीकुमारद्वययुतं हिरण्या
श्वरथं विष्णुदैवतं सर्वेषां नामगोत्रे समुच्चार्य गुर्वृत्विग्भ्यो हं संप्रदद इति सर्वहस्तोपरिस्थितगुरुहस्ते संकल्पयेत्।
ततोऽर्धं गुरवेऽर्धमृत्विग्भ्यो दद्यात्। ग्रामादिना वा तान्परितोष्य यथेच्छं विभजेत्। ततः कृतस्य हेमाश्वरश्वरथदा
नकर्मणः प्रतिष्ठार्थमिमं सुवर्णमग्निदैवतं तुभ्यमहं दक्षिणां संप्रददे इति हेमाश्वरथसुवर्णतृतीयांशं दशांशं
वा दद्यात्। ग्रामादीनां वा दक्षिणात्वेन दानं। ततः सर्वे कामसूक्तिं पठेयुः। ततो यजमानः पुण्याहवाचनमावाहित

देवतानामुत्तरपूजां विसर्जनं च कृत्वा मंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान् भोजयेदिति
मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः यं विद्वन्मणि
शेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि हिरण्यवाजिरथके दाने धियापद्धतिः   इति हिरण्याश्वरथमहादा
नप्रयोगः   अथ हिरण्यगजरथदानं मात्स्ये । अथातः संप्रवक्ष्यामि हेमहस्तिरथं शुभं । यस्य प्रसादाद्भुवनं वैष्णवं
यातिमानवः ॥ पुण्यां तिथिमथासाद्य तुलापुरुषदानवत् ॥ ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं । अत्राप्युपोषित
स्तद्वद्ब्राह्मणैः सहभोजनं । कुर्यात्पुष्परथाकारं कांचनमणिमंडितं । वलभीभिर्विचित्राभिश्चतुश्चक्रसमन्वितं । लो
कपालाष्टकोपेतं ब्रह्मार्कशिवसंयुतं । मध्ये नारायणोपेतं लक्ष्मीपुष्टिसमन्वितं । कृष्णाजिने तिलद्रोणं कृत्वा सं
स्थापयेद्रथं । तथाष्टादश धान्यानि भाजनासनचंदनैः ॥ दीपिकोपानच्छत्रदर्पणं पादुकान्वितं । ध्वजेनु गरुडं कु
र्यात्कूवराग्रे विनायकं । ना — फलसमायुक्तमुपविष्टाद्वितानकं । कौशेयं पंचवर्णं च अम्लानकुसुमान्वितं । च

तुर्भिः कलशैः स्नाऊँगोभिर्नस्ताभिरन्वितं। चतुर्भिर्हैममातंगैर्मुक्तादामविभूषितैः। सुरूपतः करिभ्यांच घुरंक
त्वाग्निवेदयेत्। कुम्भीतं चपलादूर्ध्वमभावादपि शक्तितः। तथा मंगलशद्बेनस्नापितो वेदपुंगवैः। त्रिः प्रदक्षि
णमावृत्य गृहीतकुसुमांजलिः। इममुच्चारयेन्मंत्रं ब्राह्मणेभ्यो निवेदयेत्। नमो नमः। शंकरपद्मजार्कलोकेश
विद्याधलतासुदेवैः। त्वंसेव्यसवैदपुराणयज्ञतेजोमयस्यंदनपाहितस्मात्। यत्तत्सदंपरमगुह्यंतमंथरारेचानंदहे
उगुरूपापविमुक्तमेतः। योगैकमानसदृशोमुनयः समाधौपश्यंतितत्वमसितार्थरथेधिरूढः। यस्मात्वमे
व। वसागरसंप्लुतानामानंदभांडभृतमध्वरपानपात्रं। तस्मादघौघशमनेनकुरुप्रसादं चामीकरेनरथमा
धवसंप्रदानात्। इत्थं प्रणम्यकनकेभरथप्रदानेयः कारयेत्सकलपापविमुक्तदेहः। विद्याधरामरमुनींद्रगणा
भिजुष्टं प्राप्नोत्यसौपदमतींद्रियमिंदुमौलेः। कृतदुरितनिवित्तानप्रोज्वलद्वह्निजालव्यतिकरहतदेहोद्वेगभाजोपवं
धून्। नयतिचपितृपौत्रान्रौरवाद्वेषशेषान्। कृतगजरथदानः शाश्वतंपद्मविष्णोः तद्वत्। तुलापुरुषवत्।

ब्राह्मणैः सह पूर्वेद्युरुपोषितः। परेद्युर्भोजनं कुर्यादित्यर्थः। पुष्परथः। क्रीडारथः सचोपर्यैवाछादितोभव
तिनसमंतात्। मणिः पद्मरागादिः। वलभीछातेतिप्रसिद्धं। सुतमिति शेषः। लोकपालानांब्रह्मांड इव बहिःस्था
पनं। मध्य इति। ब्रह्मादिभिरपि संबध्यते। तल्लक्षणमुक्तं। नारायणलक्षणं नारदपंचरात्रे। नारायणे चतुर्बाहौ
शंखचक्रं सदोत्तरे। दक्षिणे तु गदां पद्मं नीलजीमूतसन्निभं। वामे श्रीर्वल्लकीहस्ता पुष्टिः पद्मकरा परे। अत्रउ
त्तरे वामे दक्षिणे एतयोर्हस्तइति शेषः। वामे श्रीरिति वामभागे नारायणस्य लक्ष्मीः दक्षिणभागे पुष्टिरित्यर्थः
। धान्मानि ब्रह्मांड उक्तानि। चंदनैरिति। सहार्थे तृतीया। गरुडलक्षणं। उपेंद्रस्याग्रतः पक्षी गुडाकेशः कृतांजलि।
सव्यजानुगतो भूमौ मूर्द्धि दीप्तफणिमंडितः। पक्षिजंघो नरांघ्रिश्च तुंगनासो नरांगकः। द्विबाहुः पक्षयुक्तश्च कर्त्त
व्यो विनतासुतः। गुडाकेशो वक्रकेशः। विनायकं कूबराग्रे कीलितं स्थापयेत्। वर्तुले स्थापनासंभवात्। विना
यकलक्षणमुक्तं नानेति। रथविशेषणं वितानविशेषणं वा। अम्लानपुष्पं बाणवृक्षपुष्पमिति केचित्। स्व

रूपकरिलोदीनकालएवविनियोजनंनाधिवासनकालेऽभारउक्तः। निवेदयेदनुमंत्रणानंतरमितिविशेषः। अत्र
वार्द्धंगुरवेर्द्धमृत्विग्भ्योयथेष्ठविभागोवाद्रष्टव्यः इतिसुवर्णगजरथदानविधिः अथप्रयोगः। यजमानो
देशकालौसंकीर्त्यॐवैदमवंभुवनगमनसकलपापविमुक्तदेहात्मककर्तृकविद्याधरामरमुनींद्रगणाभिमु
खानींद्रियैंद्रमौलिपदप्राप्तिबहुबंधुसमस्तपितृपुत्रकलत्रान्वितविष्णुसद्मनयनकामःश्वोहेमहस्तिरथमहादा
नमहंप्रतिपादयिष्येइतिसंकल्प्यमधुपर्कांतंतुलापुरुषवत्कृत्वाषोडशारोपरिधान्यानिविकीर्यतत्रप्राग्ग्रीव
कुर्ध्वलोमकेकृष्णाजिनेद्रोणपरिमितांस्तिलान्निधायतदुपरिशक्त्यनुसारेणपंचपलाधिकपलसहस्रद्वय
पर्यंतसुवर्णघटितंक्रीडारथाकारपद्मरागादिमणिमंडितमनेकवलभीषुलोकपालाष्टकप्रतिमायुक्तंमध्ये
ब्रह्मार्कशिवप्रतिमायुतंवामदक्षिणभागस्थलक्ष्मीपुष्टप्रतिमानारायणप्रतिमायुतमीषाग्रकीलितविना
यकप्रतिमंगरुडप्रतिमायुतध्वजमिषाग्रयोजितमुक्तादामविभूषितसुवर्णमातंचतुष्टयंरथंसंस्थाप्यतत्स

मंतादशादशधान्यानि भोजनपात्रपीटचंदनदीपिकोपानहछत्रदर्पणपादुकापूर्णकलशचतुष्टयं महीगाः
श्च स्थापयेत्। रथोपरि कौशेयवस्त्रनिर्मितं नानाफलगुच्छं पंचवर्णवाणपुष्पान्वितं वितानं बध्नीयात्। तत्र
प्रत्यक्षहस्तिद्वयं दानकाले योजनीयं तदभावे तन्मूल्यद्रव्यं स्थापयेत्। तच्च पंचशतं रूप्यपलानीति हेमाद्रौ।
अत्रीति कार्षापणा इति मत्वा ध्याये हस्त्यभावे रथद्वयमिति केचित्। ततो महावेदीग्रहवेद्योरुपरि वितानेब
ध्नीयात्। अथ संध्योत्तरं रात्रिकृत्ये प्रातश्च यजमानाभिषेकांते कृते यजमानो गृहीतपुष्पांजलिर्हिरण्यगज
रथं त्रिः प्रदक्षिणीकृत्य प्रार्थयेत्। ॐ नमो नमः शंकरपद्मजार्कलोकेशविद्याधरवासुदेवैः। त्वं सेव्यसे देव
पुराणयज्ञ तेजोमय स्यंदन पाहि तस्मात्। यत्तत्पदं परमगुह्यतमं मुरारेरानंदहेतुगुणरूपविमुक्तमंतः। योगै
कमानसदृशो मुनयः समाधौ पश्यंति तत्त्वमसि नाथ रथेऽधिरूढः। यस्मात्त्वमेव भवसागरसंप्लुतानामानं
दभांडभृतमध्वरपानपात्रं तस्मादघौघशमनेन कुरु प्रसादं चामीकरेभरथ माधवसंप्रदानात्। पुष्पांजलि

150

नासुवर्णगजरथं गंधाद्यैर्गुर्वीर्त्विग्भ्यश्च संपूज्य तदनुज्ञातः कुत्रादीन्यादाय पूर्ववत्फलमुच्चार्यैमं मणिमंडितकु
वराग्रस्थितविनायकप्रतिमं गरुडध्वजं मध्यस्थितब्रह्मार्कशिवतारायणलक्ष्मीपुष्टिप्रतिमं सौवर्णचतुर्मातंगं
प्रत्यक्षादिमातंगं कौशेयपंचवर्णवितानकमुक्तोपकरणसहितं विष्णुदैवतं सर्वेषां नामगोत्रे समुच्चार्य गुर्वर्त्वि
ग्भ्योहं संप्रददइति सर्वहस्तोपरिस्थितगुरुहस्ते संकल्पयेत् ततो गुरुवे ऋत्विग्भ्यो दद्यात् ग्रामादीनां चाता
न्यरितोष्यपथेच्छं विभजेत् ततः कृतस्य हेमगजरथदानकर्मणः प्रतिष्ठार्थमिमान्सुवर्णान्युष्मभ्यं दक्षिणां सं
प्रददइति हेमगजरथसुवर्णतृतीयांशं दशांशं वा दद्यात् ग्रामादीनां वा दक्षिणात्वेन दानं ततः सर्वेकामस्त्विति प
ठेयुः । ततो यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरपूजां विसर्जनं च कृत्वा मंडपोपकरणादि सर्वं गु
रवे दत्तिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति   मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृ
तसागरः सुजनतावल्लीरसालद्रुमः । यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि हिरण्यहस्ति

रथके दाने धियापद्धतिः इति हिरण्यगजरथमहादानप्रयोगः अथ पंचलांगलमहादानं मात्स्ये। अथातः संप्रवक्ष्यामि महादानमनुत्तमं। पंचलांगलकं नाम महापातकनाशनं। पुण्यां तिथिमथासाद्य युगादिग्रहणादिकं। भूमिदानं नरो दद्यात् पंचलांगलकान्वितं। खर्वटं खेटकं वापि ग्रामं वा सस्यशालिनं। निवर्त्तनशतं वापि तदर्द्धं वापि शक्तितः। सारदारुमयान् कृत्वा हलान् पंच विचक्षणः। सर्वोपकरणैर्युक्तान् अन्यान् पंच च कांचनान्। वृषान् लक्षणयुक्तांश्च दशैव च धुरंधरान्। सुवर्णशृंगाभरणान् मुक्तालांगूलभूषितान्। रूप्यपादाग्रनिष्कान् रक्तकौशेयभूषणान्। स्रग्दाम — — नयुतान् शालायामधिवासयेत्। पर्जन्यादित्यरुद्रेभ्यः पायसं निर्वपेत् चरुं। एकस्मिन्नेव कुंडे तु गुरुर्यस्मै निवेदयेत्। पलाशसमिधस्तद्वदाज्यं कृष्णतिलास्तथा। तुलापुरुषवत्कुर्यात् लोकेशावाहनं ततः। ततो मंगलशब्देन गृह्य रुक्ममालां वरो बुधः। आहूय द्विजदंपत्यं हेमसूत्रांगुलीयकैः। कौशेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत्। शय्यां सोपस्करां तद्वद्धेनुमेकां पयस्विनीं। तथाष्टादश धा

157

न्यानि समंतादधिवासयेत्। ततः प्रदक्षिणं कुर्य्याद्गृहीतकुसुमांजलिः। इममुच्चारयेन्मंत्रं मथ सर्वं निवेदयेत्।
यस्माद्देवगणाः सर्वे स्थावराणि चराणि च। धुरं धुरीणे तिष्ठंति तस्माद्भक्तिः शिवेस्तु मे। यस्मात्त्वं भूमिदानस्य
कलां नार्हंति षोडशीं। दानान्यन्यानि मे भक्तिर्द्धर्म्मे पंचदश भवेत्। सप्तहस्तेन दंडेन त्रिंशद्दंडा निवर्त्तनं। त्रिभाग
हीनं गोचर्म्ममानमाह प्रजापतिः। मानेनानेन यो दद्यात्त्रिवर्त्तनशतं बुधः। विधिनानेन तस्याशु क्षीयते पाप
संहतिः। तदर्द्धमपि यो दद्यादपि गोचर्म्ममात्रकं। भवनस्थानमात्रं वा सोपि पापैः प्रमुच्यते। यावंति लांगलक
मार्गमुखानि भूमेर्भासांपतेर्दुहितुरंगजरोमकानि। तावंति शंकरपुरे स समाहितिष्ठेत् भूमिप्रदानमिह यः
कुरुते मनुष्यः। गंधर्वकिंनरसुरसिद्धसंघैराधूतचामरमुपेत्य महद्विमाने। संपूज्यते पितृपितामहबंधुयु
क्तः। शंभोः पुरं व्रजति चाप्सरनायकः सन्। नेंद्रत्वमप्यधिमतं क्षयमभ्युपैति गोभूमिलांगलधुरंधरसंप्रदा
नात्। तस्मादघौघपटलक्षयकारि भूमेर्दानं विधेयमनिभूतिभवोद्भवाय। पंचलांगलकमिति। अत्र पंचलां

गलदानस्यप्रधानत्वावगत्तावपिभ्रमिदानंनरोदध्यातंचलांगलकान्वितमित्यत्रभ्रमिदानस्यापिप्रधान
भूत्वावगतेरनुमेचणमंत्रेचवृषभ्रमिदानयोः प्राधान्यावगतेः मानेनानेनयोदध्यादिसत्रभ्रमिदानस्यफलसं
बंधावगतेरूपसंहारेचभ्रवृषलांगलदानस्य प्राधान्यावगतेदीनत्रयस्यप्राधान्यंभ्रमिदा – मात्रेप्रधान
मितिदामोदरः।भूमेः परिमाणमाह खर्वटमिति। एतल्लक्षणमार्कंडेयपुराणे। सोत्सेधवप्रप्राकारं सर्वतः
स्वातकावृतं। योजनार्द्धार्द्धविष्कंभं अष्टभागायतंउरं। तदर्धेनतदाखर्वटं तस्माद्दीनंचखर्वटं। तथाशूद्रजन
प्रायास्तुसमृद्धकृषीवला। क्षेत्रोपभोगभूमध्ये वसतिर्ग्रामसंज्ञितेति। विष्कंभो विस्तारः। निवर्तनमानं स्वय
मेववक्ष्यति। सारेति। सारदारवस्थूलायामुक्ताः। उपकरणानीषादंडयुगकाष्ठयोक्त्रकीलकप्रतोदफालादीनि।
कांचनहलानां कांचनान्येवोपकरणानि। वृषान्प्रत्यक्षवृक्षान्। तल्लक्षणंगोसहस्रदानउक्तं। सुवर्णेति
।सुवर्णशृंगद्वयमाभरणंयेषामित्यर्थः। रौप्येति। रौप्यंपादाग्रेखुराः। तिलकंचयेषामित्यर्थः। शालायाद्

त्रिमिति मंडप इति दानसागरः। दामोदरस्तु प्रकृतित एव मंडपरूपशालायाः प्राप्तत्वात्पुनः शालाविधानवैय
र्थ्यापत्तेः मंडपभिन्नायां शालायामित्यर्थः इत्याह पर्जन्येति। पर्जन्यादीनां च मिलितानां देवतात्वमिति केचित्। प्रत्ये
कमिति दामोदरः। यस्मा इति यस्मै एकस्मै ऋत्विजे गुरुर्निवेदयति तेन स्वकुंडे होमः कार्य इत्यर्थः। होमश्चाष्टाविं
शतिसंख्ययेति दामोदरः। अयं च होमो लोकेशावाहनानंतरं ग्रहादिहोमस्य मध्ये कार्य इति केचित्। ततः शा
स्त्रश्रवणानंतरं पूर्वमित्यन्ये। दांपत्यं गुरुतत्पत्नीरूपं प्रधानत्वेनोपस्थितेः। दानार्थं गुरुपूजनमुक्त्वा तद्द्योप
स्थितेः पुनरधिवासनीयान्याह शय्यामिति। शय्योपस्कर इत्युक्तौ हेमवाजिदाने धेनुदानस्य च नप्राधान्यं समं
तासरिकल्पयेदित्यन्ये नान्यदानवं दगत्वाचागतेः। मंत्रमिति। श्लोकद्वयरूपमित्यर्थः। निवर्तनलक्षणमाह
संप्रेति। इदं च परिभाषायां व्याख्यातं। अत्र द्विजदांपत्यस्य दानार्थं पूजनीयत्वोक्तेस्तस्मा एव सर्वदाने ऋत्विगादी
नामधिवासनदक्षिणामात्रमिति दामोदरः। हेमवाजिदानवद्यथेष्टविभागोऽप्यस्तीति युक्तं पश्यामः। यावंतीति

भासांपतेः सूर्यस्य दुहिता गौः। भूर्वैस्त्रिवी सूर्यसुतास्त्वग्गावइति। संवर्त्तवचनात्। तस्याअंगजाः पुत्रा वृषभाः॥ इ
ति पंचलांगलमहादानविधिः अथ प्रयोगः॥ यजमानो देशकालौ संकीर्त्य अ महापातकनाशाय शीघ्रपापसं
हतिक्षयदानस्य भूमिलांगलमार्गेसुखमास्यतिदुःहित्रंगजरोमसमसंख्यवर्षावच्छिन्नशंकरपुरवस्थानगंधर्व
किन्नरसुरासुरसिद्धसंहाध्यत्वामचरमहाविमानोपगमपूर्वकसंपूज्यत्वपितृपितामहवंधुयुक्तामरनायका ः
लीयशंभुपुरगमनाक्षयेंद्रत्वातिभूतिभवोद्भवकामः श्वः पंचलांगलमहादानमहं प्रतिपादयिष्य इति संकल्प्य
मधुपर्कांतं तुलापुरुषवत्कृत्वा षोडशद्वारोपरि पुष्पाणि विकीर्य तत्र शाकेंगुदीचंदनदेवदारुश्रीपर्णीविल्वप्रिय
कांजनानाम्। अन्यतमकाष्ठघटितानि ईषादंडयुगकाष्ठयोक्त्रफालप्रतोदाद्युपकरणसहितानि तथा कांचनोपकर
णसहितानि पंच कांचनानि हलानि स्थापयेत्। तत्समंतात्तांबूलव्यजनोपसंधानदीपिकापादुकोपानहासनभोज
नपात्रकर्पूरादि सहितां शय्यां धेनुमष्टादशधान्यानि च स्थापयेत्। मंडपाद्बहिर्गोसहस्रदानोक्तलक्षणान् सौवर्ण

श्टंगान्रौ – पादान्मुक्तालांगूलभूषितान्रौथतिलकान्रक्तवस्त्रविभूषितान्दत्वावृषान्शृगलांतरेस्थापयेत्।
ततोमहावेदीग्रहवेघोरूपरिवितानेवध्रीयात्। ततोरात्रौवनस्पतिहोमोत्तरंयस्मैकृत्विजेगुरुराज्ञांप्रयच्छतिसस्वकुं
डेयजन्यादित्यरुद्रदैवतंपायसंश्रपयित्वातेनपलाशसमिद्भिराज्येनतिलैश्चस्वशाखीयतत्तद्देवताकैर्मंत्रैरष्टाविं
शतिसंख्ययाजुहुयात्। तदेवत्र्यमंत्रांश्चजपेत्। तेचपर्जन्यायप्रगायतेसस्याग्नेयः कुमारः पर्जन्योगायत्रीत्यांनुसांम
दोमत्स्योद्वद्वत्र्यादित्यागायत्री। कद्रुद्रायघोरः कएवोरुद्रोगायत्री एभिरेवमंत्रैः समित्तिलाज्यानिजुहुयात्। चतुर्वेदे
उशत्रोच्चातइतिपर्जन्यस्यायज्ञोदेवानामित्यादित्यस्य। इमारुद्रायेतिरुद्रस्य। सामवेदेतु। त्वष्टानोदैव्यइतिपर्जन्य
स्य। आदित्यैरिंद्रइत्यादित्यस्य। आवोराजानमितिरुद्रस्य। अथर्ववेदेतु। अभिक्रंदेतिपर्जन्यस्य। आदित्येभ्यो
मध्येदमित्यादित्यस्य। रुद्राजलाषइतिरुद्रस्य। अथप्रातर्यजमानाभिषेकांतेकृतेसपत्नीकंगुरुंहेमसूत्रांगु
लीयककौशेयकटकपद्मरागादिमाणिभिः संपूज्यगृहीतपुष्पांजलिर्लांगलादीनित्रिः प्रदक्षिणीकृत्यप्रा

र्थयेत्। यस्माद्देवगणाः सर्वे स्थावराणि चराणि च। धुरंधरांगे तिष्ठंति तस्माद्भक्तिः शिवेस्तु मे। यस्माच्च भूमिदानस्य कलां नार्हंति षोडशीं। दानान्यन्यानि मे भक्तिर्धर्म एव दृढो भवेत्। ततः पुष्पांजलिना भूम्यै नम इति वेद्यां भूमिं पंचलांगलादीनि च संपूज्य गुर्वर्त्विगनुज्ञातः कुशादीन्यादाय पूर्ववत्फलमुच्चार्येमां कांचनदारुमयपंचलांगलसोपस्करं दशधुरंधरग्राप्या धेनुसहितां निवर्तनशतावधिकां भूमिं सोपस्करां विष्णुदैवतां गुरोर्नामगोत्रे समुच्चार्य सपत्नीकाय तुभ्यमहं संप्रददे इति गुरुहस्ते संकल्पयेत्। यदा तु यथेष्टविभागपक्षस्तदा ग्रामादिना गुर्वर्त्विजः परितोष्य भूमिं लांगलानि च तेभ्योन्येभ्यश्च विभज्य दद्यात्। दश धुरंधर धेनुग्राप्याः गुरवे दद्यात्। ततः कृतस्य सोपस्करणपंचलांगलसहितभूमिदानस्य प्रतिष्ठार्थमेतासुवर्णानग्निदैवतान्तुभ्यं दक्षिणां संप्रददे इति दत्तभूमिं तत्तीयांशादन्नांशमल्पभूतं सुवर्णं दद्यात्। ग्रामादीनां वा दक्षिणात्वेन दाने। ततो गुरुः सर्वे वा कृमस्वस्तिं पठेयुः ततो यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरपूजाविसर्जने च कृत्वा मंडपोपकरणादि सर्वं

१५३

गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति। मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृ
तसागरः सुजनतावल्लीरसालद्रुमः। यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि दशार्द्धलांग
लयुते दाने धियापद्धतिः ॥ इति पंचलांगलमहादानप्रयोगः ॥ अथ धरामहादानं। मात्स्ये। अथातः संप्रवक्ष्या
मि धरादानमनुत्तमं। पापक्षयकरं नृणाममंगल्यविनाशनं। कारयेत्पृथिवीं हैमीं जंबूद्वीपानुकारिणीं। मर्यादा
पर्वतवतीं मध्ये मेरुसमन्वितां। लोकपालाष्टकोपेतां नववर्षसमन्वितां। नदीनदशतोपेतां सप्तसागरवेष्टितां।
महारत्नसमाकीर्णां वसुरुद्रार्कसंयुतां। हेम्नः पलसहस्रेण तदर्धेनाथ शक्तितः। शतत्रयेण वा कुर्याद्द्विशते
न शतेन वा। कुर्यात्पंचपलादूर्ध्वमशक्तोपि विचक्षणः। तुलापुरुषवत्कुर्याल्लोकेशावाहनं ततः। ऋत्विग्मंडप
संभारभूषणाच्छादनादिकं। वेद्यां कृष्णाजिने कृत्वा तिलानामुपरिन्यसेत्। तथाष्टादश धान्यानि रसांश्च लवणा
दिकान्। तथाष्टौ पूर्णकलशान्समंतात्परिकल्पयेत्। वितानकं च कौशेयं फलानि विविधानि च। तथांशुकानि र

न्याणि श्रीखंडशकलानि च। इत्येवं रचयित्वा तामधिवासनपूर्वकं। शुक्लमाल्यांबरधरः शुक्लाभर
णभूषितः प्रदक्षिणं ततः कृत्वा गृहीतकुसुमांजलिः। पुण्यंकालमथासाद्य मंत्रानेतानुदीरयेत्। नमस्ते
सर्वभूतानां त्वमेव भवनं यतः। धात्री च सर्वभूतानामतः पाहि वसुंधरे। वसुंधारयसे यस्माद्वसु चातीव नि
र्मलं। वसुंधरा ततो जाता तस्मात्पाहि भयादलं। चतुर्मुखोपि नो गच्छेत् यस्मादंतं नेवाचले। अनंताय नम
स्तस्मात्पाहि संसारकर्दमात्। त्वमेव लक्ष्मी गौरी विदे शिवे गौरीति संस्थिता। गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना
चंद्रे रवौ प्रभा। बुद्धिर्बृहस्पतौ ख्याता मेधा मुनिषु संस्थिता। विश्वं व्याप्य स्थिता। गायत्री ब्रह्मणः पार्श्वे ज्यो
त्स्ना चंद्रे रवौ प्रभा। बुद्धिर्बृहस्पतौ ख्याता मेधा मुनिषु संस्थिता। विश्वं व्याप्य स्थिता यस्मात्ततो विश्वंभरा मता।।
धृतिः स्थितिः क्षमा क्षोणी पृथ्वी वसुमती रसा। एताभिर्मूर्तिभिः पाहि देवि संसारसागरात्। एवमुच्चार्य तां
देवीं ब्राह्मणेभ्यो निवेदयेत्। धराद्वा चतुर्भागं गुरवे प्रतिपादयेत्। शेषं चैवाप्यक्रत्विग्भ्यः प्रणिपत्य विसर्जये

ता। अनेन विधायस्तु दद्याद्धेमधरां शुभां। पुण्यकालेतु संप्राप्ते स पदं याति वैष्णवं। विमानेनार्कवर्णेन किं
किणीजालमालिना। नारायणपुरं गत्वा कल्पत्रयमसौ वसेत्। पितृपौत्रप्रपौत्रांश्च तारयेदेकविंशतिं। इति
पठति य इत्थं संशृणोति प्रसंगादपि कलुषवितानैर्मुक्तदेहः समंतात्। दिवममरवधूभिर्यातिसंप्रार्थ्यमानः प
दममरसहस्रैः सेवितं चंद्रमौलेः। कारयेदिति। पृथिवी त्रिकोणेति दामोदरः वर्तुलेति रूपनारायणः। चतुर
स्रेति हेमाद्रिः। समस्तपृथिवीलक्षणस्य जंबूद्वीपलक्षणस्य वा कर्तुमशक्यत्वात् किंचिल्लक्षणकर्तव्यताप्रा
प्तौ नियममाह मर्यादेति। जंबूद्वीपस्य मर्यादापर्वता इत्यर्थः। ते च विष्णुपुराणे जाठरो देवकूटश्च मर्यादाप
र्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। गंधमादनकैलासौ पूर्वपश्चायतावुभौ। मेरोः पश्चिम
दिग्भागे यथा पूर्वं तथा संस्थितौ। निषिढुः परिभद्राश्च मर्यादापर्वतावुभौ त्रिशृंगो जारुधिश्चैव उत्तरे पर्वताव
भौ। पूर्वपश्चायतावेतावर्णवांतर्व्यवस्थिताविति। अतःशब्दस्य सन्निहितवचनत्वेन जावरादीनां भद्राश्वा

द्विवर्षमध्यएवसमुद्रसन्निधौ।निर्मीयामितिमदनरत्नः। वयंतर्णवांतर्व्यवस्थिताविति सर्वत्रसंबध्यते अतः
शाद्वीमध्यवावीतेनपूर्वादिदिगवस्थितसमुद्रमध्येएवजावरादीनांप्रथाकथं। विज्ञिमीणामिति वदामः म
ध्ये इति सोपस्करमेरुयुतामित्यर्थः। उपस्करो विष्णुपुराणे। मेरोःश्चतुर्दिशंतत्रनवर्वसाहस्रविस्तृतं। इलावृतं
महाभागचत्वारश्चात्रपर्वताः। विष्कंभारचितामेरोर्योजनायुतमुच्छ्रिताः। पूर्वेणमंदरोनामदक्षिणेगंधमाद
नः। वैभ्राजः पश्चिमेपार्श्वेसुपार्श्वश्चोत्तरेस्मृत इति। लोकेति। लोकपाललक्षणमुक्तंब्रह्मांडे। नवेति। व
र्षैर्वर्षछेदकपर्वतैश्चसमन्वितामित्यर्थः। वर्षाणि वर्षविच्छेदकपर्वताश्च विष्णुपुराणे। भारतंप्रथमंवर्षंत
तः किंपुरुषंस्मृतं। हरिवर्षंतथैवस्यान्मेरोर्दक्षिणतोद्विज। रम्यकंचोत्तरेवर्षंतथैवांतेहिरण्मयं। उत्तराःकु
रवश्चैवयथावैभारतंतथा। मेरोश्चतुर्दिशंतत्रनवसाहस्रविस्तृतं। इलावृतंमहाभागवर्षमाहुर्मनीषिणः।
तथाहिमवान्हेमकूटश्चनिषधश्चास्यदक्षिणे। नीलश्वेतश्चशृंगीचउत्तरेवर्षपर्वताः। माल्यवान्पूर्वतोमे

रोः पश्चिमे गंधमादन इति यत्तु दामोदरेणोक्तं मर्यादापर्वता इत्युक्तं तत्तुच्छं। वर्षपर्वताः॥ संज्ञत्वात्। नदीतिन
द्योगंगाद्याः नदाः शोणाद्यः॥ सप्तेति लवणेक्षुसुरासर्पिर्दधिक्षीरजलमयैः सप्तसमुद्रैः स्वस्वंतर्गतप्लक्षशाल्म
लिकुशक्रौंचशाकपुष्करैः षट्द्वीपैर्वृतामित्यर्थः॥ महारत्नान्युक्तानि हिरण्यगर्भे वस्वादिस्थानां लक्षणमुक्तं
ब्रह्मांडे। रुद्रलक्षणं पंचरात्रे। करे त्रिशूलिनो वामे दक्षिणे वा समालिनः॥ एकादशप्रकर्त्तव्या रुद्रास्त्र्य
क्षेंदुमौलिनः॥ ते च निर्ऋतिश्चैव सर्पश्च तृतीयो ह्यज एकपात्। मृगव्याधः पिनाकी च दहनोथेश्वरश्च वै। अहि
र्बुध्न्यश्च भगवान् कपाली चापराजितः॥ सेनानीश्च महोतेजा रुद्रा एकादशाः स्मृता। पृथिवीनिर्माणप्रकारश्च
प्रयोगे वक्ष्यते। तिलानामिति द्रोणपरिमितानामित्यर्थः॥ निवेदयेदिति। अत्र चार्द्धविभागस्य बाधापत्तेः॥
तथा चतुर्वर्गेऽप्यत्र संप्रदानत्वपक्षे नत्यक्षरूपं। प्रकृतितः प्राप्तयथेच्छविभागपक्षो वा द्रष्टव्यः॥ अथ प्रयोगः॥
तत्रादौ धरानिर्माणप्रकारः॥ पलपंचकादारभ्य सहस्रपलपर्यंतं यथाशक्ति सुवर्णेन वर्तुलं च – रस्रं वा पत्रं

कृत्वानस्यप्रांतेलवणादिसप्तसमुद्रप्लक्षादिषड्द्वीपान्निरंतरैश्चतुरस्रैर्विनिर्मीयतन्मध्येजंबूद्वीपंलक्षयोजनं
परिकल्प्यतन्मध्यस्थंप्राक्पश्चिमायनेदक्षिणोत्तरायनेवरेखाद्वयंशतधाविभज्यनाभितोष्टभिर्भागैःकृते
नवृत्तेनलाव — ड्वंउपरिभागेमूलभागद्विगुणविस्तृतेमेरुंपरिकल्प्यतत्सर्वादिदिक्षुनवभिर्भागैरिलावृतंकल्प
यित्वातन्मध्येमेरुतच्चतुर्दिक्षुमंदरगंधमादनविपुलसुपार्श्वाख्यमेवंविष्कंभभूतंपर्वतचतुष्टयमिलावृतात्तप
र्यंतंकल्पयित्वेलावृतात्तादक्षिणतोभागद्वयेनविस्तृतंपूर्वपश्चिमसमुद्रावधिलंबायमानंनिषधंपरिकल्प्य
येत्।ततोनिषेधाद्दक्षिणतोहरिवर्षरूपंभागतवकंपरिकल्प्यतद्दक्षिणतोभागद्वयेनविस्तृतंपूर्वपश्चिमसमु
द्रवद्धांतद्वयंहेमकूटपर्वतंपरिकल्पयेत्।एवंहेमकूटाद्दक्षिणतोकिंपुरुषवर्षरूपंभागनवकंपरिकल्प्यत
द्दक्षिणतोभागद्वयेनविस्तृतपूर्वपश्चिमसमुद्रसचद्धांतद्वयंहिमवंतंपरिकल्पयेत्।एवंतद्दक्षिणतोभागन
वकेनलवणोदपर्यंतंभारतवर्षंपरिकल्प्यसमुद्रसंनिधौसमुद्रमध्येवापूर्वपश्चिम – समुद्रावधिलंबायमान

कैलासपर्वतंतद्दक्षिणतः गंधमादनंचपरिकल्पयेत्। एवंमेरोरिलावृतसपादकभा गनवकाच्चोत्तरतोभाग
द्वयेनविस्तृतंपूर्वपश्चिमसमुद्रावधिलंबायमानंनीलंपर्वतंपरिकल्प्यतदुत्तरतोरम्यकवर्षरूपभागनवकंपरि
त्यज्यतदुत्तरतोभागद्वयेनविस्तृतंपूर्वपश्चिमसमुद्रावधिलंबायमानंश्वेतपर्वतंपरिकल्प्यतदुत्तरतोहिरण्म
यवर्षरूपभागनवकंपरित्यज्यतदुत्तरतोभागद्वयेनविस्तृतंपूर्वपश्चिमसमुद्रावधिलंबायमानंशृंगिणंप
रिकल्पयेत्। एवंतदुत्तरतोभागनवकेनसमुद्रपर्यंतमुत्तरकुरुसंज्ञंवर्षंपरिकल्प्यसमुद्रसन्निधौसमुद्रमा
ध्येवापूर्वपश्चिमसमुद्रावधिलंबायमानंत्रिशृंगंतदुत्तरनस्तथैवनारुधिपरिकल्पयेत्। एवंमेरोरिला
वृतसंपादकभागनवकाच्चपूर्वतोभागद्वयेनविस्तृतंनीलनिषधावधिलंबायमानंमाल्यवंतंपरिकल्प्य
येत्। तत्पूर्वंएकत्रिंशद्भिर्भागैः समुद्रपर्यंतंभद्राश्वंचवर्षपरिकल्प्यसमुद्रसन्निधौसमुद्रमध्येवानील
निषधावधिलंबायमानंजाठरंपरिकल्प्यतत्पूर्वतस्तथैवदेवकूटंपरिकल्पयेत्। एवंमेरोरिलावृतसंपा

दक्भागनवकाच्चपश्चिमतोभागद्वयेनविस्तृतंनीलनिषधावधिलंवायमानंगंधमादनंपरिकल्प
येत्। तत्पश्चिमतएकत्रिंशद्भिर्भागैः समुद्रपर्यंतंकेतुमालवर्षंपरिकल्प्यसमुद्रसन्निधौसमुद्रमध्ये
वानीलनिषधावधिलंबायमानंनिषधंपरिकल्प्यतत्पश्चिमतस्तथैवपारिभद्रंपारिकल्पयेत्। ततोप
थावकाशंगंगाद्यानद्यः शोणाद्योनदाश्चपरिकल्पनीया इति। यजमानोदेशकालौसंकीर्त्य ॐ पापक्षया
मंगल्यविनाशवैष्णवपदगमनार्कवलीकिंकिणीजालमालिविमानकरणनारायणपुरगमनानंतरकल्प
त्रयावच्छिन्नतदधिककैकंविंशतिपितृपौत्रप्रपौत्रतारयणकामः श्रीधरादानमहं प्रतिपादयिष्य इति
संकल्प्यमधुपर्कितंतुलापुरुषवत्कृतायोऽग्न्यारोपरिपुष्पाणिविकीर्यतत्रप्राकग्रीवऊर्ध्वलोमकेकृष्णा
जिनेद्रोणपरिमितांस्तिलान्विधायतत्रोक्तरूपांमेरोरुपरिधरार्धपरिकॢप्तसुवर्णनिर्मितलोकपालाष्ट
कवस्वष्टकैकादशरुद्रप्रतिमायुतांपद्मरागवज्रमौक्तिकमाणिक्यमरकतैरलंकृतांधरांसंस्थापयेत

(158)

त्समंतात्अष्टादशधान्यषड्रसवद्द्रव्यपूर्णकलशाश्चनानाविधवस्त्रफलचंदनखंडानिचस्थापयेत्। मह
वेदीग्रहवेद्योरुपरिवितानेवभीयात्। ततोधरांनाममंत्रेणपूजयेत्। अथसंध्योनरांत्रिकृत्वेप्रातस्थ्वंयजमा
नाभिषेकांतेकृतेयजमानोगृहीतपुष्पांजलिर्धरित्रिंप्रदक्षिणीकृत्यप्रार्थयेत्। ॐ नमस्तेसर्वभूतानांत्वमेव
भवनंयतः। धात्रीचसर्वभूतानामतःपाहिवसुंधरे। वसुधारयसेयस्माद्वसुवातीवनिर्मलं। वसुंधराततोजा
तातस्मात्पाहिभयादलं। चतुर्मुखोपिनोगच्छेद्यस्मादंतंतवाचले। अनंतायनमस्तस्मात्पाहिसंसारकर्दमात्।
त्वमेवलक्ष्मीर्गोविंदेशिवेगौरीतिसंस्थिता। गायत्रीब्रह्मणःपार्श्वेज्योत्स्नाचंद्रेरवौप्रभा। बुद्धिर्बृहस्पतौख्याता
मेधामुनिषुसंस्थिता। विश्वंव्याप्यस्थितायस्मात्ततोविश्वंभरामता। धृतिःस्थितिःक्षमाक्षोणीपृथ्वीवसुम
तीरसा। एताभिर्मूर्तिभिःपाहिदेविसंसारसागरात्। ततःपुष्पांजलिनाधरांगधाद्येर्गुर्वृत्विजश्चसंपूज्यतदनु
ज्ञातःकुशादीन्यादायपूर्ववत्फलमुच्चार्यमासौवर्णीजंबूद्वीपतुकीरिणीमर्यादापर्वतवतीमध्येमेरुसमन्वितालो

कपालाष्टकोपेतां नववर्षसमन्वितां तदीनदव्रातोपेतां सप्तसागरवेष्टितां महारत्नसमाकीर्णां वसुरुद्रार्कसंयुतां
सोपस्करां धरां विष्णुदैवतां सर्वेषांनामगोत्रेसमुच्चार्य गुर्वृत्विग्भ्यो ऽहं संप्रददे इति सर्वर्त्विग्भ्यस्तोपरिस्थितगुरुहस्ते
संकल्पयेत्। ततो धरार्धं तच्चतुर्थांशं वा गुरवेदं मंत्रं च यं वामृत्विग्भ्यो दद्यात्। यद्वा तु यथेष्टविभागपक्षस्त
दा ग्रामादिना गुर्वृत्विजः परितोष्य तेभ्यो ऽन्येभ्यश्च विभज्य यथेच्छं दद्यात्। ततः कृतस्य धरादानकर्मणः प्र
तिष्ठार्थमेतान्सुवर्णानिग्निदैवतान्गुर्वृत्विग्भ्यो ऽहं दक्षिणां संप्रददे इति धरासुवर्णत्रिंशांशं दशांशं वा दद्या
त्। ग्रामादीनां वा दक्षिणात्वेन दानं। ततः सर्वे कामस्तुतिं पठेयुः। ततो यजमानः पुण्याहवाचनमावाहितदेव
तानामुत्तरपूजां विसर्जनं च कृत्वा मंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति। मीमां
सैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः। यं विद्वन्मणिशेख
रो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि सुवर्णभूमिददतौ सत्प्रीतये पद्धतिः। इति सुवर्णधरामहादानप्रयोगः। अ

थविश्वचक्रमहादानं॥ मात्स्ये। अथातः संप्रवक्ष्यामि महादानमनुत्तमं। विश्वचक्रमिति ख्यातं सर्वपापप्रणाशनं। तपनीयस्य शुद्धस्य विशुवादिशु कारयेत्। श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमं। तस्यार्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतं। अन्यद्विंशत्पलादूर्ध्वमशक्तोपि निवेदयेत्। षोडशारं ततश्चक्रं भ्रमन्नेम्यष्टकावृतं। नाभिपद्मे स्थितं विष्णुं योगारूढं चतुर्भुजं। शंखचक्रेस्य पार्श्वे तु देव्यष्टकसमावृतं। द्वितीयावरणे तद्वत्पूर्वतो जलशायिनं। अत्रिर्भृगुर्वसिष्ठश्च ब्रह्मलोकस्य एव च। मत्स्यः कूर्मो वराहश्च नरसिंहोथ वामनः। रामो रामश्च रामश्च बुद्धः कल्कीति चक्रमात्। तृतीयावरणे गौरी मातृभिर्वसुभिर्युता। चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च। पंचमे पंचभूतानि रुद्राश्चैकादशैव तु। लोकपालाष्टकं षष्ठे दिङ्मातंगास्तथैव च। सप्तमेस्त्राणि सर्वाणि मंगलानि च कारयेत्। अंतरान्तरतो देवान्विन्यसेदष्टमे पुनः। तुलापुरुषवच्छेषं समंतात्परिकल्पयेत्। ऋत्विङ्मंडपसंभारभूषणाछादनादिकं। विश्वचक्रं ततः कुर्यात्कृष्णाजिनतिलोपरि। तथाष्टादशधान्यानि रसांश्च लवणादिकान्। पूर्णकुंभा

एकं चैव वस्त्राणि विविधानि च। माल्यैक्षुफलरत्नानि वितानं चापि कारयेत्। ततो मंगलशब्देन स्नातः शुक्लांबरो
गृही। होमाधिवासनांते तु गृहीतकुसुमांजलिः। इममुच्चारयेन्मंत्रं त्रिः कृत्वाथ प्रदक्षिणं। नमो विश्वमयायेति वि
श्वचक्रात्मने नमः परमानंदरूपी त्वं पाहि नः पापकर्दमात्। तेजोमयमिदं यस्मात्सदा पश्यंति योगिनः। हृदि त्वां
त्रिगुणातीतं विश्वचक्रं नमाम्यहं। वासुदेवे स्थिते चक्रे चक्रमध्ये तु माधवः। अन्योन्याधाररूपेण प्रणमामि स्थि
ताविह विश्वचक्रमिदं यस्मात्सर्वपापहरं परं। आयुधं वाधिवासश्च भवादुद्धर मामतः। इत्थामअ ततो दद्याद्विश्व
चक्रं विमत्सरः। विमुक्तः सर्वपापेभ्यो विष्णुलोके महीयते। वैकुंठलोकमासाद्य चतुर्बाहुः सनातनः। सेव्यतेप्स
रसां सघैः तिष्ठेत्कल्पशतत्रयं। प्रणमेद्यस्त्वयं कृत्वा विश्वचक्रं दिने दिने। तस्यायुर्वर्द्धते नित्यं लक्ष्मीश्च विपुला भ
वेत्। इति सकलजगत्सुराधिवासं वितरति यस्तपनीयषोडशारं। हरिभवनमुपागतः ससिद्धैश्चिरमधिगम्य न
मस्यते शिरोभिः। असुंदर्शनतां प्रयाति शत्रोर्मदनसुदर्शनतां च कामिनीनां। स सुदर्शनकेशवानुरूपः कनकसुद

(८०)

रीनिदानदग्धयापः॥ कृतगुरुदुरितापि षोडशारप्रवितरणात् प्रवराकृति मुरारेः॥ अभिभवति भवोद्भयानि भि
त्वा भवमभितो भवने भयानि भूपः॥ तपनीयस्येति विश्वचक्रमित्यनेनान्वेति। षोडशारमिति चक्राकारे वर्तुलसु
वर्णफलकसमांतराले रेखाष्टकेन षोडशधा विभक्ते या मध्यात्षोडशरेखा— वंतिता आरा इत्युच्यंते। तप्तक्रमि
त्यर्थः। भ्रमदिति। सुवर्णफलकार्धसूत्रं मष्टधा विभज्य मध्यादेकैकांशारेख्याष्टौ वृत्तानि कुर्यात्। वृत्तरेखा नेमि
सदृशत्वान्नेमिशब्देनोच्यंते। तासां सत्त्वभ्रमणे नक्रियमाणत्वाद्भ्रमदिति विशेषणं। नाभीति। मध्यवृत्तमध्ये षट्दलं
लिखित्वा तत्र हृद्देशगतसंपुटाकारपाणिद्वयवामहस्तधृतशंखं दक्षिणहस्तधृतचक्रं विष्णुं स्थापयेदित्यर्थः। अ
ष्टदलेषु पूर्वादिक्रमेण देव्यष्टकं स्थापयेदित्यर्थः। तच्च पंचरात्रे विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च। प्रह्वी
सत्या तथेशानी देव्योष्टौ परितो हरेः॥ वरदा दक्षहस्तेन वामहस्तधृतायुधाः॥ प्रसन्नास्तरुणीरूपा अष्टौ देव्यः प्रकी
र्तिताः॥ आयुधं चक्रं। द्वितीयेत्रि षोडशभागे— पूर्वादिप्रादक्षिण्येन षोडश देवताः स्थाप्याः। एवं तृतीयाचर

णादिशुद्ध्यं। जलशायी शेषशायी तल्लक्षणमुक्तं ब्रह्मांडे। अत्र्यादीनां लक्षणं पंचरात्रे। जटिलाः श्मश्रुलाः शा
न्ताः कृशा धामनिसंततताः। कुंडिकाक्षकाशः कार्या ऋषयो द्विभुजाः सदा। धामनयः शिराः। अक्षोक्षमाला सा च द
क्षिणहस्ते जपानुरोधात्। दशावतारलक्षणानि पंचरात्रे। वामे शंखं गदा चक्रे द्विभुजो मत्स्यरूपकः। नरांघ्रिमंत्स्यरू
पो वाममत्स्यरूपी जनार्दनः। गदाचक्रे अर्थाद्दक्षिणे हस्ते। उक्तास्त्रपाणिर्द्विभुजो मत्स्यरूपकः। नरांघ्रिर्मत्स्यरूपो
वाममत्स्यरूपी जनार्दनः। गदाचक्रे अर्थाद्दक्षिणे हस्ते। उक्तास्त्रपाणिर्द्विभुजो मत्स्यरूपधृक्। नरांघ्रिरित्येकः पक्षः
सर्वमत्स्यरूप एवेति विकु[illegible]र्थः। कूर्मस्तु॥ कच्छपाकारो मत्स्यरूपोक्तरूपवान्। द्विभुजस्तदस्त्रो नरांघ्रिरत्र प्रकारे
णा कच्छपाकार इत्यर्थः। वराहलक्षणं तत्रैव। मधुपिंगलवर्णस्तु शंखचक्रगदाब्जधृक्। नरांगः शूकरास्यश्च वामकू
र्परके धरां। ब्रह्म-षणमूर्तिश्च वाराही हरिरुच्यते। कूर्परं दंताग्रे। नरसिंहलक्षणे। ज्वलदग्निसमाकारं सिंहवक्त्रं नरांगकं
।दंष्ट्राकरालवदनं ललज्जिह्वं सुभीषणं। वृत्तांसं जटिलं कुड्मालीढं पीनवक्षसं। अभेद्यतीक्ष्णनखरनामो नहत

दानवं। तद्वक्षोदारयंतं च कराभ्यां—खरैर्भ शंखगदाचक्रधरं द्वाभ्यां नरसिंहं चतुर्भुजं। कुर्यादिति शेषः। कुंडीछत्रध
रो द्विर्हुर्तीमनः परिकीर्त्तितः। कमंडलुछत्रधरदक्षिणवामहस्तद्वयमित्यर्थः। क्षत्रांतकरणं घोरमुद्दंपरशुं करे।
जामदग्न्यः प्रकर्त्तव्यो रामो रोषारुणेक्षणः। युवा प्रसन्नवदनः सिंहस्कंधो महाबलः। आजानुबाहुः कर्त्तव्यो रामो बाण
धनुर्धरः। मद्यपात्रं च सीरं च वामदक्षिणयोः क्रमात्। गदामुशलवज्रं च हलीरामः प्रकीर्त्तितः। मुशलरूपं वज्रमि
त्यर्थः। धारयन्निति शेषः। एवं च चतुर्बाहुः। वामहस्तयोरुपरि मद्यभांडं। अधश्च गदां। दक्षिणयोस्तु परि हलं अधो मु
शलं धारयन्। बलभद्रापरको रामः कार्य इत्यर्थः। कषायवस्त्रसंवीतः स्कंधसंसक्तचीवरः। पद्मासनस्थो द्विभुजो
ध्यायी बुद्धः प्रकीर्त्तितः। चीवरं वल्कलं। पद्मासनं योगासनविशेषः। ध्यायी ध्यानशीलः। खड्गोद्योतकरः क्रु
द्धो हयारूढो महाबलः। म्लेंच्छोच्छादकरः कल्की द्विभुजः परिकीर्त्तितः। तृतीयेति। मातरो ब्रह्माणी रुद्राणी कौमा
री वैष्णवी वाराही इंद्राणी कौशिकीरूपाः। अत्र चामुंडास्थापनं स्पष्टं नारायणेनोक्तं। तच्चिंत्यं। षोडशासु को

ष्ठेषु समद्राणां स्थापनासंभवात्। गौर्यादीनां लक्षणं पंचरात्रे। गौरी शंखेंदुधवलाभां सर्ववीरनिषेवितां। वृषप
द्मासनासीनां साक्षसूत्रकमंडलुं। वीरः पतिपुत्रादयः। वृषोपरि पद्मासनासीनां गौरीं कारयेदित्यर्थः। ब्रह्माणील
क्षणं। गौरी चतुर्मुखी पीना अक्षमालास्रुकान्विता। कुंडाज्यपाविनी वामे ब्रह्माणी हंससंस्थिता। अक्षमालास्रुवा
चर्थी दक्षिणे। कुंडमंडलुः। गौरी गौरवर्णी। रुद्राणीलक्षणं। त्रिनेत्रा शूलहस्ता च जटाखंडेंदुमंडिता। कपालमालिनी
युक्ता रुद्राणी वृषभस्थिता। कपालमालारूपहारयुक्तेत्यर्थः। कौमारीलक्षणं। रक्ता शक्तिधरा देवी रक्तमाल्यांब
रान्विता। शिखिपृष्ठसमारूढा कौमारी स्कंदरूपिणी। वैष्णवीलक्षणं। शंखचक्रधरा वामे गदाहस्ता च तार्क्ष्यगा।
श्यामा चतुर्भुजा देवी वैष्णवी वनमालिनी। गदयापद्मस्थाप्युपलक्षणं ते चार्या दक्षिणहस्ते। वाराहीलक्षणं। कृ
ष्णापीनोदरा क्रुद्धभ्रूकरास्या च कापि का। सुवस्त्रा यौवनोद्रिक्ता नानाभरणभूषिता। वाराही महिषस्था च म
हिरा दंडधारिणी। खड्गखेटकसंयुक्ता अथवापि चतुर्भुजा। अथ चेत्यव्ययसमुदायः समुच्चयार्थः। इंद्राणी

183

लक्षणं। सहस्राक्षी राजारूढा हेमाभा वज्रधारिणी। इंद्राणी सर्वसिद्धार्था सर्वाभरणभूषिता। गजऐरावतः स
र्वसिद्धार्था पूर्णमनोरथतया प्रसन्नवदने सर्थः। कौशिकी लक्षणं। गर्त्ताक्षी क्षीणदेहा च क्षामकुक्षिर्भयंकरी।
विवृतस्या च दंष्ट्राग्राश्चोपरि हि संस्थिता। चतुर्थे इति हृद्ब्रादिसचेद चतुष्टयलक्षणमुक्तं ब्रह्मांडे। पंचम इति
अत्र दामोदरः पंचभूताधिष्ठातृदेवताः स्थापनीयाः तत्तल्लक्षणं मात्स्ये। वराहेणोद्धृता तद्वत्कुर्यात्पृथ्वीं सपंकजां।
वरुणं चासनगतं कांचनं मकरोपरि। हुताशनं मेषगतं वायुं कृतमृगासनं। तथाकाशाधिपं कुर्यान्मूषकास्थं विना
यकमिसोहं। मदनरत्नेस्तु पंचभूतपदस्य तदधिष्ठातृदेवतालक्षणायांमानाभावात्सं च भूतान्येव स्थापनीयानि।
तल्लक्षणं विष्णुधर्मोत्तरे। शुभ्रवर्णा मही कार्या दिव्याभरणभूषिता। चतुर्भुजा सौम्यवपुश्चंद्रांशुसदृशांबरा। रत्न
पात्रं सस्यपात्रं पात्रमौषधसंयुतं। पद्मं करे च कर्तव्यं भुवो यादवनंदन। तस्य ध्यानवतः एवमापः प्रसक्तांगताः
स्त्रीरूपाः श्वभ्रवलीश्च द्विभुजांश्वेतवाससः। दधानाः पाशकलशौ करयोर्मकरासनाः। अग्निवाय्वोर्लक्षणं तु

लायामुक्तं। नीलोत्पलाभं गगंनं तद्वर्णांबरधारि च। चंद्रार्कहस्तं कर्तव्यं द्विभुजं सौम्यविग्रहं। द्विरष्टवर्षाकारं व
स्त्रीपुंसव्यंजनान्वितमित्याह रुद्रलक्षणं धरादानउक्तं। षष्ठइति। लोकपालाष्टकदिग्मातंगाष्टकलक्षणं ब्रह्मां
डउक्तं। सप्तमेस्त्राणीति। खड्गचक्रशक्तिदंडपाशध्वजगदाशूलरूपाणि। मंगलानि दक्षिणावर्तशंखकौस्तुभ
चामरछत्रपूर्णकुंभस्वरूपवैजयंतीवृषगजालंकानीति दामोदरः। पृथ्वी चंद्रस्करखड्गशूलगदाशक्तिकुंतांकु
शधनूंषि च। स्वधितिश्चेति शस्त्राणि तेषु चायं प्रवस्यते इति गारुडोक्तानि शस्त्राणि दक्षिणावर्तशंखश्चरोव
ना चंदनं तथा। मुक्ताफलं हिरण्यं च छत्रचामरमेव च। आदर्शश्चेति विज्ञेयं मंगलं मंगलावहमिति पराशरोक्ता
नि मंगलानीत्याह। तानि च सुवर्णमयानीति दामोदरः। प्रत्यक्षाणीत्यन्ये। अंतरांतरतइति द्वितीयाद्यावरणेष्वपि सं
बध्यते तथा च द्वितीयाद्यावरणगतरेखाष्टकजनितषोडशृंगांतरालेषु पूर्वोक्ताः षोडशा षोडशा देवताः स्थापये
दित्यर्थः। अष्टमइति। अष्टमवृत्तस्थोषोडशकोष्ठेषु पूर्वोक्तानेव देवान्स्थापयेदित्यर्थः। ते चाद्यवृत्तस्थावि

163

ल्पाद्योनचद्वितीयरत्नस्थाश्चाद्याःसप्ततेषांप्रथमोपस्थितेरितिदामोदररत्नाकरौ। द्वितीयरत्नस्थाःषोडशे
तिदानविवेकमदनविनायकनवग्रहस्कंदाश्विनीकुमारसागरलक्ष्मीगंगायमुनाइतिदानसागरः॥ अनंतरत्वा
त्सप्तमावरणस्य इतिपितृचरणाः। दद्याद्वितिदाने चतुलापुरुषवद्गुरवेदृत्विग्भ्योयथेच्छविभागोवा
द्रष्टव्यः। इतिविश्वचक्रमहादानविधिः॥ अथप्रयोगः॥ यजमानोदेशकालौसंकीर्त्यॐ सर्वपापप्रणाश
सर्वपापविमुक्तात्मीयविष्णुलोकमहितत्ववैकुंठलोकप्राप्तिंतंतरचतुर्बाहुसनातनात्मीयत्वदृक्स्परःसंघसे
व्यत्वतल्लोकाधिकरणककल्पशतत्रयावस्थितिव-सिद्धकर्तृकाधिगमोत्तराबहुशिरःकरणकहरिभव
नोपगमतात्मचिरनमस्यत्वशत्रुकर्तृकासुदर्शनकर्मत्वबहुकामिनीकर्तृकमदनतुल्यसुदर्शनकर्मत्वसख
दर्शी-केशवानुरूपत्वदधिपापत्वषोडशारप्रवितरणहेतुकसुरारिप्रवराकृतिस्वकर्तृकबहुगुरुदुरितोच्छेदो
त्तरजन्मयोभवामितोभवननिमित्तकभवोद्भवबहुमायाभिभवकामःश्रीविश्वचक्रमहादानमहंप्रतिपादयि

ष्ये इति संकल्प्य मधुपर्कांतं तुलापुरुषवत्कृत्वा षोडशारोपरि पुष्पाणि विकीर्य तदुपरि कृष्णाजिनं प्रसार्य
तदुपरि द्रोणमितांस्तंडुलान्निधाय तदुपरि विंशतिपलाधिकसुवर्णेन कृतवर्तुलपत्रं स्थापयित्वा तद — सू
त्रमष्टधा विभज्याष्टौ वृत्तानिल्लिखित्वा दिग्विदिक्ष्वंतरालेष्वष्टौ सूत्राणि दत्वा मध्यवृत्तेष्टदलकमलं कृत्वा ना
मौ विष्णुं पूर्वादिदलेषु विमलां उत्कर्षिणीं ज्ञानां क्रियां योगां प्रह्वीं सत्यां ऐशानीं द्वितीयवृत्तस्थषोडशभागेषु
पूर्वादिक्रमेण जलशायिनं अत्रिं भृगुं वसिष्ठं ब्रह्माणं कश्यपं मत्स्यं कूर्मं वराहं नारसिंहं वामनं रामं राम रामं
बुद्धं कल्किनं तृतीयवृत्तस्थषोडशभागेषु गौरीं ब्रह्माणीं रुद्राणीं कौमारी वैष्णवीं वाराहीमिंद्राणीं कौशिकीं
आपं ध्रुवं सौम्यं धरं अनिलं नलं प्रत्यूषं प्रभासं। चतुर्थवृत्तस्थषोडशभागेषु इंद्रं विष्णुं भगं त्वष्टारं वरुणं अंशं
अर्यमणं रविं पूषणं मित्रं यमं पर्जन्यं ऋग्वेदं यजुर्वेदं सामवेदं अथर्ववेदं पंचमवृत्तस्थषोडशभागेषु पृथिवीं
वरुणं हुताशनं वायुं विनायकं निर्ऋतिं सर्पं अजैकपादं मृगव्याधं पिनाकिनं दहनं ईश्वरं अहिर्बुध्न्यं कपालिनं अ

पराजितंसेनान्यं।षष्ठवृत्तस्थषोडशभागेषुइंद्रंअग्निंयमंनिर्ऋतिंवरुणंवायुंसोमंईशानंऐरावतंपुंडरीकंवा
मनंकुमुदंअंजनंपुष्पदंतंसार्वभौमंसुप्रतीकंसप्तमवृत्तस्थषोडशभागेषुखड्गंअलंगदांशक्तिंकुंतंमंकुशांध
ढःस्वा– तिंदक्षिणावर्त्तशंखरोचनांचंदनंमुक्ताफलंहिरण्यंछत्रंचामरमादर्शंअष्टमवृत्तस्थषोडशभागेषुआ
द्यवृत्तस्थान्नवदेवान्द्वितीयवृत्तस्थांश्चसप्तदेवान्स्थापयेत्।विश्वचक्रसमंतादष्टादशधान्यषड्रसवद्द्रव्यपूर्णकुं
भाष्टकानेकवस्त्रमाल्येक्षुफलानिवज्रमौक्तिकमाणिक्यनीलमरकतास्यमहारत्नानिस्थापयेत्।ततोमहा
वेदीगृहेवेघोरुपरिवितानेयभीयात्।अथसंध्योत्तरंरात्रिकृत्येमातश्चयजमानाभिषेकांतेकृतेयजमानोगृही
तपुष्पांजलिर्विश्वचक्रंत्रिःप्रदक्षिणीकृत्यप्रार्थयेत्।ॐनमोविश्वमयायेतिविश्वचक्रात्मनेनमः।परमानंद
रूपीत्वंपाहिनःपापकर्दमात्।तेजोमयमिदंयस्मात्सदापश्यंतियोगिनः।हृदिस्थंत्रिगुणातीतंविश्वचक्रंन
माम्यहं।वासुदेवेस्थितंचक्रंचक्रमध्येतुमाधवः।अन्योन्याधाररूपेणप्रणमामिस्थितावहविश्वचक्रमिदं

यस्मात्सर्वपापहरंसुभंआयुधंचाधिवासम्भवादुदरमाभितः॥ ततपुष्पांजलिनाविष्वचक्रंगंधाद्यैर्गुर्वं
र्त्विजश्चसंपूज्यतदनुज्ञातःकुंभादीन्यादायपूर्ववत्फलमुच्चार्यइंदविमलेत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्ये
शानीनुग्रहा प्या त्रिभृगुवसिष्ठब्रह्मकश्यपमत्स्यैमेकूर्मवराहनरसिंहवामनरामरामरामंबुद्धकल्किगौरीब्र
ह्माणीरुद्राणीकौमारीवैष्णवीवाराहीइंद्राणीकौशिक्यापध्रुवसौम्यधरानिलनलप्रत्यूषप्रभासेंद्रविसुभग
त्वष्टृवरुणांशार्यमरविपूषमित्रयमपर्जन्यर्ग्वेदसामवेदाथर्ववेदपृथिवीवरुणहुताशनवायुविनायक
निर्ऋतिसर्पाजैकपादंमृव्याधपिनाकिनंदहनंईश्वरंअहिर्बुध्न्यंकपालिनंअपराजितंसेनान्यं॥ षष्ठवृत्तस्थ
षोडशभागेषुइंद्रंअग्निंयमंनिर्ऋतिंवरुणंवायुंसोमंईशानंऐरावतंपुंडरीकंवामनंकुमुदंअंजनंपुष्पदंतं
सार्वभौमंसुप्रतीकंसप्तमवृत्तस्थषोडशभागेषुखड्गंशूलंगदांशक्तिंकुंतमंकुशंधनुःस्वधितिंदक्षिणाव
र्तेशंखंरोचनांचंदनंमुक्ताफलंहिरण्यंवृत्तंचामरमादर्शं॥ अष्टमवृत्तस्थषोडशभागेषुआघट्टत्तस्थान्तव

देवान्द्वितीयवृत्तस्थांश्च सप्तदेवान्स्थापयेत्। विश्वचक्रसमंतादष्टादश धान्यमधुसचद्रव्यपूर्णकुंभाष्टका
नेकवस्त्रमाल्येक्षुफलानि वज्रमौक्तिकमाणिक्यनीलमरकताख्यमहारत्नानि स्थापयेत्। ततो महावेदीग्रहवे :
द्योरुपरि वितानेन बध्नीयात्। अथ संध्योत्तरं रात्रिकृत्ये स्नातश्च यजमानाभिषेकांते कृते यजमानो गृहीतपुष्पां
जलिर्विश्वचक्रं त्रिः प्रदक्षिणीकृत्य प्रार्थयेत्। ॐ नमो विश्वमयायेति विश्वचक्रात्मनेन नमः। परमानंदरूपी
लं पाहि नः पापकर्दमात्। तेजोमयमिदं यस्मात्सदा पश्यंति योगिनः॥ हृदि तं त्रिगुणातीतं विश्वचक्रं नमाम्य
हं। वासुदेवे स्थितं चक्रं चक्रमध्ये तु माधवः॥ अन्योन्याधाररूपेण प्रणमामि स्थिताविह। विश्वचक्रमिदं य
स्मात्सर्वपापहरं शुभं। आयुधं चाधिवासश्च भवादुद्धर मामितः॥ ततः पुष्पांजलिना विश्वचक्रं गंधाद्यैर्गुरुर्ऋत्वि
जश्च संपूज्य तदनुज्ञातः कुंडादीन्यादाय पूर्ववत्फलमुच्चार्य इदं विष्णु विमलोत्कर्षिणी ज्ञाना क्रिया योगा
प्रह्वी सत्येशानी जलशाय्यत्रिभृगुवसिष्ठब्रह्मकश्यपमत्स्यकूर्मवराहनरसिंहवामनराभरामरामंबु

दुकल्किगौरीब्रह्माणीरुद्राणीकौमारीवैष्णवीवाराहींद्राणीकौशिक्यापध्रुवसोम्यधरानिलनलप्रत्यूषप्र
भासेंद्रविष्णुभगत्वष्टृवरुणांशार्यमरविपूषमित्रयमपर्जन्यर्ग्वेदयजुर्वेदसामवेदाथर्ववेदपृथ्वीवरुण
हुताशनवायुविनायकनिर्ऋतिसर्पीजैकपाद्मृगव्याधपिनाकिदहनेश्वराहिर्बुध्न्यकपाल्यपराजितसे
नानींद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानैरावतपुंडरीकवामनकुमुदांजनपुष्पदंतसार्वभौमसुप्रतीकखड्ग
शूलगदाशक्तिकुंतांकुशधनुःस्वधितिदक्षिणावृत्तशंखरोचनमुक्ताफलहिरण्यछत्रचामरादर्शविष्णुवि
मलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानीजलशाय्यत्रिभृगुवसिष्ठब्रह्मकश्यपपमत्स्यप्रतिमाश्रुतंसो
पस्करंविश्वचक्रेविष्णुदैवतंसर्वेषानामगोत्रेसमुच्चार्यगुर्वृत्विग्भ्योहंसंप्रददइतिगुर्वृत्विग्भ्यस्तोपरिस्थित
गुरुसंकल्पयेत्। ततोर्धंगुरवेर्धमृत्विग्भ्योदद्यात्। यथेच्छविभागपक्षेतुग्रामादिनागुर्वृत्विजःपरितोष्यते
भ्योन्येभ्यश्चविभज्यदद्यात्। ततःकृतस्यसोपस्करविश्वचक्रमहादानस्यप्रतिष्ठार्थमिमान्सुवर्णानग्निदे

166

वतानुगुर्वीत्विग्भ्योहं दक्षिणां संप्रदद इति विश्वचक्रसुवर्णेन तीयांशं द्व्यांशं वा दद्यात्। ग्रामादीनां वा दक्षि
णां तेन दानं। ततः सर्वे कामस्कृतिं पठेयुः। ततो यजमानः पुण्याहवाचनसावाहितदेवतानामुत्तरपूजावि
सर्जनं च कृत्वा मंडपोपकरणानि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति। मीमांसैकधुरंधरः
श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृजसागरः सुजनतावल्लीरसालद्रुमः। यं विद्वन्मणिशेखरो दिनक
रः प्रासूत विश्वेश्वरं तेनाकारि सुविश्वचक्रददतो सत्प्रीतये पद्धतिः॥ इति विश्वचक्रमहादानप्रयोगः
अथ कल्पलतामहादानं मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं। महाकल्पलतानाम महापात
कनाशनं। पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनं। ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं। तुला
पुरुषवत्कुर्याल्लोकेशावाहनादिकं। चामीकरमयीः कुर्याद्दश कल्पलताः शुभाः। नानापुष्पफलोपेताना
नांशुकविभूषिताः। विद्याधरसुवर्णानां मिथुनैरुपशोभिताः। हारानादिसुभिः सिद्धैः फलानि च विहंगमैः॥

लोकपालानुसारिण्यः कर्त्तव्यास्तासु देवताः। ब्राह्मीमनंतशक्तिं चलवर्णस्योपरिन्यसेत्। अधस्तात्तु तयोर्म
ध्ये पद्मशंखधरे उभे। इन्द्रासनस्थातु गुडे पूर्व्वतः कुलिशायुधा रजन्यजस्थिता ज्ञेया स्रुचपाणिरथानलाया
म्ये च महिषारूढा गदितंडुलोपरि। घृतेनं नैर्ऋतिस्थाप्यासखड्गा दक्षिणपरे। वारुणे वारुणी क्षीरे पृष्ठस्था ना
गपाशिनी। पताकिनी च वायव्ये मृगस्था शर्करोपरि। सौम्ये तिलेषु संस्थाप्या शंखिनी निधिसंस्थिता। माहे
श्वरी वृषगता नवनीते त्रिशूलिनी। मौलिन्यो वरदास्तद्वत्कर्त्तव्या बालकान्विताः। शक्त्यापि च पलादूर्ध्वं मा
सहस्रात्मकल्पयेत्। सर्व्वासामुपरिष्टाच्च पंचवर्णवितानकं। धेनवो दर्वाकुंभाश्च वस्त्रयुग्मानि चैव हि। मध्य
मे दैवगुरवे ऋत्विग्भ्यो न्यास्तथैव च। ततो मंगलशब्देन स्नातः शुक्लाम्बरो बुधः। त्रिः प्रदक्षिणमावृत्समंत्राते
नानुदीरयेत्। नमो नमः पापविनाशिनीभ्यो ब्रह्मांडलोकेश्वरपालिनीभ्यः। आशंसिताधिक्यफलप्रदाभ्यो
दिग्भ्यस्तथा कल्पलताव धूभ्यः। इति सकलदिग्गनाप्रदानं भवभयसूदनकारिणः करोति अभिमतफल

देशनागलोकेवसतिपितामहवत्सरणिस्त्रिंशतः।पितृशातमथतारयेद्द्रवाञ्छ्वेभर्भवदुरितोह्यविनाशशुद्ध
देहः।सुरपतिवनितासहस्त्रसंघैःपरिवृत्तमंबुजसंभवाभिवंद्यः॥इतिविधानमिदंतुदिगंगनाकृनकल्पल
तांविनिवेदने।पृछतिपःस्मरतीहतथेक्षतेसपदमेतिपुरंदरसेवितं।नानेति।पपथत्रलताविशेषाका
रीनोक्तास्तथापिपज्ञातीयानिपुष्पाणिकर्त्तव्यानितदाकाराएवलताःकामीइत्यर्थीसिद्धं।तथाचमालती
माधवीचंपककेसरयूथीकुंदजयासेनेतीकनेरचंधकादिरूपादन्नलतायथेछंकार्यइत्यर्थः।फलपदेनाभि
लथमाणंस्त्रीपुरुषगजवाजिलडुकादिबीजपूरादिफलंचो – ते।मालसादीनांफलाभावात्।अंशुकानि
हैमान्यव।सुपर्णानराकाराःपक्षिमुखाःकिंनराइतिनविहंगमपदेनपौनरुक्त्यं।लोकपालानुसारिण्यो
लोकपालाकाराः॥तासुञ्चवष्टत्वाद्विशेषादेवताःशक्तयः॥अष्टदिक्षितिशेषः।ब्राह्मीमित्यादि।दि
गष्टगतलतानां।मध्येदक्षिणेगवक्षितयोर्बीलतयोर्मध्येभूमिस्थापितलताद्वयसंलग्नलवणस्योपरि

उत्कजलैः पूर्णैः स्वर्णगर्भः सुलक्षणः। अर्पितः स्तेमहासेत प्रसन्नस्तेन मे सदा। कमंडलोः। वारिपूर्णो घटो
पेतं देवत्रमर्पयतः। प्रीयतां धर्मराजस्तु दानेनानेन पुण्यदः। उदकुंभस्य अथ प्रतिमा तां। त्वयासुराणाम
मृतं विधाय हालाहलं संहृतमेव यस्मात्। तथासुराणां त्रिपुरं च दग्धमेकेषुणा लोकहितार्थमीश। तद्रूप
दीनादहमथ शेषैर्दोषैर्विमुक्तस्त्वगणान्प्रपद्ये। तथा कुरु त्वं शरणं प्रपद्येन्ने मयि प्रभो देववर प्रसादशि
वस्य भक्तो नित्यं कृत्तिवासा महेश्वरः। पार्वत्या सहितो देवो जगदुत्पत्तिकारकः। उमामहेश्वराच्छिवस्तस्मा
त्मकं यस्माज्जगदेकचराचरं। तस्माद्दानेन सर्वं मे करोतु भगवान् शिवः। कैलासवासो गौरीशो भगवान् भग
नेत्रभित्। चराचरांसकोलिंगरूपादिशतु वांछितलिंगस्य महादेवनिवासस्त्वं महादेवो महेश्वरः। प्रीयतां ने
न दानेन अतः शांतिं प्रयच्छ मे। शिवनाभस्य। शालग्रामशिलाचक्रे भुवनानि चतुर्दश तस्मादस्य प्रदानेन
अतः शांतिं प्रयच्छ मे। शालग्रामस्य नारायण जगन्नाथ शंखचक्रगदाधर सप्तजन्मनि यज्ञादेर्विघ्नाद्दैकृतं

169

मम चक्रहस्तगदापाणे श्रमपाशुजगसते। विष्णुमंत्रः। त्वयाजगद्व्याप्तमिदं समस्तं त्वां विश्वरिसेववदंति संतः
।त्वस्थानि सर्वाणि वदंति देवत्वया धृतं विश्वमनंतमूर्ते। तस्मात्सदा नाहनघोभवामि यथाजगत्कारपाका-
रणेश्वर। तथाकुरुत्वंशरणंप्रपन्ने मयिप्रभोदेववरप्रसादं। अअंबामंत्रः। महाकोशनिवासेतचक्रायैरूपशो-
भित। अस्यदेव्यस्यदानात्तु मम संतु मनोरथा। वर्कदेवस्य पद्मासनः पद्मकरोद्विबाहुः पद्मद्युतिः सप्ततुरंग-
वाहः। दिवाकरोलोकगुरुः किरीटी मयिप्रसादं विदधातु देवः। सूर्यमंत्रः। श्वेतांबरःश्वेतविभूषणश्च श्वेतद्यु-
तिर्दंडधरोद्विबाहुः। चंद्रोमृतात्मावरदः किरीटी श्रेयांसि मह्यं प्रददातु देवः चंद्रस्य। रक्तांबरोरक्तवपुः किरीटी
चतुर्भुजो दैत्यगुरुः प्रशांतः। दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदोस्तु मह्यं बृहस्पतेः। श्वेतांबरः श्वेत-
वपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः। दधाति दंडं च कमंडलुं च जपं च विभ्रद्वरदोस्तु मह्यं। शुक्रस्य। नील-
द्युतिः शूलधरः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः। गृहप्रसक्तिस्त्राणकरो धनुष्मा चतुर्भजः सर्पसुतः प्र

पाश्यतु। ताम्रपात्रस्य पापानि यानि कान्यानि कामोत्थानि कृतानि वा। कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदा।
कांस्यपात्रस्य। कांस्यपात्रं मया दत्तं मनुमातुरानृण्यकांक्षया। भगवन्वचनात्तुल्यं यथामुक्तिः। स्तथा वदा
दशमासांश्च उदरे जनन्याः संस्थितस्य मे। स्कंधे शिलावालभावे नस्तनपानाद्विजोत्तमं। मलमूत्रादिसंलेपुलि
मायश्च कृता मया भवतावचनादस्य मम मुक्तिर्भवेदृणात्। कांस्यपात्रं सुवर्णस्य तिलावस्त्रादिदक्षिणा। स
प्रधानं मया दत्तं तया मुक्तिर्भवेन्मम। सतिलकांस्यपात्रमंत्रः। पापानि यान्यनेकानि मा काम कृतानि च। लोह
पात्रप्रदानेन तानि नश्यंतु मे सदा। लोहपात्रस्य। वंशो वंशकरः श्रेष्ठो वंशो वंशसमुद्भवः। अनेन वंशदानेन तु
ष्टो वृद्धिं करोतु मे। चशपात्रमिदं पुण्यं वंशजातसमुद्भवं। दानानामुत्तमदानं अतः शांतिं प्रयच्छ मे। वंशपा
त्रस्य। रामपुत्रि महाभागे पुण्यामूर्तेति रामये। गृहाणेमानि शूर्पाणि मया दत्तानि जानकि। शूर्पस्य। कंचुकी
वस्त्रयुग्मैश्च तथा कर्णावतंसकैः। कंठसूत्रैश्च भूषाभिः प्रीयतां गिरिनंदनी। सौभाग्यद्रव्यफलशूर्पस्य। कमं

तासर्वामरैरपिधृता विप्रेण कंठे साममपापं व्यपोहतु। कंठमालाप्रदा। कांतरचडुत्सगैर्षुवै– व्यालीकुले
पथि। हिसवतखलु हि संततदा तस्यास्य प्रभावतः। सुवर्णसिंहस्य मणिकांचनपुष्पा महिमुक्तामयानि च। तु
लसीपत्रदानस्य कलानार्हति षोडशी। सुवर्णतुभस्माः। तन्त्रपयपण्यवोसन्नावर्णप्याः। कल्पवल्लिताः। मुक्ताः
शुभ्रखुड्वाः संतुष्टेमुक्ति प्रदाममा। मरूानं। यथासर्वेषुरत्नेषु सर्वेदेवा व्यवस्थिताः। तथाशांतिंप्रयछंतु
रत्नदानेनसुराः। रत्नस्य। रत्नमुक्तांगुलीयकदानेतु मंत्रत्रयं पठनीयं। एवमन्येषि। शिवनेचसमुद्भूतं रज
तं पित्वल्लभ। तस्मादस्य प्रदानेन रुद्रः संप्रीयतां मम। रजतस्या अगम्यागमनं चैव परदाराभिमर्शनं। तै
प्यपात्रप्रदानेन तानि नश्यंतु मे सदा। रजतपात्रस्य। ताम्रपृष्ठकं सर्वदेवक्षयाकरं। शिवं सर्वरक्षाकरति
समतः शांतिं प्रयछमे। ताम्रस्य। यस्मादायसकार्याणि त्वदधीनानि सर्वदा नांगकुरिकादीनि अतः
शांतिं प्रयछमे। लोहसायरापवादतै शून्यादभक्ष्यस्यचलक्षणात्। तत्रोक्तं यच्चमे पापं तान्मपात्रात्स्र

पदयुदिनकरपदयुग्मंमूर्ध्निविन्यस्यभक्त्यागुरुगिरमथचित्तेचित्तवत्संविधाय।मद्गुगिरमुपदानेपद्धतिंमूल
पूर्वांसिकलगुणिजननीतोषदात्रींब्रवीमिअथोपादानोपयोगितपात्रतद्द्रव्याणांदानमंत्राउच्यंते।तेनतत्र
त्प्रयोगेमंत्रविशेषाउक्ताश्चश्लोकाश्च।हिरंण्यगर्भगर्भस्थंहेमवीजंविभावसोः।अनंतपुण्यफलदम
तःशांतिंप्रयछमे।हिरण्यस्य।तदुद्भवोजगत्स्रष्टुर्वेधसोहेमपंकजं।जयावासहरेर्नाभिजातमायाहिसर्व
दा।सुवर्णकमलस्य।जन्मांतरसहस्रेषुयत्कृतंदुरितंमयास्वर्णपात्रदानेनशांतिरस्तुसदामम।सुवर्णपात्रस्य।
हिरण्यगर्भसमूतंसौवर्णंचांगुलीयकं।धर्मप्रदंप्रयछामिप्रीणातुकमलापतिः।अंगुलीयस्य।कांचनंहस्त
वलयंरूपकांतिसुखप्रदं।विभूषणंप्रदास्यामिविभूषयतुमांसदा।वलयस्य।क्षीरोदमथतेरत्नेमुद्भूतंकुंड
लद्वयं।श्रियासहसमुद्भूतंदद्देश्रीःप्रीयतांमम।कुंडलस्य।कांचनंहस्तकटकंरूपकांतिसुखप्रदं।विभूषणं
प्रयछामिविभूषयतुमांसदा।कटकस्य।मालेयंसर्वदेवस्याब्रह्मविष्णुशिवादिभिः।इंद्राविलोपालैश्च ध

170

भृतघटमर्द्धं गुरवेर्द्धमृत्विग्भ्यः प्रतिपादयेत्। यथेछविभागपक्षे तु ग्रामादिना गुर्वृत्विग्भ्यः परितोष्य तेभ्यो
न्येभ्यश्च दीनादिभ्यो यथेछं विभज्य दद्यात्। ततः कृतस्य सोपकरणमहाभृतघटमहादानकर्मणः प्रति
ष्ठार्थं इमान्सुवर्णमग्निदैवतान्युष्मभ्यं दक्षिणां संप्रदद इति महाभृतघटसुवर्णतृतीयांशं दशांशं वा द
द्यात्। कृग्रामादीनां वा दक्षिणात्वेन दानं। ततो गुर्वृत्विजः स्वस्वशाखीयां कामसूक्तिं पठेयुः। ततो यजमानः
पुण्याहवाचनमावाहितदेवतानामुत्तरपूजां विसर्जनं च कृत्वा मंडपोपकरणादि सर्वं गुरवे प्रतिपादय
यथाशक्ति ब्राह्मणान्भोजयेदिति॥ मीमांसैकधुरंधरः श्रुतिपरोन्यायेपि वागीश्वरः सुजनतावल्लीरसाल
द्रुमः। यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि महादिभृतघटके दानेऽधिया पद्धति १ इति
श्रीमत्सकलविद्याविशारदधौरेयमीमांसकधशावतंसतट्टनारायणात्मजरामकृष्णसुतभट्टदिनकर
तनयगागाभट्टापरनामविश्वेश्वरप्ररितदानदिनकरोद्योते षोडशमहादाननिरूपणं समाप्तं दिनकर

त एवाहक विदेत्यादिना। पुराणेति। पुराणं वेद इति भाक्तः। पुराणेषु वेदशब्दः। कुंभानिति। अष्टाविति शेषः। वि
निवेदयेदिति। दाने च तुलापुरुषवदर्द्धं गुरवेऽर्द्धमृत्विग्भ्यो यथेच्छविभागो वा द्रष्टव्यः। इति महाभूतघटमहा
दानविधिः। अथ प्रयोगः। यजमानो देशकालौ संकीर्त्य ॐ महापातकनाशसर्वपापविनिर्मुक्तात्मपरमग
तिप्राप्तिपितृवंधुसमन्वितामरवधूस्त्रीस्तूयमानात्मकर्तृकाकेवलविमानकरणकवैष्णवपदप्राप्तिका
मः श्रीमहाभूतघटमहादानमहं प्रतिपादयिष्य इति संकल्प्य मधुपर्कान्तं तुलापुरुषवत्कृत्वा षोडशारे
परिपुष्पाणि विकीर्य तत्र यथाशक्ति सुवर्णनिर्मितं उक्तपरिमाणं वर्तुलं रत्नमौक्तिकमाणिक्यनीलमर
कताघटितं समगन्धक्षीराज्यपूरितं पूर्वोक्तसौवर्णकल्पवृक्षब्रह्मविष्णुमहेश्वरसवाहनलोकपालाष्टक
पृथ्वीवरुणवायुहुताशनविनायकवेदपंचकप्रतिमा। मत्स्योक्तोपकरणसहितं महाभूतघटं विष्णुदेवतं गुर्व
र्त्विजां नामगोत्रे समुच्चार्य गुर्वृत्विग्भ्योऽहं संप्रददे इति सर्वं हस्ते परिस्थितगुरुहस्ते संकल्पयेत्। ततो महा

तुलं। महामृतपद्ममिति घटशब्दस्य वरणात्। महारत्नान्युक्तानि हिरण्यगर्भे। अत्र सुवर्णपरिमाणन्तु
केस्तन्मानमाधिकं। पात्रस्थौल्यं फलाधिक्यमिति दामोदरः। अंगुलशतमिति। इदं मानं गांभीर्ये नो विस्ता
रतश्च। क्षीरेति क्षीराज्ये समे। तच्छब्दश्चकारार्थः। पद्मात्तद्वदिति आज्यक्षीरवदित्यर्थः। तथा च कल्पवृक्षो वि
मध्ये एव स्थापनीय इति कल्पवृक्षलक्षणं पूर्वमुक्तं। पद्मेति कृतपद्मासनानित्यर्थः। तत्र घटे। महेंद्रानिति लो
कपालविशेषणं। एतेषां लक्षणं ब्रह्मणं पूर्वमुक्तं। पद्मेति कृतपद्मासनानित्यर्थः। तत्र घटे। महेंद्रानिति लो
कपालविशेषणं। एतेषां लक्षणं ब्रह्मांडे उक्तं। वराहेणेति वराहदंताग्रस्थितां महीं साकारां वामहस्तस्थितकमलं।
कुर्यादित्यर्थः। आसनेति कृतपद्मासननित्यर्थः। आकाशाधिपं आकाशाधिष्ठातारं। अत्र लोकपालत्वेन प्रा
प्तानां वरुणाग्निवायूं वाहनविधानार्थोयमनुवादः। तेनेंद्रादयोऽष्टौ पृथ्वी विनायकौ च घटमध्ये स्थापनीया इ
ति रूपनारायणदामोदरादयः। वयं तु पुनर्विधानात् भिन्नाः पंच प्रतिमा इति क्रमः। वेदचतुष्टयलक्षणं स्व

क्षसूत्रं स्यात् यजुर्वेदस्य पंकजं। सामवेदस्य वीणा स्याद्वेणुं दक्षिणतो न्यसेत्। अथर्ववेदस्य पुनः स्रुक्स्रुवौ
कमलं करे। पुराणवेदो वरदः साक्षसूत्र कमंडलुं। परितः सर्वधान्यानि चामरासनदर्पणं। पादुकोपानहछत्र
भूषणछादनादिकं। दीपिकाभूषणानि वै तिक्वचिसाठः। शय्यां च जलकुंभांश्च पंचवर्णं वितानकं। स्नाता
धिवासनांते तु मंत्रमेतमुदीरयेत्। नमो वः सर्वभूतानामाधारेभ्यश्चराचरे। महाभूतादिदेवेभ्यः शांतिरस्तु शि
वं मम। यंस्मान्न किंचिदधस्ति महाभूतैर्विनाकृतं। ब्रह्मांडे सर्वभूतेषु तस्माद्रक्ष यास्तु मे। इत्युच्चार्य म
हाभूतघटं यो विनिर्वेदयेत्। सर्वपापविनिर्मुक्तः स याति परमां गतिं। विमानेनार्कवर्णेन पितृवंधुसम
न्वितः। स्तूयमानोमरस्त्रीभिः पदमभ्येति वैष्णवं। षोडशैतानि यः कुर्यान्महादानानि मानवः। न तस्य पुन
रावृत्तिरिहलोके भिजायते। इति पठति य इत्थं वासुदेवस्य पार्श्वे ससुतपितृकलत्र संशृणोतीह स
म्यक्। पुरि सुभवने या मेदिरे वार्कलक्ष्म्यो श्चिरममरवधूभिर्मोदते सोपि कल्पे। कुंडपात्रेतत्त्वव

पोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति। भीमांसैकधुरंधरश्रुतिधरोन्वाये
पि वागीश्वरः साहित्यामृतसागरः सुजनता वल्लीरसालद्रुमः। यं विद्वन्मणिशेखरो दिनकरः। प्रासूत वि
श्वेश्वरं। तेनाकारि मणीजधेनुददतौ सत्प्रीतये पद्धतिः इति रत्नधेनुमहादानप्रयोगः अथ महाभूतघ
टमहादानं मात्स्ये। अथातः संप्रवक्ष्यामि महादानमनुत्तमं। महाभूतघटं नाम महापातकनाशनं। पुण्यं ति
थिमथासाद्य कृत्वा ब्राह्मणवाचनं। ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं। तुलापुरुषवत्कुर्याल्लोकेशा
वाहनादिकं। कारयेत्कांचनं कुंडं महारत्नचितं बुधः। प्रादेशादंगुलशतं यावत्कुर्यात्प्रमाणतः। क्षीराज्यपूरितं तत
द्वत्कल्पवृक्षसमन्वितं। पद्मासनगतांस्तत्र ब्रह्मविष्णुमहेश्वरान्। लोकपालान्महेंद्रांश्च स्ववाहनसमन्वितान्।
वराहेनोद्धृतां तद्वत्कुर्यात्पृथ्वीं सपंकजां। वरुणं चासनगतं कांचनं मकरोपरि। हुताशनं मेषगतं वायुं कृतम
गासनं। तथा कोशाधिपं कुर्यान्मूषकस्थं विनायकं। विन्यसेद्घटमध्ये तान्वेदपंचकसंयुतान्। ऋग्वेदस्या

क्ता फलशत हृत्पच कृतदंष्ट्रा विद्रुमशतकृतभ्रूयुगां शुक्तिद्वयकृतकर्णौ सुवर्णशृंगी वज्रशतकृताशरसं गोमे
दशतान्वितनेत्रपटक कृतग्रीवां इंद्रनीलशतकृतपृष्ठां वैडू – शतकृतपार्श्वां स्फाटिकरत्नशतकृतोदरां सौ
गंधिकशतकृतकटिं हेमकृतखुरां मुक्तावलीकृतपुच्छां सकर्पूरसूर्यकांतस चंदनेंदुकांतकृतघ्राणां कुंकु
मकृतरोमां रूप्यकृतनाभिं गारुत्मतशतकृतपायुं बहुविधरत्नकृतसर्वसंधिं शर्कराकृतजिह्वां गोमयां।
आज्यज्यकृतगोमूत्रां ॐधदधियुतां चामरकृतपुच्छाग्रामिक्षुकृतपादां उक्तगोरत्नादि चतुर्थांश कृतवत्सयु
तां सोपस्करां रत्नधेनुं विष्णुदैवतां गुरो नामगोत्रे समुच्चार्य गुरवे इदं संप्रदद इति गुरुमात्रहस्ते सर्वां रत्नधेनुं द
द्यात्। यथोक्तविभागपक्षे तु ग्रामादिना गुर्वर्त्विजः परितोष्य तेभ्योन्येभ्यश्च विभज्य दद्यात्। ततः कृतस्य रत्न
धेनुतृतीयांशस्य दशांशस्य वा मूल्यभूतसुवर्णं दक्षिणां दद्यात्। ग्रामादीनां वा दक्षिणात्वेन दाने ततः स
वैंकामस्तुतिपठेयुः। ततो यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरपूजां विसर्जनं च कृत्वा मंड

पायुं रत्नांतरैः कक्षाधंगानि। जिह्वां गोमयं पंचशर्करया मत्रमाज्येनापुछं चामरेण। कुंडलद्वयं भूषणांतराणि च धेनुचतुर्थांशेन। इ
क्षुदंडैः पादान्। ततो महावेदीग्रहवेद्योः परिचितो नैव भीयात्। अथ संध्योत्तरे रात्रिकृत्ये प्रातश्च यजमा
नाभिषेकांतकृते यजमानो गृहीतपुष्पांजलीरत्नधेनुं त्रिः प्रदक्षिणीकृत्य प्रार्थयेत्। ॐ पा लक्ष्मी सर्वभू
तानां पा च देवेष्ववस्थिता। धेनुरूपेण सा देवी मम शांतिं प्रयच्छतु। देहस्था पा च रुद्राणी शंकरस्य सदा प्रि
या। धेनुरूपेण सा देवी मम पापं व्यपोहतु। विष्णोर्वक्षसि पा लक्ष्मी स्वाहा या च विभावसोः। चंद्रार्कशक्र
शक्तिर्या धेनुरूपास्तु सा श्रिये। चतुर्मुखस्य या लक्ष्मी या लक्ष्मीर्धनदस्य च। लक्ष्मीर्या लोकपालानां सा धेनु
र्वरदास्तु मे। स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां च या। सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छतु। त्वां सर्वदेव
गणधाम यतः पठंति रुद्रेंद्रचंद्रकमलासनवासुदेवाः। तस्मात्समस्तभुवनत्रयदेवयुक्ते मां पाहि देवि भव
सागरपीड्यमानं। ततः पुष्पांजलिना रत्नधेनुं गंधाद्यैर्गुर्वर्त्विजश्च संपूज्य तदनुज्ञावः कुशादीन्यादाय
पूर्ववा फलमुच्चार्य मामेकाशीति पद्मरागकृतमुखीं पद्मरागशतकृतघोणां ललाटकृतहेमतिलकां पु

र्श्वद्वयो स्फाटिकखंडशतं मुखे। सौगंधिकशतं नितंबे पादे विद्रुमदंडाः। खुराः सौवर्णाः। मुक्तावलीपुच्छे। चामरपु
च्छाग्रे सूर्यकांतकर्पूरौ दक्षिणघ्राणे। चंदनचंद्रकांतौ वामघ्राणे। रोमस्थाने कुंकुमकेसरं रजतं नाभ्यां। गारुत्मतश
तं गुदे। अन्यान्यथोक्तानि रत्नानि यथाशोभं कक्षादिदेशे स्थाप्यानि। जिह्वायां गोमये च शर्करा। आज्ये गोमूत्रं। दधि
दुग्धे प्राकृते एव। एवं धेनुं परिकल्प्य तत्सन्निधौ ताम्रदोहनं सौवर्णानि च कुंडलद्वयग्रैवेयकललाटपट्टिकाघंटादी
नि शय्या स्थाप्यानि। एवं धेनुचतुर्थांशेन वत्सः कार्यः। तथाहि। मुखे विंशतिपद्मरागाः। नासिकाग्रे पंचविंशतिपद्मरागाः
। गोलं ललाटे मरकताः सुवर्णेन तिलकं कृतं तच्चतुर्थांशेन वत्सतिलकः। एवमन्येष्वपि सुवर्णं शुद्धं ग्राह्यं। पंचविंशतिमुक्ताफलै
श्चक्षुषी। पंचविंशतिकुरुविंदैर्दंतौ। समुद्रशुक्तिभ्यां कर्णौ। हेम्ना शृंगे। पंचविंशतिगोमेदान्वितेन नेत्रपटेन ग्रीवा। पंचविंशती
न्द्रनीलैः पृष्ठं। पंचविंशतिकुरुविंदैः पार्श्वद्वयं। पंचविंशतिगोमेदान्वितेन नेत्रपटेन ग्रीवा। पंचविंशतीन्द्रनीलैः पृष्ठं। पंचविंश
तिकुरुविंदैः पार्श्वद्वयं। पंचविंशतिस्फाटिकखंडैरुदरं। पंचविंशतिसौगंधिकैः कटितटं। सुवर्णेन खुराः। गोपुच्छे मुक्तावली चतुर्थांशेन पु
च्छं सूर्यकांतकर्पूराभ्यां दक्षिणघ्राणं। चंद्रकांतचंदनाभ्यां वामघ्राणं। कुंकुमकेसरेण रोमाणि। रजतेन नाभिं। पंचविंशतिगारुडैः

नत्वविषयं। तेन ऋत्विगादीनामधिवासनदक्षिणामात्रं। यदातुयथेछविभागपक्षस्तदाग्रामादिनानुवर्त्ति
ज्ञः परितोष्यनुवर्त्तिभ्योन्येभ्यश्च विभज्यदद्यात् इति इति रत्नधेनुमहादानविधिः अथप्रयोगः॥ यजमानोदे
शकालौ संकीर्त्य अंगोलोकप्राप्तिविमुक्तत्वात्मकर्तृकमुरारिपदगमनेदेदीप्यमानप्राप्तिपूर्वकसकलकलुष
मुक्तबहुबंधुपुत्रपौत्रसहितमदनसरूपात्मकर्तृकत्रांभुस्थानाभिगमनकामः श्रीरत्नधेनुमहादानमहं प्र
तिपादयिष्ये इति संकल्प्य मधुपर्कांतं तुलापुरुषवत्कृत्वा षोडशारोपरिपुष्पाणि विकीर्य तत्र प्राग्रीवऊर्ध्वलो
मके कृष्णाजिने द्रोणपरिमितं लवणं निधाय तदुपरि रेखाभिः प्राङ्मुखीं गां दक्षिणभागस्थितेपूर्वाभिमुखव
त्सां रचयित्वा तदंगेषु वक्ष्यमाणरत्नानि स्थापयेत्। एकाशीतिपद्मरागामुखे पद्मरागशतं नासिकग्नि। हेमति
लकं ललाटे। मुक्ताशतद्वयं चक्षुषोः। पंचाशत्पंचाशत् विद्रुमान् भ्रूयुगे समुद्रशुक्ती कर्णयोः कांचनेशृं
गे हीरकशतं शिरसि। गोमेदशता[illegible] तनेत्रपटो ग्रीवायां। इंद्रनीलशतं पृष्ठे। पंचाशत्पंचाशत्कुरुविंदान्पा

ऽंगः कार्यः। वज्रं हीरकं। नेत्रपटं नेत्राख्यं वस्त्रमिति दामोदरः। गोमेदके त्विवस्त्रविशेषणमिति दामोद
रः। इंद्रनीलविशेषणमिति मिश्राः। न चोद्देश्यगतत्वाद्गुरुत्वमविवक्षितमिति वाच्यं। अनुवादासंभवात्। वै
दूर्यशतेन पार्श्वकावित्यर्थः। स्फाटिकैः शकलैरित्यर्थः। तद्धतशतसंख्याकैरित्यर्थः। सौगंधिका माणिकावि
शेषः। सर्पकांतकर्परौ हस्तिले पाणे। इंदुकांते चंदनेवामे। अन्यानि उक्तातिरिक्तानि मरकतादीनि। चकाराद्दुक्ता
न्यपि संधिपुरुषापनीयानि। संधयः कक्षाजान्वादयः। कुंडलानीति वचनं वस्त्रापेक्षया। भूषणानि ग्रैवेय
ललाटपट्ट— काघंटादिरूपाणि। सक्थि सर्वकंठादौ भागासंभवा— चतुर्थं शय्यहणं। यत्र तु एकाशीत्या
दिष्टं तत्र किंचिन्न्यूनता किंचिदधिकता वा ज्ञेया। वस्त्रेदासि दुग्धादिकं माक्षिकाद्यपात्रं। दक्षिणं अधिवा
सनं दक्षिणामित्यर्थः। गुडेति। गुडधेनुदानस्य मंत्रैरित्यर्थः। ते च प्रयोगे वक्ष्यंते। आमंत्र्येति प्रदक्षिणा
नंतरमामंत्रणं तु तत्पुरुषातिदेशात्। गुरव इति। इदं च गुर्वृत्विग्भ्यां त्रसंप्रदानत्वपक्ष एव गुरुर्मात्रसंप्रदा

मामंत्रयेत्ततः॥ गुडधेनुवदामंत्र्य इदं तूदाहरेत्ततः॥ त्वां सर्वदेवगणधामयतः पठंति रुद्रेंद्रचंद्रकमलासनवा
सुदेवाः। तस्मात्समस्तभुवनत्रयदेवयुक्ते मां पाहि देवि भवसागरपीड्यमानं। आमंत्र्य चैवमभितः परिहृत्य भ
क्त्याद्दद्याद्द्विजाय गुरवे जलपूर्वकं तां। यः पुण्यमाप्य दिनमत्र कृतोपवासः पापैर्विमुक्ततनुरेति पदं मुरारेः। इति
सकलविधिज्ञो रत्नधेनुप्रदानं वितरति स विमानं प्राप्य देदीप्यमानं। सकलकलुषमुक्तो बंधुभिः पुत्रपौत्रैः
सह मदनसरूपः स्थानमभ्येति शंभोः। भूमावितिवेधामित्यर्थः॥ धेनुमिति। संकल्प्येति रेखाभिर्धेन्वाकारं
परिकल्प्य वक्ष्यमाणरत्नैस्तत्स्थानविधिना रत्नमयीं धेनुं कृत्वा दद्यादित्यर्थः॥ वक्ष्यमाणप्रकारेण रत्नानि
स्थापयित्वा तत्रैवं धेनुरिति संकल्पयेदित्यर्थः॥ इति पितृचरणाः॥ घोणा नासिकायां॥ पद्मरागशतरूपा घोणे
त्यर्थः॥ दृशौरिति द्वित्वस्यादिष्टमगतत्वेनाविवक्षितत्वात्तस्यैकं मुक्ताशतं भ्रूयुगस्य तु तत्वेनोद्दिष्टत्वाच्च
प्रत्येकं विद्रुमत्रातं विद्रुमशतद्वयं विद्रुमरूपः खंडपरः॥ शुक्तीः समुद्रस्थशुक्तीः शृंगाणी विवक्षुवचनाद्दलोपि स

द्रोणसंयुतं। धेनुं रत्नमयीं कृत्वा संकल्प्य विधिपूर्वकं॥ स्थापयेत्पद्मरागाणामेकाशीतिं मुखे वुधः। पद्म
रागशतं तद्वद्घ्राणां च परिकल्पयेत्। ललाटे हेमतिलकं मुक्ताफलशतं दृशोः। भ्रूयुगे विद्रुमशतं शुक्तीकर्णद्व
ये स्थिते। कांचनानि च शृंगाणि शिरो वज्रशतात्मकं॥ ग्रीवायां नेत्रपटकं गोमेदकशतान्वितं। इंद्रनीलश
तं पृष्ठे वैडूर्यशतं पार्श्वकौ। स्फाटिकै रुदरं तद्वत्सौगंधिकशतात्कटिं। खुरा हेममयाः कार्याः पुच्छं मुक्तावली
मयं। सूर्यकांतेंदुकांतौ च घ्राणे कर्पूरचंदने कौंकुमानि च रोमाणि नाभिं रौप्यां च कारयेत्। गारुत्मतशतं तद्व
द्पाले परिकल्पयेत्। तथान्यानि च रत्नानि स्थापयेत्सर्वसंधिषु। कुर्याच्छर्करया जिह्वां गोमयं चंदनात्मकं॥
गोमूत्रमाज्येन तथा दधि दुग्धं स्वरूपतः। पुच्छाग्रे चामरं दद्यात्समीपे ताम्रदोहनं। कुंडलानि च हेमानि भूष
णानि च शक्तितः। कारयेद्देवमेवैतच्चतुर्थांशेन वत्सकं। तथा धान्यानि सर्वाणि पार्श्वेसुमयास्मृताः। ना
नाफलानि सर्वाणि पंचवर्णं वितानकं। एवं विरचनं कृत्वा तद्धोमाधिवासनं॥ ऋत्विग्भ्यो दक्षिणां दत्वा धेनु

176

सर्वहस्तोपरिस्थितां गुरुहस्ते संकल्पयेत्। ततोऽर्द्धं गुरवेऽर्द्धमृत्विग्भ्यो दद्यात्। ग्रामादीनां वा तान्परितोष्य यथेच्छविभजेत्। ततः कृतस्य सोपकरणसप्तसागरमहादानकर्मणः प्रतिष्ठार्थमेतान्सुवर्णानग्निदैवतान्युष्मभ्यं दक्षिणासंप्रददे इति सप्तसौवर्णसागरसुवर्णतृतीयांशं दशांशं वा दद्यात् ग्रामादीनां वा दक्षिणात्वेन दानं। ततः सर्वैकामस्तुतिं पठेयुः ततो यजमानः पुण्याहवाचनमावाहितदेवतानामुत्तरपूजाविसर्जनपूजां च कृत्वा मंडपोपकरणादि सर्वं गुरवे प्रतिपाद्य यथाशक्ति ब्राह्मणान्भोजयेदिति। मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेन कारि समुद्रसप्तकददौ सत्प्रीतये पद्धतिः॥ इति सप्तसागरमहादानप्रयोगः॥ अथ रत्नधेनुमहादानं मात्स्ये॥ अथातः संप्रवक्ष्यामि महादानमनुत्तमं॥ रत्नधेनुरिति ख्यातं गोलोकफलदं नृणां। पुण्यं दिनमथासद्य तुलापुरुषदानवत्। लोकेशावाहनं कृत्वा ततो धेनुं प्रकल्पयेत्। भूमौ कृष्णाजिनं कृत्वा लवण

इमंमेवरुणेति। अथर्ववेदे ये पश्चात्सुकृतीति। ततो यजमानाभिषेकांते यजमानो गृहीतपुष्पांजलिः सप्तसा-
गरान्त्रिः प्रदक्षिणीकृत्य प्रार्थयेत्। ॐ नमो वः सर्वसिंधूनामाधारेभ्यः सनातनाः जनानां प्राणदेभ्यश्च स-
मुद्रेभ्यो नमो नमः। ॐ क्षीरोदकाज्यदधिमाधवलावणेक्षुसाराम्रतेन भुवनत्रयजीवसंघान्। अनंदयंति वसु-
भिश्चयलोभवत्तः तस्मान्ममाप्यघविघातमलं विधध्वं। ॐ यस्मात्समस्तभुवनेषु भवत्तएवतीर्थामरा-
सुरमुरद्रुमणिप्रतानं। पापक्षयाध्वरविलेपनभूषणाय लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मीः। ततः पुष्पां-
जलिनाकुंडानि गंधाद्यैर्गुर्वेर्त्विजश्च संपूज्य तदनुज्ञातः कुशादीन्यादाय पूर्ववत्फलमुच्चार्य एतान्लवणदु-
ग्धघृतगुडदधिशर्करातीर्थवारिपूरितान् ब्रह्मकेशवमहेश्वरभास्करेंद्रलक्ष्मीपार्वतीप्रतिमासहितान्निषट्-
कुंडानि स्थापयेत् तेषु च हीरकमौक्तिकपद्मरागनीलमरकतगोमेदपुष्करागप्रवालाख्यनवमहारत्ना-
सहितान्सौवर्णे सप्तसागरान् विष्णुदेवतान् सर्वेषां नामगोत्रे समुच्चार्य गुर्वृत्विग्भ्योहं संप्रददइति

इति सप्तसागरमहादानविधिः अथ प्रयोगः॥ यजमानो देशकालौ संकीर्त्य। ॐ सर्वपापप्रणाशपूर्वमरार्चिता
स्महरिपदोपगमनसर्वपापविघातविराजितपितृपितामहपुत्रकलत्रकर्मकस्पृष्टितिशिवपुरनयनकामः अहं
सप्तसागरमहादानमहं प्रतिपादयिष्ये इति संकल्प्य मधुपर्कीत उलापुरुषवत्कृत्वा षोडशारो परिधुष्याणि वि
कीर्य तत्र प्राग्ग्रीवऊर्ध्वलोमकृष्णाजिने द्रोणपरिमितांस्तिलान्त्रिधाय तत्रैकं कुंडं उक्तपरिमाणं ब्रह्मप्रतिमा
सहितं लवणपूरितं दक्षिणदिशि संस्थाप्य तदुत्तरक्रमेण दुग्धघृतगुडदधिशर्करातीर्थजलपूरितानि ब्रह्मके
शवमहेश्वरभास्करेंद्रलक्ष्मीपार्वतीप्रतिमासहितानि षट्कुंडानि स्थापयेत् तेषु च हीरकमौक्तिकपद्मरागनी
लमरकतगोमेदपुष्परागप्रवालाख्यनवमहारत्नानि स्थाप्यानि। तत्समंतादष्टादश धान्यानि स्थापयेत्। मह
वेदीग्रहवेद्योरुपरि वितानेवभीयात् अथ संध्योत्तरं रात्रिसूक्ते कृते प्रातः पूर्णाहुतितः पूर्वं मत्तिभिस्तिला
ज्यद्रव्येणाष्टाविंशति संख्यया वारुणमंत्रेण होमः कार्यः। स च ऋग्वेदे तत्त्वा यामीति। यजुर्वेदः सामवेदयोः

गन्नः। अमलकांचनवर्णमयानसौ पदमुपैति हरेरमरान्वितः। सकलपापविघातविराजिते पितृपितामहपुत्र
शतत्रयं। नरकलोकसमाकुलमथ यंख्यटिति सोपि नयेच्छिवमंदिरं। कुंडानि। पात्राणि। अरत्निमात्राणीति के
चित्। रत्निमात्राणी त्यत्रारत्निरंगुष्ठपर्वाणि संख्ययावैकविंशतिः। दशांगुष्ठपर्वाणि प्रादेशः परिकीर्त्तितः।
सार्द्धदशांगुलानि प्रादेश इति कल्पतरुः। अरत्निः सार्द्धद्वाविंशत्यंगुलकः। इदं च मानं विस्तारतो गांभीर्यतश्च।
सर्वाण्यपि तोलने समानि। चक्रोपरि रुक्माजिनं तदुपरि तिलास्तदुपरि कुंडानीत्यर्थः। स्थापनं दक्षिणत उ
त्तरोत्तरक्रमेण। ब्रह्मकेशवमहेश्वरभास्करसुराधिपलक्ष्मीपार्वतीनां लक्षणमुक्तं ब्रह्मांडे। सर्वरत्नानीति।
हिरण्यगर्भोक्तानि। द्विविधानि। महारत्नानि गोमेदं पुष्परागं च वैडूर्यं च प्रवालकं। उपरत्नानि चत्वारि कथि
तानि मुनीश्वरैरित्युक्तान्युपरत्नाचेत्यर्थः। वारुणहोमश्च पूर्णाहुतितः पूर्वं स चतुर्थकुंडे घृततिलाज्यद्रव्येणाष्टा
विंशतिसंख्ययेति दामोदरः। इति ददातीति। दाने चतुर्णां पुरुषवदर्द्धं गुरवेऽर्द्धमृत्विग्भ्यो यथेच्छविभागो वा द्रष्टव्यः।

सहस्राक्षशक्तितः॥ संस्थाप्याणि च सर्वाणि कूर्मा जिनतिलोपरि। प्रथमं पूरयेत्कुंडं लवणेन विचक्षणः।
द्वितीयं पयसा तद्वत्तृतीयं सर्पिषा ततः। चतुर्थं तु गुडेनैव दध्ना पंचममेव च। षष्ठं शर्करया तद्वत्सप्तमं तीर्थवारि
णा। स्थापयेल्लवणस्यांते ब्रह्माणं कांचनं शुभं। केशवं क्षीरमध्ये च घृतमध्ये महेश्वरं। भास्करं गुडमध्ये च द
धिमध्ये सुराधिपं। शर्करायां न्यसेल्लक्ष्मीं जलमध्ये च पार्वतीं। सर्वेषु सर्वरत्नानि धान्यानि च समंततः। तुला
पुरुषवच्छेषमत्रापि परिकल्पयेत्। ततो वारुणहोमांते स्नापितो वेदपुंगवैः। त्रिः प्रदक्षिणमावृत्य मंत्राने
तानुदीरयेत्। नमो वः सर्वसिंधूनामाधारेभ्यः सनातनाः। जंतूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः। क्षीरोदका
ज्यदधिमाधवलावणेक्षुसारामृतेन भुवनत्रयजीवसंघान्। आनंदयति वसुभिश्च यतो भवंतस्तस्मान्ममा
थ घाविघातमलं विधध्वं। यस्मात्समस्तभुवनेषु भवत्त एव तीर्थामरासुरद्रुममणिप्रतानं। पापक्षयामृतविलेप
नभूषणाय लोकस्य बिभ्रति तदस्तु ममापि लक्ष्मी। इति ददाति रसामृतसंयुतान् शुचिरविस्मयवान्निहसाग

ततः कृतस्यकल्पलतामहादानकर्मणः प्रतिष्ठार्थमिमांसुवर्णानग्निदैवतानृत्विग्भ्योहंदक्षिणात्सं
प्रददइति शक्तिमासहितदर्शं कल्पलतासुवर्णतृतीयांशदेशंशंवादद्यात् ग्रामादीनावादक्षिणात्वेनदानं।
ततः सर्वैकामसूक्तिं पठेयुः। ततोयजमानः पुण्याहवचनमावाहितदेवतानामुत्तरपूजाविसर्जनंचकृत्वामंडपो
पकरणादिसर्वंगुरवेप्रतिपाद्ययथाशक्तिब्राह्मणान्भोजयेदिति। मीमांसैकधुरंधरः श्रुतिधरोन्यायेपिवागी
श्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः। येविद्वन्मणिशेखरोदिनकरः प्रासूतविश्वेश्वरंतेनाका
रिसुवर्णकल्पलतिकादानेधियापद्धतिः इतिकल्पलतामहादानप्रयोगः अथसप्तसागरमहादानंमा
त्स्ये अथातः संप्रवक्ष्यामिमहादानमनुत्तमं। सप्तसागरकंनामसर्वपापप्रणाशनं। पुण्यंदिनमथा — द्यकृ
त्वंब्राह्मणवाचनं। ऋत्विङ्मंडपसंभारभूषणाच्छादनादिकं। तुलापुरुषवत्कुर्यात्लोकेशावाहनादिकं। का
रयेत्सप्तकुंडानिकांचनानिविचक्षणः। प्रादेशमात्राणितथारत्नमात्राणिवापुनः। कुर्यात्सप्तपलादूर्ध्वमा

179

न्मूले च वायवीं शक्तिं स्थापयेत्। ततउत्तरे तिलद्रोणोपरिलतां तन्मूले च सोमशक्तिं स्थापयेत्। तत ईशान्यां नव
नीतप्रस्थोपरिलतां तन्मूले चैशानीं शक्तिं स्थापयेत्। ततः सर्वलतानां समंताद्दशपर्णकं – नदशधेनूर्दशवस्त्र
युगानि च स्थापयेत्। ततो महावेदीं गृहं वै घोरुपरिविताने बध्नीयात्। अथ संध्योत्तरं रात्रे कृत्से प्रातश्चयजमा
नाभिषेकांते कृते यजमानो गृहीतपुष्पांजलिलताः स्त्रिः प्रदक्षिणी कृत्स प्रार्थयेत्। ॐ नमो नमः पापविनाशि
नीभ्यो ब्रह्मांडलोकेश्वरपालिनीभ्यः। ॐ श्रीसिताधिवाफलाप्रदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः। ततः
पुष्पांजलिना कल्पलताः गंधाद्यैर्गुर्वीर्त्विजःश्च संपूज्य तदनुज्ञातः कुशादीन्यादाय पूर्ववत्फलमुच्चार्यैतादश
दिक्पालशक्तिसौवर्णप्रतिमायुताः सोपस्कराः सुवर्णनिर्मिताः दशकल्पलताः सर्वेषा नामगोत्रे समुच्चार्य गु
र्वीर्त्विग्भ्यो हं संप्रददइति। सर्वीर्त्विदृग्वस्तोपरिस्थितपुरुहस्ते संकल्पयेत्। ततो मध्यमस्थितलताद्वयं गुरवे अव
शिष्टा ऋत्विग्भ्यो दद्यात्। यथेछविभागपक्षेतु ग्रामादीनां गुर्वीर्त्विजः परितोष्य तेभ्योन्येभ्यश्च विभज्य दद्यात्।

पविधिः॥तेनयथेष्टविभागपक्षोभवति इतिकल्पलतामहादानविधिः अथप्रयोगः॥ यजमानोदेशका
लौसंकीर्त्यॐ।महापातकनाशभवभयाभावाभिमतफलदनाकल्पैकाधिकरणकपितामहत्रिंशद्वत्सराव
च्छिन्नवासभवदुरितौघतविताशशुद्धदेहात्मकत्वैकसुरपतिवनितासहस्रबहुसंघपरिवृतपितृशतव.मे
कभवाप्तितारणाब्जसंभवाभिवंद्यत्वकामः श्वः कल्पलतामहादानमहंप्रतिपादयिष्ये इतिसंकल्प्य म
धुपर्कांतंतुलापुरुषवत्कृत्वाषोडशारोपरिपुष्पाणिविकीर्यतदुपरिलवणप्रस्थंनिधायतत्रप्रलकपूर्व
योर्दक्षिणोत्तरयोर्वौलताद्वयंस्थापयित्वाप्रसग्दक्षिणलतान्तरमूलावष्टब्धांब्राह्मींशक्तिंलवणोपरिन्यसे
त्।पश्चोत्तरलतान्तरमूलावष्टब्धामनंतशक्तिंलवणस्याधस्तादुपरिनांन्यसेत्।ततःपूर्वस्योगुडप्रस्थोप
रिलतांतन्मूलेचैंद्रीशक्तिंस्थापयेत्।ततआग्नेय्यांहरिद्राप्रस्थोपरिलतांतन्मूलेचाग्नेयीशक्तिंस्थापयेत्।त
तोदक्षिणतस्तंडुलप्रस्थोपरिलतांतन्मूलेचवारुणींशक्तिंस्थापयेत्।ततोवायव्येशर्कराप्रस्थोपरिलतांत

ब्राह्मीशक्तिभवनस्याधस्ताच्चानंतशक्तिं स्थापयेत्। ते च शक्तीयथक्रमं पद्मशंखधरे कार्ये। लोकपा
लानुसारिण्य इत्युक्तेर्ब्राह्मीहंसवाहना कार्या। एवमन्येपि। अनंतस्यक्तापि वाहनाश्रवणात्तद्वाहित्वमि
तिरूपनारायणादयः। इमेति। गुडोपरिलतां स्थापयित्वा तन्मूलावष्टब्धामिंद्रशक्तिं स्थापयेत्। गुडलत
योर्द्वयोरथाधारत्वश्रवणात्। एवमन्येपि ज्ञेयं। रजन्यां हरिद्रायां स्थितो यो जश्लागस्तत्र स्थिते समर्थः। आ
नले आग्नेयकोणे दक्षिणपरे निर्ऋतिकोणे। इयं च नरस्था। अघोमकत्तः। क्षीरे क्षीरभाण्डे। सौम्ये उत्तरे सोम
शक्तिरिति शेषः। माहेश्वरी चः थीदीशान्यां। मौलिस्य इति दशापि देव्यो मुकुरभाजो द्विभुजा वामहस्तेनो
क्तशस्त्रधारिण्यो दक्षिणहस्तेन वरदाः कघंकान्यतरस्थितबालकाः। कार्याः। लवणादिपरिमाणं वन्ना
न्येल्लुपाकल्पपादपवत्सस्थो वेत्ति इष्टव्यं। महादानार्थं सुवर्णैनैव प्रतिमानिर्माणं तदंतर्गतत्वात्। दशे
तिति। धेन्वादिषु सर्वेषु संबध्यते चकारात्। मध्यम इति। अयं च गुर्वोर्विज्ञात्र संप्रदानत्वपक्ष एव विशे

शांतो परदो मेस्तु समंदगामी॥ शनेः। नीलांबरो नीलवपुः किरीटी करालवक्त्रः स्वकपालशूली। चतुर्भुजः
श्चर्मे धरश्चराहुः/सिंहासनस्थो वरदोस्तु मह्यं। राहोः। धूम्रौ द्विवाहुर्वरदो गदाभृद्‌ग्रासनस्थो विकृताननश्च
किरीटकेयूरविभूषितांगः। सदास्तु मे केतुगणः प्रशांतः। केतोः। देवरूपमयाविप्रकारिकोचनेशुभं। तद्गु
णाप्रदानेन प्रीयतां विश्वरूपधृक्। दशावताराणां प्रत्येकं च। त्रैलोक्यनाथो जगतामधीशो देवाधिपो दैत्य
गणादिहंता। श्रेयोसिमघं प्रददातु दातु देवाग्रजो वज्रधरः प्रशांतः। इंद्रस्य। भक्तोभिदेवं मरुतां तथैकं
मयि प्रभो देवगुरुः प्रशांतः। तव प्रसादादघनाशनं मस्तु वर्लीरूपो सहामरेशः। वास्तुमूर्त्तेः। विनायक गणे
शान सर्वलोकनमस्कृत। पार्वतीनंदन मम पापमाशु विनाशय। गणेशमूर्त्तेः। सौम्यदेव महाभागे सर्वस
र्वदेवनमस्कृते। पद्मासनगते सर्वजगतामार्त्तिहारिणि। स्वरोपघातान्मदायं प्रज्ञाजाड्यं मयानुद। सरस्व
तीमूर्त्तेः। सर्वविद्यास्त्रयं जानकारण ललिताकरं। पुस्तकं संप्रदास्यामि प्रीता भवतु भारती। पुस्तकस्य।

गुरोरवज्ञ्यापघतस्स्वाध्यायाध्ययनकृतां चतुसरस्वतिन्न्मातर्जगद्धी गङ्गाग्पापहारिणी। साक्षाहस्तकलचेत्व
रुद्रादिभिस्स्तुता। जन्मप्राध्ययनोत्पन्नंजाड्यंहरवरानने। घंटादानेनतुष्टात्वंघंटाणी लोकपावघंटायाः। इदंका
वनंचकरंश्मि ज्वालासमाकुलं॥ अयमस्तुविनाग्न्यायसंग्रहणद्विजोत्तमसंग्रहाणद्विजोत्तम। चक्रस्य। अ
थप्राणिनां। कंन्याकनकभरणैर्युतां। दास्यामिविप्लवेतुभ्यंब्रह्मलोकजिगीषया। कन्यायाः। इयंदासीमया
तुभ्यंश्रीवत्सप्रतिपादिता। सदामेकंरीभोयायथे ह्— दमस्तुमे। दास्याः। यज्ञसाधनभूतायाविश्वस्याघप्रणा
शनी। विश्वरूपधरोदेवःप्रीयतामनयागवा। गोः। कपिले सर्वदेवानां पूजनीयाचरोहिणी तीर्थदेवमयीयस्मा
दतःशांतिंप्रयच्छमे। कपिलायाः। यस्मात्वंपृथिवीसर्वाधेनुःकेशवसंभवा। सर्वमस्कहरोनित्यमतःशांतीर्थ
देवमयीयस्मादतःशांतिंप्रयच्छमे। कृष्णधेनोः। यमद्वारेमहाघोरेयासावैतरणीनदी। तातन्तुंत्वाप्रयच्छामिउ
तारयसुखेनमां। वैतरण्याः। उत्क्रांतेतुप्रवृत्तभ्रूसुखोत्क्रांतिसमद्भये। तुभ्यंसंप्रददेसाक्षात्समुत्क्रांतिसंहि

तं। उत्क्रांतिधेनोः। धर्मस्त्वंवृषरूपेणजगदानंदकारकः। अष्टमूर्त्तेरधिष्ठानमतः पाहि सनातन। वृषभस्य॥ इंद्रा
दिलोकपालानां याराज्यमहिषी सदा। महिषीदानमाहात्म्यादस्तुमेसुखमुत्तमं। महिष्याः॥ महिषीवत्सरीयुक्तांसु
शीलां चपयस्विनीं। रक्तवस्त्रेणपुष्पगदलामलुंजयाम्यहं। मत्स्यमहिष्याः॥ विष्णुस्त्वंमत्स्यरूपेणयस्मादमृतसं
भव। चंद्रार्कवाहनो नित्यमतः शांतिं प्रयच्छ मे। अश्वस्य। महाशक्तिर्महाकायः पीतांबरसमप्रभः। सर्वसरामहे
तीवमजोपकृतु मे सुखं। गजस्य। रथापरथनार्थपतनमस्ते विश्वकर्मन्नो विश्वनाथाधिवासाभागवताय मो
नमः॥ रथस्य। यस्मात्वछायपज्ञानामात्मत्तत्वेव्यवस्थितः। यानं विभावसोर्नित्यमतः शांतिं प्रयच्छ मे। छागस्य। दे
वानां यो मुखं हनः सर्वदेवताः। तस्य त्वं वाहनं पूज्यो देवैः सेव्यो महर्षिभिः। अग्निमाधेश्वंकर्मविपाको संतु यन्ममा
नत्सर्वं नाशय क्षिप्रं रोगानन्यान्नाशय। मेषस्य। वाङ्मयः कायजनितं यत्किंचिन्मम दुष्कृतं। तत्सर्वं विलयं यातु
मेषित्वं दानतो मम। मेष्याः॥ अजिनं सर्वदेवत्वं सर्वयज्ञांगमुत्तमं। तस्मादस्य प्रदानेन मम पापं व्यपोहतु। अ

182

जिनस्य।अथवस्त्राणि।शरणंसर्वलोकानांलज्जारक्षणंपरं।सुवेषधारिवस्त्रंत्वमतःशांतिंप्रयच्छमे।वस्त्र
स्य।रक्तवस्त्रयुगंयस्मादादित्यस्यप्रियंसदा।प्रदानादस्यमेसूर्यःसर्वपापंव्यपोहतु।रक्तवस्त्रस्य॥और्णपटम
नध्येयंस्वर्णवीतंतवप्रभो।दत्तंग्रहाणदेवेशपापंसंहरसत्वरं।कर्णपटस्य।ऊर्णीमेषसमुत्थंनाशीतवातभया
पहं।यस्मात्तुषारहारीस्यादतःशांतिंप्रयच्छमे।ऊर्णायाः।पीतवस्त्रयुगंयस्माद्वासुदेवस्यवल्लभं।प्रदानात्तस्य
मेविष्णुरतःशांतिंप्रयच्छतु।पीतवस्त्रस्य।धर्मराजेनविहितंकुसुंबवस्त्रंसुशोभनं।सर्वक्लेशविनाशायकु
सुंभवस्त्रंददाम्यहं।कुसुंभवस्त्रस्य।ब्रह्मसूत्रंब्रह्मसूत्रंमहादिव्यंमयायत्नेननिर्मितं।ब्राह्मंजन्मास्तुमेदेवब्रह्म
सूत्रसमर्पणात्।यज्ञोपवीतस्य।सर्वाधिव्याधिविध्वंसःसततंसुखमुत्तमं।ऊर्णाप्रावरणस्यास्यदानाद्भवतुमे
हरे।कंबलस्य।अथगंधादीनां।चंदनावासमंदारसुखप्रदायका॥चंदनत्वंत्प्रदाने—सानंदप्रदोभव।चंदनस्य।
श्रीखंडागरुकपूरकस्तूरीकुंकुमान्वितं।विलेपनंप्रयच्छामिसौख्यमस्तुसदामम।गंधस्य।समस्ताभ्योपिवस्तु

भ्यः संस्कृतासि सुससुरैः॥ विन्यस्तांगेषु सुखदास्तु सदा मम। कस्तूर्याः॥ कदर्पदर्पदं यस्मात्कर्पूरं घ्राणतर्पणं॥ अ
दर्पेति भवस्तापस्तद्दानादपसर्पतु॥ कर्पूरस्य॥ कर्पूरः कदलाम्भतो देवप्रियः॥ सदा॥ भोग्यो लपो नृणां च तदन्ना॥
त्सखमस्तु मे। अदा मां सुषुद्भवां देवि मेणनाभिसमुद्भवां भक्त्याहं प्रदास्यामि मम संतु मनोरथाः॥ पक्षकर्मस्य॥ प
दं—गसंलग्नकुंकुमादिविलेपनं। जलत्क्रीडासु गोपीनाह्रदस्या जलार्पितं। गोपीचंदनमित्युक्तं मुनींद्रैः। कि
ल्बिषापहं। तस्मादस्य प्रदानेन विष्णुर्दिशतु वांछितं। गोपीचंदनस्य। ह्लादयति मनो यस्मात्तस्मात्सुमनससतां।
दानाद्ददतु मे नित्याह्लादसतीश्रियं। पुष्पाणां। तुलसीपत्रदानाद्यद्धृष्णनः कायसंभवं। पापं प्रणाशयंतु मम सं
तु मनो मनोरथाः॥ तुलसीपत्रस्यापमेषमंत्रः॥ सुवर्णतुलस्या इति सेमप्रकाशः॥ यथा शाखाप्रशाखाभिर्विस्तृता
सि महीतले। तथा मम[illegible]पि संतानं देहि त्वमजरामर। दूर्वायाः॥ सुवर्णदूर्वाया एवंअथ्यमेवेति सेमप्रकाशः॥ व
नस्पतिरसो धूपो गंधाढ्यः समनोहरः। आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां। धूपस्य आज्यं च वर्तिसं

183

दा॰ यो॰
१८३

युक्तं वह्निना योजितं च यत्। दीपं ग्रहाण देवेश त्रैलोक्यतिमिरापहं। दीपस्य॥५॥ अन्नमेव यतः प्राणाग
न्नमेव जनार्द्दनः। अन्ने ब्रह्माखिलं त्राण मस्तु मे जन्मनि जन्मनि॥६॥ अन्नस्य। चंद्रमंडलमध्यस्थं चंद्रांबुदसम
प्रभं। नित्यं दध्यन्नदानेन प्रीयतां वामनो मम। दध्यन्नस्य॥७॥ दध्यन्नं सोपदंशं च ब्रह्मविष्णुशिवात्मकं। प्रीयतां
धर्मराजो मे तद्दानान्मम सर्वदा। सोपदंश दध्यन्नस्य। सर्वात्मा सर्वलोकेशः सर्वव्यापी सनातनः। नारायणः प्रसन्न
स्या ‾ सरान्नप्रदानतः। कृसरान्नस्य। पायसं परमान्नं स्मसर्वदानोत्तमोत्तमं। सर्वदैवतयोग्यं च श्रेयः पुष्टिं प्रय
च्छतु। पायसान्नस्य। केशवः प्रीयतां भक्त्या रंभुत्रलार्कतुष्टिदाः। पृथग्विधापूपकाघायकं तु व ‾ मोरसं। भ
क्ष्याणां। आदित्यतेजसा त्पक्वं जातिमैस्सकरं परं दत्तं मे मम विघ्नत्वं प्रयच्छापूपमुत्तमं। अपूपानां। विष्णुरूपी स
हस्रांशुः सर्वपापप्रणाशनः। अपूपान्नप्रदानेन मम पापं व्यपोहतु। मलमासीयन्नयस्त्रिंशदपूपानां। आदि
त्यतेजसोत्पन्नाः सर्वमंगलकारकाः। मंडकाः सर्वपापघ्नाः अतः शांतिं प्रयच्छत। मंडकानां। प्राजापत्यायनः

१८३

प्रोक्ताः सक्तवो यज्ञकर्मणि। तस्मात्सक्तून्प्रयच्छामि प्रीयतां मे प्रजापतिः। सक्तूनां। धान्यं करोति दातारमिह लो
के परत्र च। तस्मात्प्रदीयते धान्यमतः शांतिं प्रयच्छ मे। धान्यस्य। अन्नं प्रजापतिप्रोक्तमन्ने प्राणाः प्रतिष्ठितः।
तथा चान्नप्रदानेन प्राणिनां जीवनं सदा। तस्माद्व्रीहिप्रदानेन शांतिरस्तु सदा मम। व्रीहिधान्यस्य। अन्नेन
जायते विश्वं प्राणिनां प्राणरक्षणं। तंडुला वैश्वदेवस्याः पाकेनान्नं भवंति ये। पावना सर्वयज्ञेषु प्रशस्ता यज्ञ
कर्मणि। तस्मात्तंडुलदानेन प्रीयतां विश्वदेवताः। तंडुलानां। धान्यराजाश्च मांगल्या द्विजप्रीतिकरा यवाः
। तस्मादस्य प्रदानेन ममास्त्वविकलं फलं। यवानां। यस्मादन्नमया भक्ष्या यवगोधूमसंभवाः। गंधर्वसौख्य
धनदा अतः शांतिं प्रयच्छ त। गोधूमानां। अन्नं प्रजापतिः साक्षादन्नमेव जनार्दनः। अन्नाद्भवंति भूतानि ज
गदन्नेन वर्द्धते। प्रियंगुश्यामादिसप्तधान्य एतेषां प्रजापतिर्देवता। मुद्गबीजानि वै यस्मात्प्रियाणि परमेष्ठि
नः। तस्मादेषां प्रदानेन प्रीतिः सिध्यतु मे सदा। मुद्गानां। यस्मान्मधुद्रवे काले विष्णुदेहसमुद्भवाः। पित

(184)

प्रीतिकराः माषा अतः शांतिं प्रयछत । माषाणां । पुरा गोवर्धनोद्धारसमये हरिभक्षिताः । चणकाः सर्वपाप
घ्ना अतः सर्वं प्रयछ मे । चणकानां । आनिवर्णोद्भवानाम बलपत्कीर्तिवर्धनाः । कुलित्थाः सर्वपापघ्ना अतः शां
तिं प्रयछत । कुलित्थानां । तिलपापहरानित्यं विष्णोर्देहसमुद्भवाः । तिलदानेन सर्वं मे पापं नाशय केशव । ति
लानां । सोमदेवता तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः । विष्णुप्रीतिकराणि स्मतः शांतिं प्रयछ मे । सहि
रण्यतिलानां । देवदेव जगन्नाथ वांछितार्थफलप्रद । तिलपात्रं प्रदास्यामि तवांगे संस्थितेरिह । तिलपात्रस्य ।
तिलाश्च सोमदेवत्या गोसवे देवनिर्मिताः । स्वर्गप्रदास्ततेत्राश्चते मां रक्षंतु नित्यशः । महातिलपात्रस्य । तिला
प्राण्या पवित्राश्च सर्वैकर्मकरास्मृताः । शुक्लाश्चैव तथा कृष्णाविष्णवाघाः समुद्भवाः । यानि कानि च पापानि ब्र
ह्महत्यासमानि च तिलपात्रप्रदानेन तानि नश्यंतु मे सदा । प्रायश्चितार्थं तिलपात्रस्य । सगुडं तिलसंयुक्तं ग्रासं प्री
तिकरं नृणां । वर्द्धितं च गृहाणेदमतः शांतिं प्रयछ मे । ग्रासस्य । प्रतिग्रासमहं दास्ये तुभ्यं संपत्करं शुभं । जन्म

जन्मनि मेभ्यास्तंततिर्यासवर्द्धिनी। प्रतिग्रासस्य। कामधेनोः समुद्भुतं देवानामक्ष्मं हविः। आयुर्विवर्ध
नं पुंसां आज्यं पातु सदैव तु। आज्यस्य। अमृतस्य द्रुतोत्पन्न इक्षुस्तद्रस शर्करा। सर्वप्रीतिकरो नित्यमतः शां
तिं प्रयच्छ मे। शर्करायाः। मनोभवगृहे मध्यादुद्भूता शर्करा इति। तस्मादस्य प्रदाने न मम संतु मनोरथाः। एवं
डस्य। प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा। तथा रसानां प्रवरः सदैवेक्षुरसो मतः। मम तस्मात्परां ल
क्ष्मीं ददस्व गुड सर्वदा। गुडस्य। कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं परं। नवनीतं प्रदास्यामि बलं पुष्टिं च दे
हि मे। नवनीतस्य। अलक्ष्मीहरणं नित्यं सुखसौभाग्यवर्द्धनं। क्षीरं मंगलमायुष्यमतः शांतिं प्रयच्छ मे दुग्ध
स्य। क्षीरजानां तथा शंखा क्षीरादमृतसंभवः। क्षीरात्क्षीरोदकी कीर्तिः क्षीरे प्राणस्य संभवः। तस्मात्क्षीरप्र
दाने न मम संतु मनोरथाः। क्षीरस्य। पवित्रं मंगलं चैव कुंदेंदुधवलं दधि सर्वमंगलं यस्मादतः शां० दध्नः। य
स्मात्पितॄणां श्राद्धेषु प्रियमस्य मतोद्भवा तस्मात्तव प्रदानेन रक्ष मां दुर्गसागरात्। मधुनः। क्षौद्रा रसवने दिव्ये पि

तृणंमपिदुर्लभं। तस्मादस्यप्रदानेनममसंतुमनोरथाः। अर्थंच। रसोनामयग श्रेष्ठंलवणंबलवर्धनं। ब्रह्म
णानिर्मितंयस्मादतः शां॰ लवणस्य। सर्वदेवप्रियंयस्माछाकंतुष्टिकरंनियं। ददामिसर्वमंगल्यमतः शांतिं
प्रय॰। शाकानां। सोमोद्भवानिदारूणिजातवेदप्रियाणिच। तस्मादेषांप्रदानेन। श्रेयंदेहिविभावसो। क
ष्ठानां। जरानजायंतेयस्मान्मंडनंशुभकर्मसु। तस्माज्जीरकदानेनप्रीयतांगिरिजापतिः। जीरकस्य। कटु
रसमिदंयस्माद्रोगघ्नंसर्वदेहिनां। तस्मादस्यप्रदानेनप्रीतोभवतुभास्करः। शुंठमरीचिपिप्पलीनां। लक्ष्मी
प्रियाचलक्ष्मीदालक्ष्मीवनसमाश्रया। सौभाग्यकृद्वरस्त्रीणांहरिद्राश्रीप्रदास्तुमे। हरिद्रायाः। तैलंपुष्टि
करंनित्यंआयुष्यंपापनाशनं। अमंगल्यहरंपुण्यमतः शां॰ तैलस्य। यालक्ष्मीयाचमेधास्वयंसर्वगात्रेष
वस्थितं। तत्सर्वंशमयत्वाज्यंलक्ष्मीपुष्टिविवर्धनं। आरोग्यार्थस्याज्यस्य। अथोदकं। मंत्राः पानीयं
परमंलोकेप्राणिनांप्राणलक्षणं। जलशायीजगद्योनिः प्रीयतामस्यदानतः। जलस्य। ओंनमः शंकर

शंभुर्भवोदाता शिवोहरिः।प्रीयतांमेमहादेवोजलकुंभप्रदानतः।जलकुंभस्य। एषधर्मघटोदत्तोब्रह्मविष्णुशि
वात्मकः।अस्यप्रदानात्सकलाममसंतुमनोरथाः।प्रत्यहंदीयमानस्यधर्मघटस्य।कमंडलुजले· पूर्णः स्वर्ण
गर्भसुलक्षणः।अर्पितस्तेमहासेनप्रसन्नस्तेनमेभव।कमंडलोः।प्रपेयंसर्वसामान्याभूतेभ्यः प्रतिपादिता।अ
स्याःप्रदानात्पितरःतृप्यंतुचपितामहाः।प्रपायाः।आपः पवित्रंलोकानांमप्रकाशेतेजनार्दनः।मणिकासुप्रदाने
नप्रीयतांजलशायिकः।मणिकस्य।वापीकूपप्रदानेतुजलदानमंत्रएव।उत्सर्गमंत्रः पूर्तेद्योते।तांबूलंश्रीकरंभद्रंब्र
ह्मविष्णुशिवात्मकं।अस्यप्रदानाच्छ्लाघ्याश्रीयंयच्छंतुपुष्कलं।तांबूलस्य।यथानकृष्णशयनंशून्यसागरजा
तया।शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनि।शय्यायाः।इहामुत्रातपत्राणंकुरुकेशवमेप्रभो।छत्रंत्वत्प्रि
त्येदत्तंब्राह्मणायनवंशुभं।छत्रस्य।उपानहौप्रयच्छामि।कंटकादिनिवारणे।परित्राणायमेतेविप्रगृह्णात्वंसुखा
यच।उपानहोः।अनडुद्वयसंयुक्तंलांगलंकर्षणक्षमं।सजीवायस्करंपुण्यंददामिप्रीयतांहरः।लांगलस्य।दर्शनेनव

186

दा॰ द्यो॰
१८६

मादर्शनं णां मंगलदायकं। सौख्यसौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव। आदर्शस्य। त्वं देवानां मनुष्याणां राक्षसाना
मथायघ। तस्मात्तव प्रदानेन तृप्तिर्भवतु मे सदा। आयुधानां। भगवन् शूलहस्तेश दक्षाध्वरविनाशन। तवा
युध प्रदानेन शूलं नश्यतु मे सदा। शूलस्य। सर्वग्रहकृतो देशः सर्वेशा त्वं हि भास्कर। संक्रांति शूल दानेन निवारय
दिवाकर। संक्रांतिशूलस्य। देवदेव जगन्नाथ व्यजनं शैत्यकारकं। पितॄणां वल्लभं नित्यं गतः शांतिं प्रयच्छ मे। व्यजनस्य।
देवदेव जगंनाथ विरूपाक्ष व्ययानघ। प्रभो शिविकया देव प्रीतो भव जनार्दन। शिविकायाः। पुण्य स्त्वं सर्वपुण्याना
मंगलानां च मंगलं। विष्णुना विधृतो नित्यमतः शांं०। शंखस्य। सिंधुरागरुसंभूत गौरीसीमंतसंगत। गजास्येन ध्
तं मर्भेदा नामे स्यादभीप्सितं। सिंदूरस्य। इदं फलं मया विप्रस्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्म
नि। फलस्य। ब्रह्महत्यादि पापानां ब्रह्मणा निर्मितं पुरा। कूष्मांडं बहुबीजाढ्यमतः शांं०। कूष्मांडस्य। पूरितं पूगपू १८६
गेन नागवल्लीदलान्वितं चूर्णेन येन पात्रेण कर्पूरपिष्टकेन वा। कर्पूरखंडनं दिव्यं गंधर्वाप्सरसां प्रियं। करत्वं निरा

तं कुंत त्वत्प्रसादात्कुरुष मे॥ करं कस्य। कंटकोछिष्टपाषाणवृश्चिकादिदिवाकरे। पादुके संप्रदास्यामि विप्रप्री
त्या प्रगृह्यतां। पादुकामंत्रः। हिरण्यगर्भः शत्रुघ्नः परमात्मा जगन्मयः। दंमादानेन दत्तेन प्रीतो भवतु सर्वदा। क
दल्याः। इक्षुदंडं महपुण्यरसालं सर्वकामदा। तुभ्यं दास्यामि तन्नात्सुप्रीतो मे परमेश्वरः। इक्षोः। इदं गृहं गृहाण त्वं
सर्वोपस्करसंयुतं। तव विप्रप्रसादेन ममास्त्वभिमते फलं। गृहस्य। व्यतीपात नमस्तेतु सोमसूर्यसुत प्रभो। यद्दाना
दिकृतं किंचित्तदिहाक्षयमस्तु मे। व्यतीपातस्य। इति श्रीमत्सकलविद्याविशारदधौरेयमीमांसककुलावतंस
भट्टनारायणात्मजभट्टरामकृष्णसुतदिनकरतनयगागाभट्टापरनामविश्वेश्वरसूरिविरचिते दानदिनकरद्योते स
कलवस्तुदानमंत्रनिरूपणं। अथोपदानानि। तत्रादौ जंबूद्वीपदानं हिमाद्रौ ब्रह्मांडे। शृणु देवी महादानं जंबु
द्वीपाख्यमेव तु यत्। पुण्येह्नि पुण्यनक्षत्रे पुण्याकाले तु सर्वतः। विषुवत्ययनादौ च ग्रहणे चंद्रसूर्ययोः। व्यतीपाते
थवा कुर्याज्जन्मर्क्षे वा विशेषतः। अष्टम्यां पंचदश्यां वा निसंवा दानमाचरेत्। पुण्यदेशेषु सर्वेषु नदीदेवालयादिषु।

दा.यो. यतेर्गृहेवादातव्येश्मशावायत्रजायते। विप्रंतुवेदविद्वांसंगुरुंसंपूज्ययत्नतः। भूलेपनादिकंकार्यंसर्वंविप्रेणकारये
१८७ त्। विलेपयेत्सर्वभूमिंगोमयेनसवारिणा। तत्रविंशतिहस्तंतुलेपयेत्परिमंडलं। लवणेनोदधिंतत्रपरितःपरिकल्प
येत्। प्रादेशमात्रंविस्ताराद्दक्षिणेनपार्वती। तत्राक्षताभिर्विकिरेश्वेतपुष्पैःसमंततः। तन्मध्येकारयेन्मेरुंधान्य
भारत्रयेणवैमेरुर्महाश्रीर्हिमयस्तुमध्येसुवर्णकल्पद्रुमसंयुतस्यात्। पूर्वेणमुक्ताफलवज्रयुक्तोयाम्येनगोमेदकपु
ष्परागैः पश्चाच्चगारुत्मतनीलरत्नैःसौम्येनवैडूर्यसरोजरागैः। श्रीखंडखंडैरभितःप्रवाललतान्वितःशुक्तिशिला
तलःस्यात्। शुक्लांबराण्यंबुधरावलीस्यात्पूर्वेणपीतानिचदक्षिणेतु। वासांसिपश्चादथकर्बुराणिरक्तानिचैवोत्तर
तोघनाली। ब्रह्मातुमध्येकमलासनस्थश्चतुर्मुखःकांचननिर्मितांगः। चतुर्भुजश्चात्रनिवेशनीयोदधत्स्रुवंचात्र
कमंडलुंवा तथाक्षसूत्रंजपसाधनंचकृष्णाजिनंचोपरितत्रबिभ्रत्। गंगांचतुर्धापरितोविधायचतुर्दिशंचोदक १८७
पूर्णरूपां। रौप्यान्महेंद्रप्रभृतीनथाष्टौ। संस्थाप्यलोकाधिपतीन्क्रमेण। नानाद्रिजौघानिचराचतानिमृगांश्चसर्व

त्रनिवेशनीयाः।पूर्वेणमंदरगिरिर्यवतंडुलाभ्यांशुक्लांवरेपरितःपरिवेष्टितश्च।पश्चात्तिलाचलमथोपरिकर्बुराभं
वासःसपिप्पलहिरण्मयहंसयुक्तं।आकारयेद्विपुलमत्रसुगंधपुष्पैरौप्येनशक्तिघटितेनविराजमानं।संस्थाप्यतंवि
पुलशैलमथोत्तरेणशैलंसुपार्श्वमपिमाषमयंसुवस्त्रं।न्यग्रोधवृक्षमपिहेममयंसुधेनुंरौप्यैश्चशक्तिघटितैश्चतैश्शु
भंविधायमेरोश्चपुष्पाभरणंचकार्यं।घृतोदकग्नश्रवणंचदिक्षु।क्षीराज्यदध्नामधुनासरांसिप्रागादितेषांचयथाक्र
मेण।श्रीहेमकूटनिषधाःक्रमसश्चयाम्येसौम्येचनीलसितशृंगयुताःक्रमेण।प्रादेशमात्रंपरिमाणविमिश्रितास्ते
प्रागायताःसुपरिवस्त्रयुताश्चसर्वे।प्रत्येकमत्रखलुवर्षछदपर्वतानांभारेणधान्यपपरिमाणमुशंतिसंतः।शत्तमा
चरौप्यकृतपक्षियुगाश्चसर्वेसौगंधिपुष्पफलवस्त्रयुगाविधेयाः।आनीयनिषधाद्यामौमाल्यवद्गंधमादनौ।तेषाम
ध्यगतौमेरुस्तौचधान्यविनिर्मितौ।निषधःपरिपात्रश्चमर्यादापर्वताविमौ।मेरोःपंचमभागेनयथातौगंधमादनौ।
गंधमादनकैलासौपूर्वपश्चायताविमौ।श्वेततंडुलनिर्माणौदक्षिणोत्तरतःस्थितौ।सितांतःप्रमुखाःसर्वेदक्षिणेककु

188

दा॰ खो॰ भादयः। शंखकूटादयश्चैव उत्तरे परिकीर्तिताः। तान्त्रीन् केशरशैलांश्च कृत्वा धान्यलताशुभान्। वस्त्रैरावेष्ट्य शैलेंद्रं मे
१०८ रुमन्यांश्चैव पूरयेत्। दक्षिणं भारतं वर्षं तत्किंपुरुषसंवृतं हरिवर्षं ततः प्रोक्तं मेरोर्दक्षिणतस्ततः। इलावृतं वृतं मेरोः चतुर्थं
वृषभं तथा। रम्यं हिरण्मयं तस्मात् कुरवश्चैति चोत्तरा। भद्राश्वकेतुमालश्च पूर्वपश्चिमतः स्थितौ। प्रोक्तानि नववर्षा
णि जंबूद्वीपे तु मानतः। हिमाद्रिमध्ये देवेशं श्रियं च विनिवेशयेत्। प्रासादाभिमुखावेतौ कांचनेन विनिर्मितौ। शंख
चक्रगदापाणिपीतवाससमच्युतं। किरीटकेयूरधरं श्रीवत्सांकितवक्षसं। सद्मासने समासीनां पद्महस्तां सुलोचनां। प्र
सन्नवदनां देवीं तस्य दक्षिणतो न्यसेत्। कैलाशमध्यतो मंच तांश्चैव समाचरेत्। मां च शंकरनामानं। त्वं च गौरीं वरान
ने। चतुर्भुजं वृषस्थं च जटिलं चंद्रमौलिनं। खट्वांगशूलवरदाभयहस्तेन मां न्यसेत्। मदुत्संगगतां त्वां च दर्पणेंदीव
राञ्चितं। भद्राश्वे भगवंतं च हयरूपमुखं हरिं। सौवर्णं स्थापयेद्देवं भारते कूर्मरूपिणं। वाराहं केतुमाले वै मत्स्यं कुरुषु
चोत्तरे। सौवर्णेन थ वा रौप्यान् स्थापयेत्तु यथाक्रमं। एवं जं — द्वीपं कृत्वा चैव यथाविधि। अर्घपाद्यासनं स्नानं अ १०८

यंवस्थापनक्रमः। व्रह्मादयस्तथादेवाः शैलाः कल्पद्रुमास्तथा स्वनाममंत्रैः पूजाहीतदर्पितेः। गंधपुष्पनमस्कारधू
पैर्दीपफलैस्तथा। ततोपहरणाद्यैश्च पूजयित्वाप्रयत्नतः। भद्राश्ववर्षे हेमंतमार्पेषा च समाचरेत्। स्वनाममंत्रै
र्होतव्यं स्वाहाकारसमायुतैः। दशोत्तरंशतं हुत्वा व्रह्मणे मखे तथा। इतरेषां च सर्वेषां माष्टोत्तरशताहुतीः। स्नानार्थं
यजमानस्य पुरतः कलशान्न्यसेत्। आढकोदकपूर्णं च सकूर्चं चैव स्त्रवेष्टितं गंधासुमनससस्यकुशाग्रान्वि निवेश
येत्। याश्चश्रेयो विधास्यंति ताश्चानावाहयेततः। गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च। आयांतु यजमानस्य
दुरितक्षयकारकाः। इत्यावाह्य ततस्तस्य कलशं विमलोदके। अभ्यर्च्य गंधपुष्पाद्यैः स्थापयेत्प्रीतिपूर्वकं। स्नापये
त्ताम्बुरत्नं तत्र दातारं कलशोदकैः। अग्निर्वरुणदेवीभिः पावमानीभिरेव च। दानकाले च संप्राप्ते दाता नारी नरोथ
रा। स्नापितो गुरुणामंत्रैसार्द्धं दानं समाचरेत्। त्रिः पदक्षिणमावृत्य गृहीतकुसुमांजलिः। प्रत्येकं पर्वतान्सर्वान्प्र
णिपातपुरःसरं। मध्यमं गुरवे दद्यादिमं मंत्रमुदीरयेत्। अन्यस्मै वा प्रदातव्यं तस्यानुज्ञामवाप्य च। यथादिभू

रादिसमस्तलोकास्त्वयिस्थिताभूधरनाथनित्यं। अमरोत्तमास्सुरलोकनाथब्रह्मादयो देवगणाश्च नित्यं। त्वत्सं
प्रदानादहमथ शेषैः पापैर्विमुक्तस्तु यथा भवेयं। श्रेयस्तथा पर्वतराज मह्यं कुरुष्व भो देववरैश्च सार्धं। इतीदमुक्त्वा
प्रददातु मे हंसकं चन्द्रराज तव स्वयमुक्तं॥ प्रत्येकमेकं द्विजपुंगवानां भागादिदद्यादितरान्क्रमेण॥ सुराणाममम
तार्थकृते त्वया कृतं मदरशैलराश्यं। तथा च मां रक्षतु सर्वतस्त्वं तव प्रदानाद्धिरजो यथाहं॥ गंधादिमादन इतीरित
भूधरेंद्र वेदे तथापि गरुडामन नमोस्तु तुभ्यं। त्वत्संप्रदानहृतपापसमस्तदोषस्तापादिशैलवर रक्ष च मामजस्रं। देवा
लयाय पिशलाय नमोचलाय हंसाय वेदपुरुषाय नमोच्युताय। युष्मत्प्रदाननिहताखिलपापराशिं हंसेन सार्धम
मराचल पाहि मां त्वं। वेदेषु पार्श्वममराचलमप्रमेयं धेनुं च देवसुरभिं प्रणतोस्मि नित्यं। त्वद्दानभक्तियुतसात्त्विकप
याहमद्यत्वामेव यामि शरणार्थमवेहि मां त्वा। श्रीवत्सयस्समनादिमजसमस्तलोकाधिपं सकलकारणमच्यु
तं च। नारायणं शरणमेहि पाप धरेंद्रैः सार्द्धं श्रियाहिमवतिष्ठितमादिमीडे। देवादिदेवगण पूजितपादपद्मयुग्मा

यभक्तजनदुःखविनाशनायकैलासशैलनिलयायभवायनित्यंगौरीप्रियायवरदायनमःशिवाय। यत्कीर्तनादिनि
धनःशरणागतंमांभयाश्चनाममनिगतोहरिरच्युतोसौ॥ आस्तेहयाननवत्सरसनकादियोगिपुंगैरभिष्टुतपुरातनकी
र्तिश्रुक्तः। मध्येमहार्णवहिमाचलयोर्निवसंकुमोकृतिंशरणमेमिभवाभवायपारावरंमथितमत्रसदादधातियस्तंन
मामिसुरप्रणिततमयमेयं। वाराहरूपिणमनंतमनंतकेतुंस्वेकस्यरूपिणमनेकशिरोक्षिपादं। वंदेमहीधरममेयमपार
कीर्तिंयज्ञेशमेमिशरणंहरिमीशतारं। देवस्तथोत्तरकुरुष्वपिनिलमास्तेमत्स्यःसुरेंद्रगणपूजितपादपद्मः। रक्षत्वशेष
जगतोप्यविरच्युतोसौसंसारदुःखचलितंशरणागतंमां॥ उक्तैवमेवमघनाशनदानमत्रप्रत्येकमेकमथतंद्विजपुं
गवाय। भुक्त्वाशुभानिमनसेछतियानिचासौगच्छेत्स्वयत्रननिवर्तयतीहमर्त्यः। गुरवेदक्षिणांदद्यात्सुवर्णंचैववा
ससी। यागोपकरणंसर्वंगुरवेनिवेदयेत्। इत्याहभगवान्प्रीतःपार्वत्यापरमेश्वरः। अहमप्यद्भुवंसर्वंपुष्पकंमु
निसत्तमाः॥ इतिकंचुकीप्रदानं। अथसप्तद्वीपदानं। ब्रह्मांडे। शृणुदेवमुनेदानंसप्तद्वीपाख्यमुत्तमं। यत्कृत्वापृथि

वीदाने फलं सर्वमुपाश्नुते। पुण्यकालेषु सर्वेषु चंद्रसूर्यग्रहादिषु। देवागारादि देवेषु पुण्येष्वायतनेषु च। विप्रगु
रुवेदविदं च दक्षं विद्यापदं च गुणमान्नत्र र्णं। समां भूमिं लेपयेद्गोमयेन। सवारिलोप्यु चितत्रापि मध्ये कृत्वा द्वीपं
जंबुसंज्ञं पदन्यतत्त्वद्वस्ये सप्तनामानि विद्धि। जंबुप्लक्षाह्वयौ द्वीपौ शाल्मलश्च तथापरः। कुशः क्रौंचश्च शाकश्च पुष्कर
श्चैव सप्तमः। एते द्वीपाः समुद्रैस्तु सप्तभिरावृताः। लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समं। जंबुद्वीपः समस्तानां एतेषां
मध्यमः स्मृतः। तस्यापि मेरुर्देववर्षे मध्ये कनकपर्वतः। प्लक्षद्वीपस्य विस्तारः षोडशांगुल इष्यते। पादाधिकस्तथा
न्येषामुत्तरोत्तरमुच्यते। षोडशाद्रोण धान्यैस्तु प्लक्षद्वीपं प्रकल्पयेत्। ततः पादाधिकं प्रोक्तमन्येषामुत्तरोत्तरं। विस्तार
एष द्वीपानामुदधीनां च सर्वशः। लक्षादि पंच द्वीपेषु वर्षभूधरनिम्नगाः। प्रत्येकं सप्तसप्त स्युः श्वेततंडुलनिर्मि
ताः। पुष्करे भूधरस्त्वेक मध्यतो वै वलयाकृतिं। वर्षद्वयं तथा वान्यनामतः श्रूयतां मुने। प्लक्षे शांतमयं चैव शिशि
रं सुखदं तथा। आनंदं च शिवं चैव क्षेमं तद्ध्रुवमेव च। गोमेदः पर्वतश्चंद्रो नारदो दुंदुभिस्तथा। सोमकः सुमनाश्चैव

घ वैभ्राजस्सप्तपर्वताः। अनुतप्ता शिवा चापि अंविका[illegible]त्रिदिवी क्रमात्। अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः।
क्षसंतु प्रथमे वर्षे मध्यतो विनिवेशयेत्। पलेन वा यथाशक्ति तदर्धेन विनिर्मितं। तस्यार्ध्वे देवदेवेशं सर्वलोकगुरुं ह
रिं सोमरूपंधरं देवं सौवर्णं विनिवेशयेत्। श्वेतो हरितजीमूतो रोहितो विद्युतस्तथा नर्मतः सुप्रभः सप्तवर्षाण्येते च प
र्वताः। कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकाः। कंकश्च महिषश्चैव कुकुद्मान् सप्तमो गिरिः। योनिस्तोयानितृष्णा च
चंद्रा शुक्ला च मोचिनी निवृत्तिः सप्त ता[illegible]नद्यश्च शाल्मले परिकीर्तिताः। उद्भिदो वेणुमांश्चैव सुरथो लवणो दृतिः। प्रभा
करश्च कपिलपर्वतान् शृणु नारद। मणिद्रुमो हैमवतो द्युतिमान् पुष्पवांस्तथा। कुशोधेमश्च हरितो मंदरः सप्तमस्तथा।
धूतपापा शिवा चापि पवित्रा समिता तथा। द्युदंभा महिषी चैव सर्वपापहरा तथा। कुशस्तंबं कुशद्वीपे क्रौंचे तानि नि
बोध मे। वर्षाणि भूधराश्चैव विष्णुश्च पर एव च। अंधकारो मुनिश्चैव दुंदुभिः सप्तमस्तथा। क्रौंचश्च वामनश्चैव
अंधकारोथ पंचमः। पुंडरीको दुंदुभिश्च सप्तैते सुरिहाचलाः। गौरी कुमारी संध्या च रात्रिश्चैव मनोजवा यक्षा दि

द॰ टी॰ पुंडरीकश्चसप्तसप्तउदाहृताः।शाकमध्येशाकवृक्षोवर्षेलक्षेवनिम्नगाः।सप्तसप्तचदेववर्षैश्च्यूयतांगदतोमम।जल
१९१ दश्चकुमारश्चसकुमारीमणीचकः।कुसुमो-मोदश्चसप्तमश्चमहाद्रुमाः।सुकुमारीकुमारीवनलिनीवेणुका
तथा।इक्षुकावेणुकाचैवगभस्तिःसप्तमीतथा।पुष्करेतुमहापद्माधातकीतिप्रकीर्तिताः।मध्यतोवलयाकारोमा
नसोत्तरचपर्वतः।न्यग्रोधवृक्षःपूर्वेतुब्रह्मणःस्थानमुच्यते।सप्तमपुष्कराद्वीपस्तद्देवसमावृतः।एवंद्वीपाःसमुद्रैश्च
सप्तसप्तभिरावृताः।द्वीपैश्चैवसमुद्रैश्चसमंताद्द्विगुणाःपरैः।द्वीपमानान्द्रुमान्सर्वानावृतान्विनिवेशयेत्।तथा
पश्चिमगान्मत्स्यान्पूर्वतोदधिमुक्षिपेत्।जंबुद्वीपाधिपंविष्णुंतत्रचैवनिवेशयेत्।प्लक्षेसोमंशाल्मलेवायुदपं
कुशद्वीपेत्वनलरूपंवरुणं।क्रौंचेरुद्रंशाकसंज्ञेतुसूर्यंआर्त्तरूपंपुष्करेदेवदेवं।कृत्वाचैकंचतुर्व्यूहमूर्तिंहिरण्य
गंजगतामीशमाद्यं।ब्रह्माल्यपद्मेनजलेनमंत्रैःसंप्रोक्ष्यदर्भैश्चनिधापदेशान्।सवेष्टवस्त्रैश्चपयोधरेंद्रान्
समंततोविकिरेत्पुष्पवृष्ट्या।अर्घ्यादिभिर्द्रव्यमतेस्वहस्तैःसंपूज्यमेरून्प्रथमाश्चसर्वान्।स्वनाममंत्रैश्च १९१

नमोस्तुतेश्वस्वाहस्तुतेः पूर्वविद्योममंत्रः। यथापुरातनचतथैवकुर्यात्देवाधिशैलेंद्रवनस्पतीनांपूर्वेद्युरेवंविधिना
समाप्यगुरुश्चतत्राधिवसेन्निशायां। निशासुचेद्दानमतस्तथैववस्त्रादिदानंचततः क्रमेण। ततः प्रभातेविमलेतु
दानकालेततास्नापितधौतवस्त्रः॥ यथापूर्वंजंतुसंज्ञप्यवोक्तंतथादानेसादरंकारयित्वा। ततोविप्रान्स्वज्ञातेषांक्रमेतांदा
पयेन्मंत्रपूर्वंततश्च। सोमंगांतुब्जलस्त्वंचचंद्रंतथास्वर्मंत्र स्तवणोरूपमाद्य। वीरुधौषधिवृक्षाणांमृगाणांजगतांप्रभो।
आह्लादजननोयस्मात्तस्मात्त्वंशाहिमांसदा। ॐ अंतर्बहिश्चतत्सर्वंव्याप्ययोजगतस्थितः। सदागतिरमेपाल्मारक्षत्वया
हतस्कंधो। यःकर्त्तीजगतांपालाब्रह्मस्तलोकपितामहः त्वंसंप्रदानाद्देवेशश्रेयश्चास्तुसदामम। रक्षार्थंदेवदेवानांजग
तामपिशंकरः। त्वयात्रिपुरंदग्धंसदामेसंप्रसीदतु। उदेसत्तमनेयातिनिसंयातिजगत्रयं। प्रसस्त्संसर्वलोकानांयो
सौमेसंप्रसीदतु। सर्वस्थितिविनाशानांकारणंजगतामसौ। हिरण्यगर्भोभगवान्सदामेसंप्रसीदतु। इत्येवमेभिर्द्वि
जपुंगवानांप्रत्येकमेकंचयथाक्रमेण। दद्यात्तदागुरवेदक्षिणांचवासःसुवर्णादधिकंहिरण्यं। कृत्वासप्तद्वीपपर्यंत

दा॰ षो॰ भूमिं दत्वा देवान् जातरूपान् क्रमेण दद्यात्तस्मै गुरवे दानशेषं संभोगोपांगं धान्यवस्त्रादि पूर्वं आदावंते पंचभिर्विभवयैः पुण्या
१९२ हं वस्वस्तिमद्धिं च वाच्याद्यात्तेभ्यो दक्षिणां जातरूपं वासो धान्यं भोजयेद्ब्राह्मणांश्चा सम्यग्विधिफलं यदन्नमेवं कृत्वा तु नार
दः नारी वा पुरुषो वाथ वैरंचं लोकमाप्नुयात्। उवाच नारदायैवं भगवांल्लोकभावनः। तथा मयापि तत्सर्वं प्रोक्तं वै मुनिस
त्तम। अथान्यानि महादानानि। कौर्मे। कनकाश्वतिलानागादासीरथमहीगृहाः। कन्या च कपिला धेनुर्महादानानि वै द
श। महीदानं चातिदाने पूर्व्यं तत्र भवतीति वक्ष्यते। तत्र सुवर्णदानं बह्वृचश्रुतौ। हिरण्यदा अमृतत्वं भजंत इति। अम
तत्वं मरणाभावः दीर्घमायुर्हिरण्यद इति मनूक्तेः। वह्निपुराणे। अग्निस्तु देवताः सर्वाः सुवर्णं च तदात्मकं। तस्मात्सु
वर्णं ददतां प्रीतास्युः सर्वदेवताः। दत्वा पूर्वान् परांश्चैव नरकान्तारयंतिते। सुवर्णं ये प्रयच्छंति प्रोवाचेदं बृहस्पतिः। सर्वा
न्कामान्प्रयच्छंति ये प्रयच्छंति कांचनं। मरीचिर्भगवान्स्वयंपितामहसुतोऽब्रवीत। यः सुवर्णं नरो नित्यं ब्राह्मणेभ्यः
प्रयच्छति। सो चिरं विरजो विंद्यादेववद्दिवि मोदते। कृत्वापि सुमहत्पापं जातरूपं ददाति यः। स सद्यस्तेन पापेन मु १९२

च्यतेनात्रसंशयः। ब्रह्मांडे। सुवर्णंपरमंदानंसुवर्णंदक्षिणापरा। पवित्राणांपवित्रंचदानानांनात्रसंशयः। बृहस्प
तिः। अग्नेरपत्यंप्रथमंसुवर्णंभूर्वैष्णवीसूर्यसुताश्चगावः। लोकास्त्रयस्तेनभवंतिदत्तायःकांचनंगांचमहींचद
द्यात्। विश्वामित्रः। यत्रास्तेलिखितागेहेस्वर्णदानस्यसंस्कृतिः। रक्षोभूतपिशाचाद्यास्तंनपश्यंतिभार्गव।
वसिष्ठः। तस्माद्योवैप्रयच्छेतहिरण्यंसर्वदैवतं। स्वर्लोकेराजराज्येनसोभिषिच्येतभार्गव। दशपूर्वांदशैवान्यां
स्तथातांस्तारंतितेसुवर्णंयेप्रयच्छंतिसेवंमांपितरोब्रुवन्। नंदिपुराणे। कृष्णलाःपंचमाषस्तुमाषैषोड
शभिःस्मृतं। सुवर्णमेकंतद्दानाद्दत्वास्वर्गमवाप्नुयात्। तस्मात्स्वशक्त्यादातव्यंकांचनंमानवैर्भुवि। नातः
परतमंलोकेस्वतःपापविमोचनं। सुवर्णस्यतुशुद्धस्यस्कवर्णंयःप्रयछति। बहून्यब्दसहस्राणिस्वर्गलोके
महीपते। सुवर्णंद्वितयंदत्वाअक्षयांगतिमाप्नुयात्। दत्वासुवर्णस्यशतंद्विजेभ्यःश्रद्धयान्वितः। ब्रह्म
लोकमनुप्राप्यब्रह्मणासहमोदते। आदित्यपुराणे। आदित्योदयसंप्राप्तौविधि—विमंत्रपुरस्कृतांददातिकांचनं

दा॰खं॰ १९२

योवैदु। स्वप्नं प्रति हंति सः। कालिकापुराणे। गुंजां गुंजार्द्धमात्रं वा नियतः प्रतिवासरं। कनकं न्यस्य लिंगे तु ब्रजे
त्पदमुत्तमं। अथ सुवर्णदानविधिः। कृती देशकालौ संकीर्त्य दशपूर्वापरस्ववंश्यसहितात्मतारणहंसबर्हिणयु
क्ताप्सरोगणाकीर्णभास्वरार्कवर्णविमानकरणककगमनभास्वत्स्वतेजोविराजितदिव्यगंधवहत्वकामो वा सुवर्णमहा
दानमहं करिष्ये इति संकल्प्य पात्रे हिरण्यं च संपूज्य। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनंतपुण्यफलदम
तः शांतिं प्रयच्छ मे। इति पठित्वा आग्नेयं हिरण्यं तुभ्यं संप्रददे इति दत्वा यथाशक्ति दक्षिणां दत्वेश्वरार्पणं कुर्यात्। ए
कमाषदाने पंचवर्षाधिकरणकस्वर्गतिवासकामः। कृष्णलपरिमितदाने एकवर्षाधिकरणस्वर्गनिवासकामः।
एकसुवर्णदाने सर्वपापक्षयपूर्वकस्वर्गलोकमहितत्वकामः। स्रुवर्णद्वये क्षयगतिप्राप्तिकामः। सुवर्णशते तत्र ब्र
लोकप्राप्तिपूर्वकमोदनकामः। देयाधिक्ये फलस्याधिक्यं वोध्यं। वित्ताधिक्यात्फलाधिक्यमिति न्यायनिदर्शना
दिति कौर्मता। इति हिरण्यदानप्रयोगः। आयुरारोग्यवृद्धिकामो हेमदास्ये इति संकल्प्या। आढकं तंदुलपूर्णपा १९३

त्रै अर्द्धढकतिलपूर्णपात्रेनत्रतत्र आढकचतुर्थांशमितघृतपूर्णपात्रे निधाय तत्र निष्कं तदर्धं तदर्धं वा हेम निधाय
शंभुं विप्रहेमनीसंपूज्य आत्मच्छायां घृते दृष्ट्वा शिवः प्रीयतामिति सर्वं विप्राय दत्वा यथाशक्ति हेमदक्षिणां दत्वेश्वरा
र्पणं कुर्यात्। इति हेमदानप्रयोगः। अथ शतमानदानं। ब्रह्माऽगवेन भूमिं शकृता जलेन आलिख्य मध्ये सिततंदु
लैश्चसरोरुहं केसरभूषणाढ्यं सकर्णिकं चाष्टदलं विलिख्य तस्मिन् हिरण्यं शतमानमात्रं निधाय तस्योपरि तं वि
न्यस्य। ब्रह्माणमीशं कमलासनस्थं। माराध्य गंधादिभिरादरेण। विप्रं तथा वेदविदं वरिष्ठं विचिंत्य बुध्या तु समर्चे
यित्वा। दद्यात्सुवर्णं शतमानमस्मै संप्रीयतामात्मभूरित्युदीर्य। यो सौ दानं शतमानं हिरण्यं दद्यादायुः सर्वमेवेति चो
क्तेः। अतः कुर्यान्नारदेन सकृद्धानि संमासे हायने शक्तितो वा। जांबूनदं जातरूपं सुवर्णं कांचनं तथा हिरण्यं चेति शब्द
नि क्रमादेतानि नारद। सकलकलुषक्षयसंपूर्णायुरारोग्यसंतानैश्वर्यसकलमंगलावाप्तिपूर्वकस्वर्गलोकप्राप्तिका
मः शतमानदानं करिष्ये इति संकल्प्य गोमयलिप्ते देशे तिलतंडुलैरष्टदलं विधाय तत्र यथाशक्ति कुड्मलपदिशात

दा·खो·

१९५

मानमात्रं हिरण्यं निधाय तत्र ब्रह्मरुद्रौ संपूज्य पात्रं पूजयित्वा आत्मभूः संप्रीयतामिति मंत्रेण दत्वा यथाशक्ति दक्षिणां
दत्वा जांबूनदं जातरूपं सुवर्णं कांचनं तथा। हिरण्यं चेति नामात्रिवारं जपित्वा कर्मेश्वरार्पणं कुर्यात्। इति शतमानदा
नप्रयोगः॥ अथानंददानं। गारुडे। कारयेत्कार्तिकांते वा माघ्यां वा माधवेपि वा। अयने विषुवे चापि मन्वादिषु युगा
दिषु। चंद्रसूर्योपरागे वा स्वशक्त्यौदुंबरं घटं। पिधानं राजतं तन्मध्ये सौवर्णमुत्सृजेत्। नानारत्नवराढ्याणि नानार
त्नानि संवृतं। हेमराजतताम्रोद्यैः सरकैरनिपूरितं। नानानानामयुतादूर्ध्वमयुतादपि शक्तितः। द्वितीयो नानाशब्दो
नाणके महाराष्ट्राणां प्रसिद्धः। तेन नानासंख्याकैः प्ररव्येदिस्पर्धैः। शक्त्या पलसहस्रेण शतेनार्द्धशतेन वा। तदर्द्धार्द्धे
न वा राजन्यलाढीनं न कारयेत्। कार्येतदूर्ध्वहेम्ना वित्तशाठ्यमकुर्वता। राजतेनाथ नाणेन रत्नैर्वा वस्त्रसंवृतं।
नानाधान्योरिस्थाप्य कल्पोक्तैरर्चयेत्पदैः। पौराणिकं पुराकृतस्स्वयं वा तदनुज्ञया। राजतेन पिधानेन ताम्रे
णाथ घटानंतं। कृतकृत्योग्निसान्निध्ये विष्णोरीशस्य वांडज। इमामुच्चारयेन्मंत्रं कुशपाणिः प्रसन्नधीः॥ मंत्रः

१९५

प्रयोगे। एवं पूज्यविधानेन नित्यानंदनिधिं सुधीः ॥ससिद्धार्थकदूर्वांचसकुशाक्षतचंदनैः॥ तिललाजासमा
युक्तं भस्माखुदकमुत्सृजेत्॥ मंत्रेणानेन विधिवत्कृत्वोक्तेन रत्नगेश्वर॥ मंत्रः प्रयोगे॥ एवमुत्सृज्य मुद्रकं
विप्रेभ्यः प्रतिपादयेत्॥ संविभज्य यथाशास्त्रं न कंचिदपमानयेत्॥ यस्मान्महादानमिदं तस्मादेकोपि नार्हति॥ अ
थान्ये केचिदिच्छंति समस्तविधिपारगाः॥ यद्ब्राह्मणरतानां वा पुंसामेकोपि चार्हति॥ एवं यः कुरुते दानं नित्यानं
दनिधेः परं॥ स करोति सकृद्राज्यमक्षये वेधसः पदे॥ किंचाखिलमहाराज्यं प्राप्नोति वैतसंज्ञिके॥ नित्यानंदनि
धानस्य प्रदानादपवर्गभाक्॥ अथ प्रयोगः॥ कर्ता देशकालौ संकीर्त्य वेधःपदाधिकरणकरस्मोत्तरस्वकर्मशेष
संचितत्रेतायुगादिकालीननिजानुजीविसहिताखिलमहीराज्यावाप्तिदीर्घाविच्छिन्नसेतानकामः श्व आनंद
निधिदानं करिष्ये पूति संकल्प्य नांदीश्राद्धांते आचार्यं वृत्वा आचार्यः कर्तैव वा सर्षपविकरणभूमिं प्रोक्षणे कृ
त्वा मही द्यौरिति भूमिं स्पृष्ट्वा ओषधय इत्यष्टादशधान्यानि निधाय तस्मिन्यथाशक्ति ताम्रकृतं घटं निधाय॥ त

दा॰ यो॰ १९५

स्मिन्द्वादशपलमितं सुवर्णा।मितोधिकं वा नवरत्नमहारत्नयथाशक्तिसंख्यास्वर्णरूप्यताम्रमुद्राश्च संस्थाप्य
द्वादशनिष्कमितरौप्यकृतपिधानेन पिधाय सूक्ष्मवासो हूलेन वेष्टयित्वा तस्मिन्घटे आनंदनिधये नम इति ना
ममंत्रेणानंदनिधिमावाह्य नाममंत्रेण संपूज्य पुष्पांजलिं गृहीत्वा प्रार्थयेत्। ॐ नमः सर्वदानंद सर्वसंपद्विव
र्द्ध्यास्मान्समभ्येह आपुष्पापद्रासभश्रिया। नमस्तेनंतसंतानसदानंदसदोद्य। त्वंसुखं वै कुरुष्वेह संततसामोघतानु
पा। नमो नमः पद्मनिधे धनेशाद्यातकृताग्नेयमनैऋतेशाश मंनयास्मदुरितं दुरिष्टं। मभिष्टदो मे भव शंबरेशा नमो
नमः पाशाधराप्रमेयनमोस्तु वामायस्तुनामधेया। नमः समीरायहुताशनाय नमोस्त्वनंताय गजाननाय। न
मः सुरः श्रेष्ठ हरीश्वराय नमोस्तु सा विरिंचिशिरोवश्रीयेति। सरस्वतीप्रीतिरतिः क्रियेतिसुपुष्टितुष्टिस्थितिशांति
कर्त्री। सर्वेश्वराणां निधिरप्रमेयस्त्वमेव देवर्षिमुनीश्वराणां। आधारभूतोसि चराचरस्य विश्वस्य तस्मात्वणतो १९५
स्म्यहं त्वा। नमस्सौंदर्यनिधे समुद्र नमोस्तु गंभीरनिधे सुरेशा। नमो नमः कांतिनिधानदूरो तेजोनिधे त्वां प्रणतोस्मि

भाने। नमः पद्माय भद्राय नमस्ते स्वस्तिकाय च। नमः शंखाय मणये मणिभद्राय ते नमः। नमो नंदिविवर्तीय नंद्याव
र्त्ताय नंदिने। नमः कूटककर्णीयकंठावर्त्ताय ते नमः। नमो मंदप्रतिष्ठापन मो हेमाद्रिपाय च। नमो हिरण्यगर्भाय नित्या
नंदाय ते नमः। इति सर्षपदूर्वाचंदनाक्षतलाजातिलयुक्तं पुष्पांजलिं प्रक्षिप्य कुशाग्राक्षयपूर्वोक्तं फलम् द्यार्घं अद्ये
ह पुण्यकालेस्मिन् द्विजदेवाग्निसंनिधौ मया। श्रेयाभिवृद्धिसिध्यर्थं मातापित्रोस्तथात्मनः। पुराणन्यायमीमांसावेद
वादिभ्य एव च। विप्रेभ्योनेकशर्मभ्यो निस्यानंदनिधिं परं। अहं संप्रददे तेभ्यो नानानानानाहृतेन च। तर्पणेन रूप्यताम्रेण स
रत्नेन सवाससा। सोपस्करेण उरुषो ब्रह्मविष्णुशिवात्मकः। प्रीयतां निधिदानेन श्रीयज्ञपुरुषोच्युतः। इति मंत्रैर्भूमावु
दकमुत्सृजेत्। ततः कृतस्यानंदनिधिदानकर्मणः प्रतिष्ठार्थं सुवर्णमग्निदैवतं संप्रददे न मम इति दक्षिणां दद्यात्। त
तो यस्य स्मृत्येति जपित्वा कर्मेश्वरार्पणं कुर्यात्। इति गागाभटपूरितदानदिनकरोद्योते आनंदनिधिदानप्रयोगः। अथ
भद्रनिधिदानं। आग्नेये। पुण्यां तिथिं प्राप्य तु पौर्णमास्यां तथोपरागे शशिसूर्यपर्व। चतुर्युगादिष्वयनद्वये च भवनर्त्तयेद्वा

१९४

दा·दी· नमथोक्तरूपं।कुर्यादथोदुंबरमेककुंभं।हिरण्यमानेनयथास्वशक्त्यातथापिधानंचसुराजतंस्याद्धिरण्यभारेणतुपूर
१९५ येतत्।तदर्धतोर्धेनतदर्धतोवास्वशक्तितःस्वर्णपलैःशतेन।तदर्द्धमर्द्धेनतुसर्वशक्त्यापलत्रयादूर्ध्वमपिप्रकुर्यात्।त
त्रभांडेकनकंनिधायस।वज्रनीलोत्पलपद्मरागं।सुमुक्तवैडूर्यसुविद्रुमंचतद्राजतेपात्रमधोमुखंस्यात्।एवंतुतंभ
द्रनिधिंतुविहीनंकृत्वासनेप्रवरणोनयुक्ते।कुशोत्तरंदर्पणचामराढ्ये।सुपादुकोपानहछत्रयुक्ते।तत्क्षौमवस्त्रोत्तरपुष्प
युक्तेसंपूज्यमंत्रप्रवरैरथैतैः।आदौतुपंचामृतमाप्यविष्णुंसंस्नाप्यसंसारहरंसमर्च्य।तथेश्वरंपावकमेवहुत्वाआमंत्र
येद्रत्ननिधिंततस्तंमंत्रयोगे।श्रीखंडकर्पूरसुकुंकुमेनपंचाक्षरंत्वामभिश्रियःप्रलिख्य।नमस्तथोंकारयुतंचपात्रेतद्राज
तेप्येवमथार्चयेतत्।एवंप्रपूज्यविधानेनततोविप्रमथार्चयेत्।किरीटांगदनिष्काग्र्यकुंडलांगुलिभूषणैः।अलंकृत
हारिंतहूपीतांबरधरस्ततः।पूजयेदच्युतंध्यात्वामंत्रेणानेनभक्तिमान्।मंत्रःप्रयोगे॥एवंपूज्याहृदिध्यात्वातंद्विजंविष्णु १९६
रूपिणं।ततोभटनिधिंदद्यान्मंत्रेणानेनमानवः।स्वगोत्रोच्चारणेनाथविप्रोनाममहात्मनः।यवदर्भतिलैःसार्धमुदकंसंपरि

त्यजेत्। मंत्रः प्रयोगे। एवमुच्चार्य तं दद्याद्द्विजाय हरिरूपिणे। गोप्यं न विनयाद्द्याद्धमसंख्यानकीर्त्तयेत्। प्रकीर्त्तिते कोटि
युगायुतं फलं प्रयोगोपि तेकल्पगतैर्न संक्षयः एवं कृते स्यान्मनुजः कृतार्थो भवेन्न च स्यान्मरणं कदाचित्। प्रयाति विष्णोः
पदमव्ययं तच्छिवात्मकानंदमयं स साक्षात्। अथ प्रयोगः॥ कर्त्ता तिथ्यादि संकीर्त्य पापक्षयसकलपितृसंतारणनित्या
नंदविवृद्धिशिवात्मकानंदमयाव्ययविष्णुपदप्राप्तिकामो भद्रनिधिदानं करिष्य इति संकल्प्याचार्यं रत्वा पंचवर्णैरष्टद
लं विलिख्य तत्र सप्तधान्योपरि भद्रनिधिं क्षौमवस्त्रद्वयावृतं संस्थाप्य परितो दर्पणचामरपादुकोपानहछत्राणि स्थाप
येत्। ततो विष्णुप्रतिमां शिवप्रतिमां चाग्न्युत्तारणपूर्वकं निधेः पूर्वतः स्थापयित्वा पंचामृतेन संस्नाप्य षोडशोपचारैः
संपूज्य निधिरैशान्ये पश्चाद्वा कुंडे स्थंडिले वा स्वगृह्योक्तविधिनाऽग्निं प्रतिष्ठाप्य इदं विष्णुर्त्र्यंबकमिति मंत्राभ्यां मष्टो
त्तरशतसंख्याया तिलाज्यं हुत्वा श्रीखंडकुंकुमकर्पूरैः रोंश्रियेनम इति पंचाक्षरमंत्रं निधिमध्ये पिधाने च लिखित्वा ते
नैव मंत्रेण पुनः संपूज्य गृहीतकुसुमांजलिर्निधिं प्रदक्षिणीकृत्य प्रार्थयेत्। नतनसमस्तामरसिद्धयक्षविद्याधरेंद्रोरग

दा·प्रो· किंनरैश्चागंधर्वविद्याधरदानवैर्दैत्यैर्वृतंविश्वमिदंनमस्तेसमस्तसंसारकरित्वमेवविभोः सदानंदमयीचमापासम
१९० स्तकल्याणनिधिः समाधिर्हरिर्ह्रियेभद्रनिधेनमस्ते। ततः पुष्पांजलिंनिधौप्रक्षिप्यनमस्कृत्याचार्यंवस्त्रकिरीटांगद
निष्काग्र्यकुंडलांगुलीयकैश्चंदनादिभिश्चसंपूज्यभूदेवोसिविभोनित्यंनित्यानंदमयोहरेहरमेदुःकृतंकर्मकृपाकरन
मोस्तुते। भूदेवभगवन्भगभवभंगकरेश्वरभवभूतिकरोजिष्णोप्रभविष्णोनमोस्तुते। इतिप्रार्थयेत्। ततः कृष्णच्छादा
यत्वगोप्रमुखापद्रव्यौक्तफलमुख्यार्थमभद्रनिधिंसरत्नधातुत्रयपालकंसक्षौमांबरंसादर्शपादुकोपानहासनवस्त्र
चामरयुतंविष्णुरूपिणेतुभ्यंसंप्रददइतिदत्त्वापितृसंतारणार्थायनित्यानंदविवृद्धये। सर्वाघौघविनाशायविष्णोर्दानं
मयाकृतं। तदनेनसरत्नेनधातुत्रययुतेनचसक्षौमांबरयुक्तेनसादर्शपादुकेनच। सासनेनसछत्रेणचामरोपानहेनच।
सभद्रनिधिदानेनप्रीयतांविष्णुरीश्वरइतिपठेत्। आचार्यः स्वस्तीत्युक्त्वाकामस्तुतिंपठेत्। ततः कृतभद्रनिधिदानस्यप्र १९०
तिष्ठार्थमिदंसुवर्णमग्निदैवतंदक्षिणांसंप्रददइतिदेयसुवर्णतृतीयांशंदशांशंवासवर्णमात्रंवादक्षिणांदद्यात्। ततो

भूयसीं ब्राह्मणभोजनं च संकल्प्य कर्मेश्वरार्पणं कुर्यात्। इति गागाभट्टकृतो भट्टनिधिदानप्रयोगः। अथ प्रसंगात्
रजतदानं। स्कांदे। यः प्रयच्छति विप्राय रजतं चापि निर्मलं। स विधूयाशु पापानि स्वर्गलोके महीयते। रूपवान्सुभगः श्री
मानिह लोके च जायते। मात्स्ये। पितॄणां राजतं पात्रमथवा रजतान्वितं। शिवनेत्रोद्भवं यस्मात्तस्मात्तत्प्रीतिवल्लभं। अमंग
लं च यज्ञेषु देवकार्येषु वर्जितं। रजतं दक्षिणामाहुः पितृकार्येषु सर्वदा एवमेव तद्देवता रुद्रः। अथाश्वदानं। स्कांदे। अश्वं
यस्तु प्रयच्छेद्धैमचित्रं सुलक्षणं। स तेन कर्मणा देवगंधर्वलोकमश्नुते। भारते। सर्वोपकरणोपेतं सुवानं दोषवर्जितं। योश्वं
ददाति विप्राय स्वर्गलोके महीयते। कालिकापुराणे। अश्वं तन्मूल्यमथवा कनीयो मध्यमोत्तमं। दद्याद्वित्तानुसारेण ना
रागणपरिच्छदं। नारागण इति तारानुकार्यलंकारः। शफैः पंचपलैरौप्यैस्ताम्रैर्वाश्वणभूषितं। सदक्षिणं सवस्त्रं च दत्वा
सायुज्यमाप्नुयात्। हरेरिति शेषः। ब्रह्महत्यादिपापानि उपपापानि यानि च। तानि सर्वाणि नश्यंति हयमेधेन निश्चितं। अ
थ प्रयोगः। दिशकालौ संकीर्त्य अश्वलोमसमसंख्यवर्षभोग्यस्वर्गकामो गंधर्वलोकप्राप्तिकामो वाश्वदानं करिष्य इति सं-

कल्प्य विप्रमश्वं च संभूत्य उच्चैःश्रवास्त्वमश्वानां राज्ञां विजयकारकः। सर्पिणा हनमस्तुभ्यमतः शांतिं प्रयच्छ मे। विष्णुस्त्व
मश्वरूपेण साक्षादमृतसंभवः। चेद्रस्य वाहनं नित्यमतः शांतिं प्रयच्छ मे। इति मंत्रं पठित्वा इमाश्वं तारगणनामकालंकारस्व
र्दिवं वारुणं याम्यं वा तुभ्यं संप्रददे न ममेति दत्वा यथाशक्ति दक्षिणां दत्वा कर्मेश्वरार्पणं कुर्यात्। प्रतिगृहीता कर्णे प्रति
गृह्णीयात्। अथाश्वेताश्वदानं। गारुडे। श्वेतमश्वं तु यो दद्यात्फलं दशगुणं लभेत्। अश्वदानाद्दशगुणमित्यर्थः। वड
वां च तथा दत्वा तुल्यमेव फलं लभेत्। गारुडे। अश्वमेधमखं यस्तु कलौ कर्तुं समीहते। अश्वदानं तु तेनेह कर्तव्यं विधि
पूर्वकं। विधिं तस्य प्रवक्ष्यामि ब्रह्मणा निर्मितं पुरा। अनेन चाश्वमेधफलकृत्वं सच्यते। श्वेतमश्वं शुभं स्नातं हेमपर्याणभू
षणं। रौप्यैस्तु कटकैः शुद्धैः करिदंतोपशोभितं। वस्त्रनेत्रं ताम्रखुरं क्षौमपुच्छं सुवाससं। शुभेन पट्टकूलेन संवृतं स्वास्तु धान्यि
तं। धान्यरत्नोपरि छंतु बद्धकक्षं सुपट्टकं। एवंयुतेजसं चाश्वं ब्राह्मणाय निवेदयेत्। मन्वादौ च युगादौ च अयने वि
षुवे तथा। चंद्रसूर्यग्रहे चैव अश्वं दत्वा सुखी भवेत्। अथ प्रयोगः। अश्वदानफलदशगुणफलप्राप्तिपूर्वकब्रह्म

हृत्यादिसकलपापक्षयत्रिंशत्सर्वापरपितृद्धरणपूर्वकाक्षयस्वर्गादिलोकप्राप्तिकामः श्वेतमश्वं दास्य इति संकल्प्याश्वं
संस्थाप्य यथाशक्तिवक्ष्यमाणालंकारभूषितं विधाय मार्तंडाय तुर्वेगाय कृष्णपापनिमूर्तये। जगद्दीपाचसूर्यायात्रिवे
दाय नमो नम इति मंत्रेणाश्वं संपूज्य तेनैव मंत्रेण तूष्णीं वाश्वकर्णयोस्तिलांजलीन्दत्वा फलमुच्चार्येमं श्वेताश्वं हे
मपल्याणभूषितं रौप्यकटकं करिदंतवज्रमयनेत्रं ताम्रमयखुरं क्षौमपुच्छं स्वर्णतिलकोपशोभितं सुवद्धकक्षं स्वा
सुधान्वितं सुग्रैवेयपट्टं पट्टकूलसंवृतं धान्यरत्नोपरिस्थं वरुणदेवतं ममदैवतं वा तुभ्यं संप्रददे न ममेति कर्णे धृत्वा
समर्प्य महार्णवे समुत्पन्न उच्चैश्रवसपुत्रक। मया त्वं विप्रमुख्याय त्तोदह्य सुखी भव। इमं विप्र नमस्तुभ्यमश्वं ते
प्रतिपादितं। प्रतिगृह्णीष्व विप्रेमं मया दत्तं सुशोभनमिति पठित्वा तेन च प्रतिग्रहमंत्रे पठिते सुवर्णदक्षिणां दत्वा अ
श्वाग्रतः सप्तपदानि गत्वा कर्मेश्वरार्पणं कुर्यात्। वडवादानेपि श्वेताश्वदानवत्प्रयोगः॥ अथ तिलदानं। व्यासः।
महर्षेः कश्यपस्यैते गात्रेभ्यः प्रसृतातिलाः। मात्स्ये। विष्णोर्देहसमुद्भूताः कुशाः कृष्णतिलास्तथा। संवर्त्तः। नित्यं नै

मित्तिकेकाम्ये तिलान्दत्वा स्वशक्तितः॥ प्रजावान्पुत्रवान्नित्यं धनवान्जायते नरः॥ कृष्णाजिने तिलान्कृत्वा सुवर्णमधुसर्पिषा॥ द्रोणैकं वाससाछन्नं त्रिधातच्छत्तदक्षिणं॥ आहिताग्नौ द्विजे दत्वा सर्वं तरति दुष्कृतं॥ त्रिधेति द्रोणेकं द्रोणद्वयं द्रोणत्रयमिति पक्षत्रयपरमिति हेमाद्रिः॥ तद्वयितिपक्षत्रये क्रमादेकद्वित्रिसुवर्णदक्षिणामित्यर्थः॥ अथ प्रयोगः॥ देशकालौ संकीर्त्य सर्वदुरितक्षयपूर्वकप्रजाधनप्राप्तिकामः तिलानदास्ये इति संकल्प्य कृष्णाजिने द्रोणत्रयं द्रोणं वा॥ तिलान्कृत्वा वाससाछाद्य यथाशक्तिसुवर्णमधुसर्पिर्भ्य संछाद्य फलमुच्चार्य मां तिलान्तुभ्यमहं संप्रददे न ममेति दत्वा महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः॥ तस्मादेषां प्रदानेन मम पापं व्यपोहत्विति पठित्वा यथाशक्तिसुवर्णं दक्षिणां दद्यात्॥ द्रोणे सुवर्णः॥ तद्द्वये सुवर्णौ॥ तत्रये सुवर्णत्रयमिति हेमाद्रिः॥ अथ तिलराशिदानं॥ यमः॥ शुक्लैः कृष्णैर्यथालब्धैर्द्वात्रिंशदंगुलोच्छ्रितः॥ राशिस्तिलैः समे देशे कर्तव्यः पुरुषायतः॥ यथाविभवविस्तारो यदिवा शक्तितो नरैः॥ प्रतिमाषडंगुलास्थाप्या सौवर्णी तत्र माधवी॥ सौवर्णी सुवर्णकृता॥ अग्रे शक्त्यावेति पक्षांतरोक्तेः॥ क्षौद्रेण पयसा दध्ना

घृतेनापूरयेद्बुधान्। स्थापयेत्तत्र तत्सम्यक्पुष्पस्त्रावस्त्रभूषितं। घटचतुष्टयं क्षौद्रादिभिः पूरयित्वादिक्षु संमंलात्
स्थापयेदित्यर्थः। शत्त्मावाह्यचर्चेतत्सर्वंब्राह्मणेश्रोत्रियेर्थिने। दद्यान्माघेथवैशाखेविषुवेचोत्तरायणे। मंत्रोवक्ष्य
ते। एवमुच्चार्य तत्सर्वं ब्राह्मणाय निवेदयेत्। यावज्जीवकृतं पापं तत्क्षणादेव नश्यति। अथ प्रयोगः। यावज्जीवपा
पक्षयकामस्तिलराशिं महादानं करिष्ये इति संकल्प्य शुचौ देशे द्वात्रिंशदंगुलोच्चं वृत्तरूपायतं यथाशक्त्यायतं वा तिल
राशिं कृत्वा तत्र सुवर्णपरिमाणसुवर्णनिर्मितां वामदक्षिणोर्द्ध्वकरस्थितशंखचक्रां वामदक्षिणाधःकरस्थितपद्म
गदां माधवप्रतिमां संस्थाप्य पूर्वादिचतुर्दिक्षु मधुदुग्धदधिघृतपूर्णांश्चतुरः कलशान्संस्थाप्य विष्णुमंत्रेण प्रति
मां विधिंच संपूज्य फलमुष्टिरघ्येमं तिलराशिं माधवप्रतिमासहितं चतुर्दिक्स्थितमधुदुग्धदधिघृतपूर्णचतुःकुंभं वि
ष्णुदैवतं तुभ्यमहं संप्रददे न ममेति दत्वा। अज्ञानाद्यदि वा मोहाल्लोभाद्वा जन्मजन्मनि। अर्जितं यन्मया किंचिद्दुष्कृतं मधुसू
दन। तत्सर्वं विलयं यातु दानेनानेन माधवेति। पठित्वा यथाशक्ति दक्षिणां दद्यात्। अथ तिलपद्मदानं। भारते। तिलप

200

प्नमितिख्यातं दानं ते कथयाम्यहं। माघमासे तु संप्राप्ते शुक्लपक्षे द्विजोत्तम। गोमयं मंडले कृत्वा चतुरस्रं महामते। नववस्त्रं
समास्तीर्य कृष्णाजिनसमन्वितं। द्रोणवरांस्तिलांस्तत्र निधाय वसनोपरि। द्रोणः अवरः कनिष्ठः। द्रोणान्न्यूना नदेयाः इत्यर्थः
। पद्ममष्टदलं कृत्वा शुभं तत्कलशोपरि। स्थापयेत्तत्र देवेशं सुवर्णत्रयनिर्मितं। श्रीनिवासं जगन्नाथं भुक्तिमुक्तिप्रदाय
कं। ध्यायेच्चतुर्भुजं देवं प्रणतार्तिहरं हरिं। हिरण्यगर्भममृतं श्रीगर्भं परमं परं। शंखचक्रगदापाणिं पीतवाससमच्युतं। श्री
वत्सांकं जगद्बीजं सर्वकारणकारणं। कविं पुराणं विश्वेशं पुंडरीकनिभेक्षणं। आसीनं कर्णिकामध्ये सर्वशक्तिसमन्वितं।
कृतांजलिपुटो भूत्वा नमस्कृत्य पुनः पुनः। पूजयेत्परमेशानं श्रद्धावित्तानुसारतः। इंद्रनीलमहानीलमणिमुक्ताफलादि
भिः। आराध्य च यथान्यायं त्वा देवदेवं जनार्दनं। गंधैः पुष्पैस्तथा दीपैर्नैवेद्यैश्च मनोहरैः। क्षीरान्नैर्घृतपक्वैश्च फलैर्दिव्यैर्नरे
कभा। पुष्पाणां प्रकरैश्चैव गीतनृत्यादिभिस्तथा। इत्थमाराध्य देवेशं तांबूलं विनिवेदयेत्। तैलप्रस्थं घृतप्रस्थं दत्वा कर्म
नतः परं। स्थापयेत्ताम्र्वतस्तस्य धान्यपात्राणि षोडश। एवमाराध्य तस्यं तिलद्रोणमयं शुभं। एकरात्रं द्विरात्रं वा त्रिरा · २००

त्रमथवाद्विजः। तिलाहारोभवेत्सर्वमुपवासमथापिवा। कुर्यात्तिलकापथ्यर्थंवासुदेवमनुस्मरन्। ततोदद्याच्चतत्सम्यंशु
चिर्भूत्वासमाहितः। विख्यातकुलशीलायब्राह्मणायकुटुंबिने। प्रीयतांमाधवोदेवइत्युक्त्वातमनुस्मरन्। हिरण्यगर्भ
देवेशपद्मनाभजनार्दन। हिरण्याक्षगुणाधारसर्वाधारधरेश्वर। धनधान्यसमृद्धंचसर्वसंपत्समन्वितं। पुत्रपौ
त्रादिसंयुक्तंदासीदाससमन्वितं। आरोग्यंचसुमंत्रंचसर्वदुःखविवर्जितं। कुरुमांपरमोदारंभक्तोयमितिचिंतय
न्। इत्थंप्रसाद्यदेवेशंवासुदेवंसनातनं। दद्यात्तिलमयंपद्मंसर्वकामसमृद्धये। ब्राह्मणश्चापिगृह्णीयाद्वच
पेत्तुप्रतिग्रहं। कोदात्कस्मा अदादितिवैदिकमंत्रमुच्चरेत्। एवंतिलमयंपद्मंयोददातिविधानतः। सर्वसत्वस
माकृत्यैर्नरकंसनपश्यति। स्वयंभवतिपूतात्मापितॄन्थपितामहान्। प्रपितामहांश्चधर्मात्मातारयत्यसा। विलं
कुलं। धर्मार्थीधर्ममाप्नोतिधनार्थीधनमाप्नुयात्। मोक्षार्थीमोक्षमाप्नोतिनात्रकार्याविचारणा। पानकीमु
च्यतेपापात्पितृघ्नोगुरुतल्पगः। सर्वपापरतोवापिमुच्यतेनात्रसंशयः। यस्तुराजाधनपतिःसमृद्धोतीवधार्मि

201

दा॰पो॰
२०१

कः॥ आराध्य विप्रं विधिना वस्त्रालंकारभूषणैः॥ वाहनादिभिरन्यैश्च ग्रामक्षेत्रादिकैस्तथा यत्फलं जायते
तस्य द्विजदानपरस्य च। परिछिन्नं भवेन्नतु नात्र कार्या विचारणा॥ अथ प्रयोगः॥ माघशुक्लपक्षांतगतिपुण्य
दिने पूर्वेद्युरहं द्व्यहमेकाहं वा तिलाहारमुपोषणपरो वा देशकालौ संकीर्त्य सकलपापक्षयपूर्वकं नरकाद्गृनपित्रा
द्यखिलकुलसंतारणपूर्वकं धर्मार्थमोक्षप्राप्तिकामः तिलपद्मदास्ये इति संकल्प्य गोमयेन चतुरस्रं मंडलं कृत्वा
तत्र कृष्णाजिने तदुपरि च वस्त्रमास्तीर्य पूर्ववत् यथाशक्त्यधिकान् तिलान् पद्माकारान्निधाय तत्कर्णिकायां
स्वर्णत्रयपरिमितहेमनिर्मितां शंखचक्रगदापद्मपाणिं नीहरिप्रतिमां संस्थाप्य वैष्णवमंत्रेण षोडशोपचारैः
संपूज्य पायसं घृतपक्वं नैवेद्यं समर्थप्रस्थपरिमितं तैलघृते च समर्पयेत सार्ध्वतो यथाशक्ति धान्यपरिपूर्णान् षो
डश घटान् संस्थाप्य हिरण्यगर्भ देवेश पद्मनाभ जनार्दन॥ हिरण्याक्षगुणाधार सर्वाधार धरेश्वर॥ धनधा
न्यसमृद्धं च सर्वसंपत्समन्वितं। पुत्रपौत्रादिसंयुक्तं दासीदाससमन्वितं। आरोग्यं च सुमंत्रं च सर्वदुःखविवर्जि

२०१

नं। कुरुमां परमोदारं भक्तोयमिति चिंतयन्॥ इति संप्रार्थ्य फलमुच्चार्यैदं तिलपद्मं हेमप्रतिमासहितं धान्यपूर्ण
षोडशघटयुतं विष्णुदैवतं तुभ्यं संप्रददे। प्रीयतां माधवो देव इत्युक्त्वा न ममेति तिलपद्मं दत्वा कामस्क्तौ पठि
तां यथाशक्ति स्वर्णदक्षिणां दत्वा कर्मेश्वरार्पणं कुर्यात्। अथ रुद्रैकादशातिलदानं। ब्रह्मांडे॥ अतःपरं प्र
वक्ष्यामि तिलदानमनुत्तमं। यद्दत्वा पुरुषः स्त्री वा वैरिंचं लोकमाप्नुयात्। आयुरारोग्यदं पुण्यं सर्वपापप्रणाश
नं। शिवप्रीतिकरं नृणां पुत्रवृद्धिकरं परं। रुद्रैकादशमंत्रैः स्तुविप्रानेकादशव्रती। प्राङ्मुखः प्रत्यगासीनान् गंधा
दिभिरर्चयेत्। तिलप्रस्थत्रयं पात्रे प्रत्येकं निक्षिपेत्तथा। प्रत्येकं मंडले हैमं पात्रेषु द्विनिवेदयेत्। पात्राणि चै
वमाराध्यं शिवबुद्ध्या यथाक्रमं। रुद्रैकादशमंत्रैश्च दद्यादुदकपूर्वकं। मंत्राः। प्रणवादि चतुर्थ्यंता नमोंता ना
मरूपा ज्ञेयाः। नामानि स्मृत्यंतरे। वीरभद्रश्च शंभुश्च गिरीशश्च महायशाः। अजै— — दहिर्बुध्न्यः पिनाकी॰
चापराजितः। भुवनाधीश्वरश्चैव कपाली च विशांपते। स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः। इति

रुद्रैकादशतिलदानं। अथ प्रयोगः॥ शिवसंतोषपूर्वकायुरारोग्यपुत्रादिदृष्टामुष्मिकब्रह्मलोकमहितत्वका
मो रुद्रैकादशतिलदानं करिष्य इति संकल्प्य प्रसन्नमुखासीनानेकादशब्राह्मणान्नमोंतनाममंत्रैः संपूज्यैका
दशताम्रपात्राणि तिलैः संपूर्य यथाशक्ति हिरण्यं निक्षिप्य नाममंत्रैरेकैकादशभ्यो दद्यात्। ते च वीरभद्राय।
शंभवे गिरिशाय महायत्रासे अजैकपादे। अहिर्बुध्न्याय पिनाकिने। अपराजिताभुवनाधीश्वराय॰ कपालिने। भर्गा
येति। ततः कर्मैश्वरार्पणं कुर्यात्। अथ तिलगर्भदानं॥ ब्रह्मांडे॥ गोमयेनोपलिप्तायां क्षितावास्तीर्य वाससी। शाली
नामाढकं मध्ये तदर्द्धं तंडुलं न्यसेत्। तैस्तु पद्मं प्रविस्तीर्यमष्टपत्रं सकर्णिकं। कर्णिकायां न्यसेत्कुंभं सौवर्णं शक्ति
तः कृतं॥ नवरत्नानि तत्र दे निधातव्यानि यत्नतः। ततस्तु द्रक्ष्यतः शुक्लान्तिलान्कुर्यात्समं ततः। गर्भं च वाससा भू
यः समास्तीर्य ततः शनैः। गर्भं ते योनिमंत्रेण समाधाय यथाविधि। तत्रोपवेश्य पुरुषमजकृतसुमुष्टिकं॥ तस्यां
गेषु न्यसेन्मंत्रैर्मृत्युंजयमनुक्रमात्। तं च देवं विरूपाक्षमर्द्धचंद्रविभूषणं। कल्पयित्वार्चयेन्मंत्रैः पंचब्रह्मभिरा

दरात्। तस्य मूर्ध्नि पुनः पद्मं सोवर्णं पूर्ववत्कृतं। विन्यसेद्रुद्रमावेष्य तिलैरापूरयेत्ततः॥ तं गर्भमर्चयेद्रुद्रं चिंतयित्वा मनोद्भवं। अमृतस्राविणं चंद्रं स्वेन मंत्रेण मंत्रवित्। ततः शतावृतं मंत्रं मृत्युंजयमनुत्तमं। तत उत्थापयेत्तस्माद्गर्भस्थानात्समाहितः। पुनः संप्रोक्ष्य वारुण्या पावमानीभिरेव च। एवं देहविनिर्मुक्तः शंकरोस्मीति चिंतयेत्। ब्रह्मनिष्ठाय तत्सर्वं प्रद[illegible]त्सतिलोदकं। प्रीयतां भगवान् शंभुश्चंद्रमौलिरिति ब्रुवन्। अनेन विधिना यस्तु तिलगर्भं समाचरेत्। अकालमृत्युर्न भवेत्तस्य नास्त्यत्र संशयः। व्याधीनां विप्रमोक्षः स्यान्महतामपि निश्चयः। ग्रहदोषाः प्रणश्यंति प्रसीदंति ग्रहाः पुनः। उत्पातानां प्रशांतिश्च त्रिविधानामपि क्षणात्। नवरत्नान्युक्तानि। तद्वाक्यतो विप्रवाक्यत इत्यर्थः। अत्र तिलगर्भप्रवेशनं शंकरात्मताभ। वर्तेति दानं च याजमानमन्यदाचार्यकर्तृकं। अथ प्रयोगः। व्याध्युपशमंदीर्घायुःप्राप्तिग्रहपीडाकालमृत्युनाशोत्पातस्वितारिष्टनिरासकामोहं तिलगर्भदानं करिष्य इति संकल्प्याचार्यं वृणुयात्। आचार्यो गोमयोपलिप्तस्थले वा

समीआस्तीर्यतत्राढकमितान्व्रीलान्। प्रसार्यतत्रार्द्धाढकैस्तंडुलैरष्टदलंकृत्वाकर्णिकायांयथाशक्तिसुव
र्णनिर्मितंसनवरत्नंपद्मंविन्यस्यपरितउपविश्ययजमानाच्छादनपर्याप्तान्तिलान्इमेतिलाःशुद्धाइतिविप्र
वाक्यतःप्रतान्प्रसार्यान्येनवाससाछादयतगर्भस्थानमितिध्यात्वापस्यैतेयद्धियोगभेयिस्येयोनिर्हिरण्मयी॥
अंगासकृतायस्यतं। मात्रासमजीगमंस्वाहेतियोनिमंत्रेणाभिमंत्र्यतत्रयजमानम्जठरस्थवद्बद्धमुष्टिकमुपवे
श्यतदंगेषुन्यासंजपमंत्रन्यासंकुर्यात्। यथा॥ त्र्यंबकंयजामहइतिशिखायां। सुगंधिंपुष्टिवर्द्धनंहृदये। उ
र्वारुकमिवबंधनात्। बाह्वोः। मृत्योर्मुक्षीयमामृतात्नाभौ। — पादयोः। बंगुल्फयोः। कंजंघयोः। यंऊर्वोः।
जांजघने। मंकट्यां। हेमेढ्र-योः। सुनाभौ। गंकुक्षिद्वये। धिंपार्श्वयोः। पुकक्षयोः। ष्टिकुचयोः। वहृदि। र्द्धस्कंद
योः। नंकृकाटिकायां। उकूर्परे। वामणिबंधे। रुकनिष्ठिकयोः। कअनामिकयोः। मिमध्यमयोः। वतर्जन्योः।
बंअंगुष्ठयोः। धपाण्योः। नांकंठे। मंचिबुके। त्योःवक्त्रे। मुनासिकायां। क्षीकर्णयोः। यचक्षुषोः। माललाटे। मृ

मूर्द्धि। तातचूडायां। एवंन्यासंकृत्वात्रैवविरूपाक्षंचंद्रमौलिंकल्पयित्वासद्योजातंप्रपद्यामिसद्योजातायवैन
मोनमः। भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः। वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमः।२।अघोरे
भ्योथघोरेभ्यः।३।तत्पुरुषायविद्महेमहादेवायधीमहि।४।ईशानःसर्वविद्यानामितिपंचब्रह्मभिर्यजमानमभ्य
र्च्यपुनरभ्यस्तसवर्णंपद्ममधोमुखंतन्मद्ध्येसंस्थाप्यवासमावेष्ट्यतिलैराश्वर्यतमंतरूपुरुषंतिलगर्भरूपंमृत्युंजयमं
त्रेणाभ्यर्च्यकेषांचिन्मतेनवोनवोभवतिजायमानोह्नांकेतुरितितेनाथभ्यर्च्य। मृत्युंजयमंत्रंशतवारंजपित्वात
स्मात्कुंभीयजमानस्तुस्थाप्यवारुणिभिरभिषिंचेत्। ततोदाताशंकरोहमस्मीतिभावयित्वा। फलमुच्चार्येमंतिल
गर्भविष्णुदैवतंतुभ्यंसंप्रददेतेनभगवांश्चंद्रमौलिः प्रीयतामितिवदन्विप्रहस्तेजलंदद्यात्। ततोयथाशक्तिसुव
र्णदक्षिणांदद्यात्। आचार्याययथाशक्तिदक्षिणांदत्वाकर्मेश्वरार्पणंकुर्यात्। अथतिलमृगदानं। कौर्मे। मृगं
तिलमयंकृत्वासुवर्णरजतान्वितं। दद्यात्कंबलसंवीजकृष्णमार्गाजिनेनवा। सर्वकामसमृद्धेनविमानेनदि

दा·घो· वंव्रजेत्। कालक्षयादिहागस्यराजराजोभवेन्नरः। करकसंयुक्तमिति क्वचित्पांसापाठः। अथ प्रयोगः। यथा
शक्तितिलैःकृष्णाजिनेमृगाकारं कृत्वा कंबलेनाच्छाद्य यथाशक्तिसुवर्णरजते च संस्थाप्य देशकालौ संकीर्त्य स
र्वकामसमृद्धिविमानकरणकस्वर्गमनोत्तरभूलोकप्राप्त्युत्तरराजराजत्वभवनकाम इमं कृष्णाजिनोपरिस्थितं
तिलमयं मृगं यथाशक्तिसुवर्णरजतान्वितं कंबलाच्छादितं तुभ्यं संप्रददे॥ इति दत्वा यथाशक्तिदक्षिणां दद्यात्।
अथ गजदानं। विष्णुसंहितायां। कक्षारज्जुभिरायत्तं शुभासनसमन्वितं। मणिकांचनमालाभिर्भूषितं कर्ण
चामरैः। स्वच्छदंडैश्चघंटैश्च भूषितं दोषवर्जितं। यथालाभोपपन्नं वा यः प्रयच्छति दंतिनं॥ ब्राह्मणाय दरि
द्राय स्वर्गलोके महीयते। कर्मक्षयादिहागाय राजराजो गणाधिपः। सर्वपापविनिर्मुक्तो जायते नात्र संशयः।
अशक्तौ मूल्यदानमुक्तं। कौर्मे। दद्याद्गजं पुराणोक्तं मूल्यं पंच शतानि वा। वित्तानुसाराद्वापि शक्त्या दत्वाशि २०४
वपुरं व्रजेत्। इति पुराणोक्तं मूल्यं। हेममाषशतद्वयमिति हेमाद्रिर्मदनरत्नश्च॥ तथा च गजाभावे पंचश

तंहेममाषा। तदभावेशतरूप्यमितिफलितं। मूल्याभावेत्वशीतिकार्षापणागजमूल्यमुक्तं। रूप्येतिरूप्यमयगज
बंधनार्थस्थूणासहितमित्यर्थः॥ इतिमदनरत्ने॥ स्थूणारज्जुरितिहेमाद्रिः। तारागणोमौक्तिकादिकृतोगजा
लंकारविशेषः। अथप्रयोगः॥ देशकालौसंकीर्त्यसकलकलुषक्षयपूर्वकमहितत्वोत्तरभूलोकाधिकरणकमहा
गजलभवनकामोगजमहादानंकरिष्ये इतिसंकल्प्यब्राह्मणंवृत्वा तंवक्ष्यमाणोपस्करयुतंगजंचसंपूज्यफ
लमुच्चार्य इमंगजंरूप्यशृंखलासहितंमुक्ताजालभूषितंगंडकक्षास्थिरूप्यशृंखलाद्वयंचामरभूषितकर्णम
णिकांचनमालाभरणभूषितं। शुभासनसमन्वितंपृष्ठदेशं प्रजापतिदेवत्यंतुभ्यमहंसंप्रददेनममेतिसम
र्थारोहयेत्। आरोहकोचब्राह्मणपादप्रदानार्थंशिष्टायजमानस्कंधमानमयेति। ततोयथाशक्तिसुवर्णद
क्षिणांदत्वाकर्मेश्वरार्पणंकुर्यात्। अथशिवगजदानं॥ लैंगे। गजंतुलक्षणोपेतंहैमंवाराजतंतुवा। सहस्र
निष्कमात्रेणतदर्धेनापिकारयेत्। तदर्धार्धेनवाकुर्यात्सर्वलक्षणलक्षितं। पर्वोक्तदेशेकालेचदेवायविनिवे

२०८

दद्येत्। अष्टम्यांवाप्रदातव्यः। शिवंसंपूज्यपूर्ववत्। एवंयः कुरुतेदानेशिवभक्तिसमन्वितः। स्थित्वास्वर्गेचि
रंकालंराजागजपतिर्भवेत्। चिरकालावछिन्नस्वर्गवासस्तदुत्तरगजपतिराजत्वभवनकाम इतिसंकल्पः।
अथविष्णुगजदानं॥ गारुडे। योन्नगान्निधयेनागंप्रयच्छति। महामतिः। भद्रजातिसमुद्भूतंपद्मनाभायभक्तितः।
कुंभकंबलशोभाढ्यंघंटाचामरभूषितं। वरत्रांकुशसंयुक्तमनेकस्वर्णभूषितं। नानामंडनभूषिष्ठंचारुडिंडि
मडंबरं। कृत्वाविष्णोर्महापूजांकार्तिक्यांद्वादशीदिने। द्वादश्यामर्पयेत्तंतुदेवदेवायचक्रिणे। त्रिलोकीनाथदेवेश
सर्वभूतकृपानिधे। गजदानेनतुष्टस्त्वंप्रयच्छममवांछितं। इत्युच्चार्यार्पयेत्तंदत्वाप्रणिपत्यजगत्प्रभुं। सुरेंद्रलोक
मासाद्यक्रीडतेकालमक्षयं। ततोभूलोकमासाद्यसार्वभौमोनृपोभवेत्। सुरेंद्रलोकाधिकरणभोगोत्तरैहिकसा
र्वभौमत्वकाम इतिसंकल्पः। अथसूर्यगजदानं॥ सौरपुराणे। निवेदयतियोभक्त्यानागंस्वर्णाघलंकृतं। सू
र्यायपर्वदिवसेतस्यपुण्यफलंशृणु। समंतेरावणप्रख्यैर्गजयुक्तैः सुशोभनैः। प्रक्रीडतिमहापातैः शतसं

रत्नैरनेकशः। सप्तद्वीपसमुद्रायां क्षितौ नरपतिर्भवेत्। भुक्त्वा स विपुलान्भोगा — लये समुपस्थिते। सर्पो यो गं समास्थाय स तत्रैव प्रलीयते। सर्पोपसर्पमुद्दिश्य ब्राह्मणायेत्यर्थः। अन्ये तु सर्पदेवालयादानुलगामिच्छंति। अथ उष्ट्रदानं। क्षेमप्रकाशे। करभं चैव यो दद्यात्छुविपल्याणरभूषितं नागकिंकिणिकायुक्तं स्वर्गलोके महीयते। अस्य निर्ऋतिर्देवता आरुह्य प्रतिग्रहः॥ अथ दासीदानं॥ आग्नेये। अलंकृत्य यथाशक्त्या वासोभिर्भूषणैस्तथा। ब्राह्मणाय प्रदातव्या मंत्रेणानेन भक्तितः॥ इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता। सदा कर्मकरी भोग्यापथ्येएं भद्रमश्नुते। पंचवर्षाधिका सा तु चत्वारिंशत्समावधि। दासी विप्राय दातव्या दासदानेष्वयं विधिः॥ एवं दत्त्वा महाराज कृतकृत्यो भवेत्पुमान्। दासीं समीक्ष्य बहुयोग्यकार्यदक्षां यो ब्राह्मणाय कुलशीलवते ददाति। विद्याधराधिपतिभिः प्रतिपूजितोसौ मर्त्यः प्रयाति स्वजनैः सह विष्णुलोकं। कौर्मे तु। दासीं दद्याद्यथाशक्तिमूल्येनालंकृतां शुभां। सुवर्णरत्नैः सार्द्धं च विधिवद्दक्षिणायुते। वित्तानुसारात्तां दत्वा विप्राय गृहा

दा॰यो॰ मेधिने। मोदतेप्सरसांलोके यावत्कल्पशतत्रयमित्युक्तं। अत्र च कालविशेष आग्नेये। स्थिरनक्षत्रसंयुक्ते सो
२०६ मे सौम्यग्रहान्विते। दानकालं प्रशंसंति ततः पर्वणि वा पुनरिति। अथ प्रयोगः॥ स्थिरनक्षत्रे सोमे सौम्यग्रहयुक्ते
पर्वणि वा तत्रयकल्पावच्छिन्नाप्सरसो लोकाधिकरणकामोदविद्याधराधिपतिप्रपूजितत्वतदुत्तरैहिकसुख
भोगोत्तरस्वजनसहितविष्णुलोकगमनकामो दासीदानं करिष्य इति संकल्प्य ब्राह्मणं वृत्वा तं दासीं वस्त्राद्याभू
षणैर्वासोभिश्चालंकृत्य संपूज्य फलमुच्चार्येमां दासीं प्रजापतिदैवत्यां यथाशक्त्यलंकृतां तुभ्यं संप्रददे न ममेति दा
सीं दक्षिणकरं पात्रहस्ते दत्त्वा इयं दासी मया तुभ्यं श्रीवत्सां प्रतिपादिता। सदा कर्मकरी भोग्या पृथ्वे शं भद्रमस्तु ते
इत्युक्त्वा यथाशक्ति सुवर्णदक्षिणां दत्त्वा क्षमाप्य विसर्जयेत् सीमांतमनुव्रज्य कर्मेश्वरार्पणं कुर्यात्। अथ रथ
दानं कौर्मे। रथं चतुर्बलीवर्दयुतं धान्यावृतं तथा। वित्तानुसारात् सर्वैश्चरथोपकरणैर्युतं। सदक्षिणं च विप्रा
य दत्त्वा शिवपुरं व्रजेत्। धान्यानीत्ति अश्वादन्नेति मदनरत्ने। एकवचनांत धान्यपदेन समाससंभवाद्बहुवच २०६

नेनसमासेनिर्णीयकप्रमाणाभावात्किंचिद्देकंधान्यमितितुयुक्तं।रथोपकरणानिमेत्रश्वप्रयोगेस्पष्टः
।अथप्रयोगः।शिवपुरगमनकामोरथदानंकरिष्यइतिसंकल्प्यदेयंरथंविप्रंचसंपूज्येमंरथंवलीवर्दचतुष्ट
ययुतंयथाशक्त्याष्टादशधान्यान्वितंयुगयोक्तोत्रवरत्राद्युपकरणयुक्तंउत्तानांगिरोदेवत्यंतुभ्यंसंप्रददेनमम
तिउक्त्वारथायरथनाथायनमस्तेविश्वकर्मणे।विश्वरूपायनाथायअरुणायनमोनमः।इत्युक्त्वायथाश
क्तिसुवर्णंदक्षिणांदत्वा।ईश्वरार्पणंकुर्यात्।अथगंत्रीदाने।साचगजाश्ववलीवर्दयुतत्वभेदेनत्रिधा।मार्कडे।
गंत्रींतुरगसंयुक्तांयोददातिद्विजातये।सर्वकामसमृद्धात्मासराजाजायतेभुवि।आस्तीर्णमृदुस्तरणांयोक्त्रयुक्तां
सकूवरां।युक्तांचतुर्भिस्तुरगैर्द्वाभ्यांवाशक्तितोयुतां।पुण्येन्हिविप्रमाहूयकृत्वावस्त्रादिभूषितंसदक्षिणांय
थाशक्त्यादद्यात्प्रयतमानसः।तथा।सवक्राक्षयुगोपेतांमनवारणभूषितं।एवंप्रदद्याद्विधिवद्गंत्रींमंत्रेणमा
नवः।विमानेनार्कवर्णेनदेववविमोदते।द्विव।वलिवर्दयुतांचापिविप्रायप्रतिपादये।इहलोकेभवेद्राजाबलवा

२०८

दा॰घो॰
२०७

न्थमेवत्सलः। नत्वत्फलोल्लेखो मंत्रश्च प्रयोगेस्पष्टः। अथ प्रयोगः॥ सर्वकामसमृद्धिपूर्वकराजत्वभवनकामदृ
ति तुरगगं अश्वांस्वर्गाधिकरणवार्कवर्णविमानकरणकदेवसहितानंदप्राप्तिकाम इति हस्तिगं श्रो बलवद्भूमि
कराजत्वभवनकाम इति वृषभं व्यासं कल्प्यक्षमाणोपस्करां गंत्रीं विनं चवसं पूज्य फलमुद्धार्ये मां गंत्रीं चक्राक्षयु
तां यो क्रावदृढकूबरां मत्तेभद्वयसंयुक्तां चतुर्भिर्द्वाभ्यां वा तुरगैरेतत्संख्याकैर्वलीवर्दैर्वायुक्तां मध्यास्त तच्चित्रोर्णा
पटां। पट्टकूलकौशेयरुच्छादितां कोशपवितालसंहितामुत्तानां गिरो देवस्यां तुभ्यं संप्रददे। न मम इति दत्वा। गात्री
मिमां प्रयच्छामि विश्वकर्माधिदैवतां। दानेनानेन भगवान् श्रीयतां मे परः पुमान्। इति पठित्वा यथाशक्ति सुव
र्णं दक्षिणां दत्वा कर्मेश्वरार्पणं कुर्यात्। अथ शिबिकादानं॥ अग्नेये। मार्गशीर्षे शुभे पक्षे सनुपोष्य हरेर्दिनं।
माघफाल्गुनयोर्वापि वैशाखस्य शरत्सु च। द्वादश्यां हरिमभ्यर्च्य कलशोपरि संस्थितं। शंखचक्रगदाशार्ङ्ग
धरं भक्त्या हिरण्मयं। शिबिकां वक्रयं शोभामजुदारुमयीं विभो। आनीय संनिधिं विष्णोः शुभछत्रसम २०७

न्वितां। संपूज्य चसगंडूकां जागरंतत्र कारयेत्। प्रातःसभार्यमभ्यर्च्य वासोभिः कर्णभूषणैः। उपानच्छुरिका
खड्गपट्टकंचुकवेणुकाः। आदर्शोस्थगिकापानीयपात्रंकांस्यभाजनं। चत्वारोवृषभादेयाधेनवैश्चसुल
क्षणाः। शिविकावाहकानांतुतथैवछत्रधारिणः। वृत्तिर्देयातथान्नंचवर्षाहंब्राह्मणस्यच। वर्षेवर्षेतुनदेयं
ब्राह्मणस्यतदैवतु। इहामुत्रकुरुत्राणंकुरुकेशवमेविभो। छत्रंलक्ष्मीतयेदत्तंब्राह्मणार्थमयाशुभं। देवदेवज
गन्नाथविरूपाक्षाव्ययानघ। प्रभोशिविकयादेवप्रीतोभवजनार्दन। दत्वातुह्यांतुविदुषेसपत्नीकायपुत्रिणे।
स्करापस्तेयकृत्संगीब्रह्महागुरुतल्पगः। शिविकादानमाहात्म्यान्मुच्यतेपातकात्स्फुटं। पितृपक्षंमातृपक्षंप
त्नीपक्षंतथैवच। आत्मानंबंधुपक्षंचनारयेन्नरकार्णवात्। भुक्त्वासविपुलान्भोगानिहामुत्रसुखप्रदा
नः। सपत्नीकःसपितृकोविष्णुसायुज्यमश्नुते। शुभेशुक्ले। अत्रशिबिकादानस्यैवप्राधान्यंछत्रादिदानस्यां
गत्वं। वृषाधेनवश्चवाहकानांवृत्तिरितिकेचित्। अदृष्टार्थंदानमंगभूतमित्यन्ये। खड्गपट्टइत्येकंपदमिति

208

दा॰ घो॰
२०८

केचित्। पट्टंकटिबंधनार्थं। वस्त्रमित्यन्ये। स्थगिका जलपात्रवलंबनयोग्यकाष्ठत्रयनिर्मिता लोकेंतिकटीति प्र
सिद्धा। अथ प्रयोगः॥ मार्गशीर्षशुक्लैकादश्यामन्यस्मिन्वापर्वणि संभावितब्रह्महत्यादिमहापातकनाशपितृमा
तृसहितात्मविष्णुसायुज्यकामः शिबिकादानं करिष्ये। इति संकल्प्य शुचौ देशे कलशं संस्थाप्य तत्र यथाशक्ति सुव
र्णनिर्मितप्रतिमायां हरिमावाह्य संपूज्य हरिसंनिधौ वक्ष्यमाणोपस्करयुतां शिबिकां संस्थाप्य निशं जागरेण नी
त्वा प्रातर्हरिं विप्रं चाभ्यर्च्य विप्राय वस्त्रयुग्मकर्णभूषणपादुकोपानच्छुरिकाखड्गकंचुकचर्मधनुःशरादर्शपा
नीयपात्रकांस्यपात्रवृषभचतुष्टयं वर्षपर्याप्तं भक्ष्यं च समर्प्य शक्तौ वर्षपर्याप्तमन्नाच्छादनादिकं यावज्जीवं
च प्रतिवर्षं देयं। इहामुत्रापि च त्राणं कुरु केशव मे विभो। छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय ममाशुभमिति छत्रं स
मर्प्य छत्रधारिणे। वर्षपर्याप्तं वेतनं दत्वा शिबिकावाहकेभ्योऽष्टोत्तमेभ्यः षण्मध्यमेभ्यश्चतुरवरेभ्योपि वर्ष २०८
पर्याप्तं वेतनं दत्वा फलमुच्चार्यैमां शिबिकां वक्रवंशोत्थां ऋजुदारुमयीं गजदंतमयीं शुक्तिमयीं वा चित्रोर्णा

पट्टछादिनां। शिरोपधानगंडोपधानद्वयमुतं। उन्नानांगिरोद्दैवत्यांतुभ्यंसंप्रददे न ममेति समर्थदेवजगनाथविरूपाक्षाव्ययानघ॥ प्रभोशिविक्रमादेव प्रीतो भव जनार्दनेति पठित्वा यथाशक्तिसुवर्णंदक्षिणांदत्वा कर्मेश्वरार्पणंकुर्यात्। अथ भूदानं। हेमाद्रौ भारते। नभूमिदानादस्तीह परं किंचिद्युधिष्ठिरः। भूमिंदेवाददुःपूर्वं ये भूमिंभुंजतेधुना। भूमिदेवाराजानः। तथासंग्रामेवातनुंजह्याद्दद्याद्वापृथिवीमिमां। अत्यंतरमिदंशश्वत्। पुराणामेनिरेजनाः। योयजेताश्वमेधेनदद्याद्वासाधवेमहीं। तथा। अत्रगाथांभूमिकृतांकीर्तयंति पुराविदः। निवर्तनसहस्राद्यां सर्वसस्यप्ररोहिणीं। दद्याद्भूमिं फलोपेतां भूमिदानं तदुच्यते। अत्रश्लोकौ कौर्मे। गोचर्ममात्रंभूखंडमधिकं वा स्वशक्तितः। त्रिधासदक्षिणंकृत्वा दत्वा शिवपुरंव्रजेत्। त्रिधेति त्रिकसुवर्णदक्षिणायुक्तमित्यर्थः। गोचर्ममानंपरिभाषायामनेकप्रकारमुक्तंतत्र फलतारतम्यंकल्प्यं। अपराश्लोकौ विष्णुधर्मे। हस्तमात्रंतुयोदद्याद्भूमिदानफलंनरः। मात्स्ये। भवनस्थानमात्रांगांसोपिपापैः

प्रमुच्यते। गृहकरणापर्याप्तामित्यर्थः। काम्यकल्पविष्णुधर्मे। यस्यदेवस्ययद्वेश्मतस्यदेवस्यसोऽश्नुते। वे
श्मार्थमितस्यभुवंददातीतिशेषः। देवस्येत्यस्यलोकानितिशेषः। उद्यानभूमिंदत्वाचगंधर्वैसहमोद
ते। लवणाकरभूमिंचअब्धिलोकेमहीयते। ईधनाकरभूमिंतुवन्हिलोकेमहीयते। सर्वधान्यभुवंदत्वारु
द्रलोकेमहीयते। केदारभूमिंधर्मज्ञोयःप्रयच्छतिधर्मतः। महापुण्यमवाप्नोतिब्रह्मलोकेचगच्छति। इ
क्षुभूमिंनरोदत्वाशालीभूमिमथापिवा। सोमलोकमवाप्नोतिसर्वकामांश्चविंदति। गुल्मपुष्पलताकीर्णां
योभुवंसंप्रयच्छतिविमानेनंदनेसोथक्रीडत्यप्सरसांगणैः। पुष्पदान्फलद्यान्वृक्षान्दधंतीपृथिवींदद
न्। स्वर्गलोकपरिभ्रष्टोभाराधिपतिर्भवेत्। आरामभूमिदोविप्रोनंदनेक्रीडतेदिवि। ग्रामप्रदस्यान्त्य
पतिःसम्राट्नगरदोभवेत्। समाग्रवसुधेशःस्याच्चक्रवर्तीचराज्यदः। पक्वसस्यांवसुमतींयोलंकृत्यप्रय
च्छति। कामगेनविमानेनब्रह्मलोकंसगच्छति। तस्मात्क्रीत्वामहींदद्यात्स्वल्पामपिविचक्षण इति। इतभू

म्यपहारेत्तथैव। स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधरां। अर्थिनोंगुलिमात्रं तु प्रमादात् ज्ञानमोहितः। वहून्यब्द
सहस्राणि धर्मोपि पुरुषोत्तः। विष्टायां कृमिता मेति पितृभिः सहितस्तथा। स्वराष्ट्रे परराष्ट्रे वा देवब्राह्मणसंकु
तां। चिरं नरकमाप्नोति हृत्वा भूमिपतिर्भुवं। अनेन ब्राह्मणायदत्ता भूर्नापहार्या। क्षत्रियादिभ्यो दत्तापहरणे
दोषो नास्ति। तथा राजा स्वसेवकेभ्यो वेतनार्थं भूर्दीयते तैश्च ब्राह्मणेभ्यो यदीयते भूस्तदपहारे न दोषः। तेषां स
त्वाभावेन दानानधिकारात्। परदत्तामित्यनेन सांगदानस्य विचक्षणात्। मा तु राज्ञा स्वसेवकेभ्य एवप्रीत्या दत्ता दि
नावादत्तात्तन्मध्यस्याच भूर्ब्राह्मणाय दत्ता तदपहारे दोषः। या तु शत्रुजयेन गृहीता शत्रुणा पूर्वं यस्मै ब्राह्मणाय
दत्तास्थिता तदधीनकरणे पुण्यं अपहारे न दोषः। भूमिं हृत्वा तु यः कुर्याद्देवब्राह्मणसन्नरः। स्वर्गलोकमवाप्नोति
पुरुषोपि सुदारुण इति हेमाद्रौ विष्णुधर्मे। तदधीनकरणे फलश्रवणात्। स्वदत्तामिति वा स्वस्य शत्रुजितभूम्य
तिरिक्तपरत्वादिति। नाभूमिपतिना भूमिरधिष्ठेया कथं वनेति मारतमपि शत्रुजितभूमेः स्वीकरणाभावपरं। त

२०

दा॰घो॰ त्रसएवकरदीकृत्यस्थापनीयः। इत्यलमप्रसंगागतेन। अत्रचसुवर्णंदक्षिणा। अतोगविभुविप्राप्तेःसुवर्णंदक्षि
२१॰ णामतेतिमांडव्योक्तेः। प्रतिग्रहस्वसाक्षान्मनसावाप्रदक्षिणीकृत्वेति। अथप्रयोगः। शिवपुरव्रजनकामःस्व
र्गलोकमहितत्वकामोवाजन्मप्रभृतिसंभावितपातकनाशकामोवाएकविंशतिकुलतारणकामोवाकृष्टक्षेत्र
दानेसंततमनविच्छिन्नश्रीप्राप्तिकामोरत्नादिमद्भूदानेसकलवंशसमुद्धारणकामोभूमिदानंकरिष्यइतिसंक
ल्प्यभुवेब्राह्मणायचसंपूज्यफलमुत्सृज्येमांगांगोचर्ममात्रांविष्णुदैवत्यांभवतुभ्यंसंप्रददइतिसंकल्प्ययथाभूमि
प्रदानस्यफलंनार्हंतिषोडशीं। दानान्यन्यानिमेशांतिर्भूमिदानाद्भवत्विहेतिमंत्रं। सर्वसस्याश्रयाभूमिर्वराहेण
समुद्धृता। अनंतसस्यफलदाअतःशांतिंप्रयच्छमे। इतिवामंत्रंपठित्वाकृष्टभूमौतुसदारोहंतिबीजानिफलकृष्टेम
हीतले। तवप्रदानात्सफलाममसंतुमनोरथाः। इतिसुवर्णंतद्वयंत्रयंवादक्षिणांदद्यात्। प्रतिगृहीप्रदक्षिणंकु
र्वन्प्रतिगृह्णीयात्। ग्रामदानेतुसर्वपापक्षयपूर्वकदेवग्रामादायभरणयोग्यपुरुषसंख्यदशाकल्पादच्छिन्न २१॰

स्वर्गावासप्राप्त्यैहिकधनधान्यप्राप्तिकामोग्राममदानंकरिष्यइतिसंकल्प्यग्रामंविप्रंचसंपूज्यफलमुद्धार्यमांम
मुकनामकंग्रामंसस्योसतिजलाद्यपस्थानानेकवृक्षलतागुल्मादिमनोहरंविष्णुदैवतंतुभ्यंसंप्रददेनमेतिसंक
ल्प्यसुवर्णदक्षिणांदद्यात्।शिवधर्मे।यःशिवायहलोपेतांसर्वसस्यप्ररोहिणीं।महींमहीपतिर्दद्यात्तस्यपुण्यफ
लंशृणु।यावद्दंडाभवेद्भूमिर्मीयमानासमंततः।सतावत्कल्पसंख्यानंरुद्रलोकेमहीयते।वाराहे।विष्णवेविषयंग्रा
मंग्रामार्द्धमपिशक्तितः।दत्वाक्रीडतिवैकुंठ—कुंडेषुचनिरत्सयं।यःसस्यापफलोपेतांसर्वसस्यप्ररोहिणीं।महींमही
पतिर्दद्यात्तस्यपुण्यफलंशृणु।भूभागाश्चैवयावंतोभूतलेभांतिसत्तम।तावद्युगसहस्राणिसर्वलोकेमहीयते।शिव
विष्णुस्सर्वोद्देशेनब्राह्मणायेतिश्लोकत्रयार्थः।अथगृहमाहात्म्यं।मात्स्ये।पक्वेष्टकामयंवापिशैलेयंवापिदारुजं।
मृन्मयंवापिभवनंशुभलक्षणसंयुतं।मचावरणशोभाद्यंधेन्वाचैवसमन्वितं।अर्जुनैःसरलैरम्यैःशालैश्चैवमनोर
मं।शुभस्थानेसमुत्पन्नैर्वास्तुलक्षणसंयुतं।देवतापंचकंतत्रचत्वासिंशत्समन्वितं।पूजयित्वायथानंततोदद्यातगृ

दा.यो. हं गृही। प्राप्ते दानदिने कार्यमैशान्यां हस्तसंमितं। चतुरस्त्रंसमं कुंडं मेखलायोनिभूषितं। पूर्वोत्तरे हस्तमिता थवेदी
२११ गृह्यादिदेवेभ्यश्च पूजनाय। अर्चयेच्चैनं ब्रह्मशिवाच्युतानां सूर्यस्य कार्यं फलमाल्यगंधैः। द्वारेषु कार्याणि चतोरणा
निपत्रैरपिक्षीरवनस्पतीनां। मध्ये च संस्थाप्य सरत्नकुंभं स्त्रगंधधूपांबररत्नयुक्तं। गृह्योक्तेन विधानेन कृत्वा चा
ग्निमुखं ततः। ततः श्रतं चैकचरुं जुहोति मध्यस्थिताभ्यो गृहदेवताभ्यः। बलिं च सम्यग्विधिवत्प्रयुज्य क्षीरेण धारां
परितस्तु दद्यात्। ब्राह्मणं दक्षिणापूर्वं परितुष्टं क्षमापयेत्। शय्यां दक्षिणभागे तु सोपधानां सदीपकां। सितव
स्त्रैः समसंछन्नां लक्ष्मीनारायणान्वितां। सितांबरं कुंडलहेमभूषितं केयूरकंठाभरणाभिरामं। पत्नीसमेतं च करे गृ
हीत्वा दाता पठेन्मंत्रमिमं गृहस्थः। मंत्रः भपोगेस्यष्टः। एवमुक्त्वाथ देवेशं सपत्नीकं द्विजोत्तमं। तिलप्रस्थोपरिस्थायां
शय्यायामुपवेश्य च। वदेदिदं ततो वाक्यं सर्वधान्ययुतं त्विदं। सर्वोपस्करसंयुक्तं गृहं गृह्ण द्विजोत्तम। तत्रोपक
रणं सर्वं दंपत्योर्विनिवेदयेत्। य एवं सर्वसंपन्नं पक्वेष्टं विनिवेदयेत्। कल्पकोटिशतं यावत् ब्रह्मलोके महीयते। शैल २११

जंदारुजं वापि यो दद्याद्विधिपूर्वकं। वसेत्क्षीरार्णवे रम्ये नारायणसमीपतः॥ मृन्मयं चैव यो दद्यात्गृहं चोपस्करान्वि
तं। पुरेषु लोकपालानां प्रतिमन्वंतरं वसेत्। धेन्वाचेति। इदं च गृहं दीपप्रभोद्योतशयनाशनभाजनैः। उपस्करैश्च सं
पूर्णं सर्वधान्यप्रपूरितमिति। व्यासोपस्करोपलक्षणं। देवतापंचकमिति पंचचत्वारिंशद्देवतापूजनं वास्तुशांतिः
। सा चात्र दानांगत्वेन विहितात्तद्विधिगृहकरणप्रकारतत्कालादिकं च पितृकृतशांतिसारे स्पष्टमत्रापि प्रयोगे। दक्षि
णं पूर्वस्थितिदक्षं मानितं चेत्यर्थः। लक्ष्मीनारायणेति। तल्लक्षणं कामिके। दक्षिणाधःकरे पद्मं शंखमूर्ध्वकरे न्यसे
त्। वामोर्ध्वे च भवेच्चक्रं लक्ष्मीपृष्ठे परः करः॥ वामोत्संगगता लक्ष्मी रत्नपात्रकराभंवेत्। दक्षिणस्तु भुजे देव्याः पृष्ठे दे
वस्य चक्रिण इति। मएवमिति। इदमपि गृहदानात्सुखी प्राज्ञो वित्तस्थः सर्ववस्तुषु। इति संवर्त्तोक्तफलस्य क्रीडि
त्वा सुचिरं स्वर्गे मानुष्यं लोकमास्थितः। भवत्यनाहतैश्वर्यः सर्वकामसमन्वित इति गारुडोक्तफलस्याप्युपलक्ष
णं। अथ प्रयोगः॥ दाता वास्तुशास्त्रोक्तं वास्तुमंडलपूजां विधाय तत्र गृहं कृत्वा धान्यादिभिरापूर्य गृहांगणे

212

शानेवस्त्रादिनाचतुर्द्वारंमंडपंकृत्वाद्वारेषुक्षीरद्रुमपत्रैस्तोरणानिबध्वातन्मध्येहस्तमितंकुंडंतदीशानेहस्तमितां
वेदींचकृत्वाकरिष्यमाणगृहदाननिर्विघ्नतासिद्ध्यर्थंगणेशपूजनादिकरिष्यइतिसंकल्प्यगणेशपूजनस्वस्ति
वाचनमातृकापूजननांदीश्राद्धानिकृत्वावास्तुशांतिंक्षीरदानांताकृत्वागृहदक्षिणभागेअष्टदलप्रस्थपरिमित
तिलेषुशय्यायांलक्ष्मीनारायणप्रतिमांसंपूज्यप्रतिग्रहीतारंसपत्नीकंयथाविभवंवस्त्रालंकारादिभिरलंकृत्यमं
गलघोषपूर्वकंकरेगृहीत्वाशुभेमुहूर्तेगृहंप्रवेशयेदेतैर्मंत्रैः।एतेहिनारायणदिव्यरूपसर्वामरैरर्च्चितपादपद्म
शुभाशुभानंदशुचामधीशलक्ष्मीयुतस्त्वंहिगृहंगृहाण।नमःकौस्तुभनाभायहिरण्यकवचायच।क्षीरोदार्णव
सुप्तायजगत्स्थात्रेनमोनमः।नमोहिरण्यगर्भायविश्वगर्भायवैनमः।भूर्लोकप्रमुखालोकास्तवगर्भेव्यवस्थिताः।
नेदंतिष्ठावकल्याणंतथास्मिन्भवनेगृही।तत्प्रसादेनदेवेशपुत्रपौत्रयुतोगृहे।पंचयज्ञक्रियायुक्तोवसेदाचंद्र
तारकं।ततःपात्रंशय्यायामुदङ्मुखमुपवेश्यप्राङ्मुखोदेशकालौसंकीर्त्यकलुषन्नातपुत्रपौत्रप्रपौत्रवहुवंधुत्वार २१२

णकल्पकोटिशतावधिककालब्रह्मलोकमहितत्वकाम इति पक्षेष्टिका विरचिते शैलदारजे तु कलिकलुषविमुक्तव
डुसिद्धपूजितत्वाप्सरोगणकरकलितामरचामरवीज्यमानत्वसंभावितनरकमग्नपित्रादिपुरुषशतवडुपु
त्रपौत्रतारणदिव्यभोगोत्तरैहिकराजराजत्वप्राप्तिक्षीरार्णवाधिकरणकनारायणसमीपगमनारायणवलोपे
तत्वनारायणपरायणत्वनारायणकथासंस्तवशारीरावच्छिन्नसुखित्वशतवर्षजीवित्वकामः केचनमन्मयेतु एके
कमन्वंतरावच्छिन्नप्रतिलोकपालपुरनिवासकाम इदं गृहं नानाविधधान्यदासीदासगोमहिषीशय्यापीठपादुका
कांस्यपात्रताम्रकुंभपित्तलदीपोपानच्छत्रसोपस्करतांबूलकरंडनानाविधमन्मयमुसलोलूखलशूर्पमार्जनीकु
द्दालदात्रकुठारखनित्रसूचीकर्त्तरीशर्करातिलखंडगुडघृततैललवणार्द्रहिंगुमरीचिधान्यकजीरकसर्षपहरि
द्राशुंठीपिप्पलीशिलापुत्रकादि यथामिलितोपस्करसामग्रीलोहकनकानेकविधवस्त्रयुतं पक्षेष्टकारचितं दास
वेदैवतममुकगोत्रप्रवरायतुभ्यं संप्रददे न ममेति दत्वा इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं। तवापि प्रप्रसादेन

ममस्त्वभिमतं फलं। गृहं मम विभूत्सर्थं गृहाण त्वं द्विजोत्तम। प्रीयतां मे जगद्योनिर्वास्तुरूपी जनार्दन इति पठित्वा।
सहस्रस्वर्णैएकसुवर्णैतां शक्त्या दक्षिणां दत्वा संपन्नं वाप्यसंपन्नं गृहोपस्करभूषणं सर्वसंपूर्णमेवास्तु त्वत्स
दाद्द्विजोत्तमेति प्रार्थयित्वा संपूर्णतां वाचयित्वेश्वरार्पणं कुर्यात्। अथ गृहसमुदायदानं। हेमाद्रौ ब्रह्मवैवर्ते।
कारयित्वा गृहान्रम्यान् ऋतुवस्वर्कसंख्यया भुवनाष्टादृत्रिंशत्तत्वनक्षत्रसंख्यया। शक्त्या तद्द्विगुणान्ने
वत्रांतं यावत्सहस्रकं। एवं संभृतसंभारान् गृहान्कृत्वा द्विजोत्तमान्। कुलशीलसमायुक्तः सर्वभोगसमन्वि
तः। ब्रह्मवर्षशतान्येव दत्त्वा तिष्ठत्यनामयः॥ तस्माद्दिहस्तमागस्तु सप्तद्वीपाधिपो भवेत्। वहुप्रज्ञो वहुधनो द्वि
जो बहुधनो द्विजो वै वेदपारगः। अथ — — दानं। स्कांदे॥ कृत्वा म प्रयत्नेन शयनासनसंयुतं। पुण्यकाले द्वि
जेभ्योथ यतिभ्यो नानिवेदयेत्। सर्वान्कामानवाप्नोति निष्कामो मोक्षमाप्नुयात्। अत्र यतीनां प्रतिग्रहाभावात्
गौणं दानमिति केचित्। मुख्यमेव दानं यतीनां तु प्रत्यवाय इति पितृचरणाः। अथ धर्मशालाकरणं। भविष्य

मार्कंडेययोः। प्रतिश्रयेसुविस्तीर्णे कारिते सजले घने। दीनानाथजनार्थाय यद् किंन कृतं भवेत्। कुर्यात्प्रतिश्र
यगृहं पथिकानां हितावहं। निजगेहैकदेशं वासाधनं यो निवेदयेत्। सर्वकामसमृद्धोसौ देववद्दिवि मोदते। प्र
तिश्रयो धर्मशाला। इदं वनमुख्यं दानं। किंतु स्वर्गमात्रं। अथ कन्यामहादानं। आग्नेये। एवं यच्छंति ये कन्यां यथा
शक्त्या स्वलंकृतां। विवाहकाले संप्राप्ते यथोक्त सदृशे वरे। क्रमोत्क्रम क्रतुशतमनुपूर्वं लभंति ते। तावत्स्वर्गं
लभेद्यावत्सर्वलोकांतु संचकः। महीदातुश्च गोदातुः कन्यादातुश्च येरथ्याः। कन्यादानातुगापश्चात्समायां
तुत्रयोरथ्याः। कन्यादश्वाश्वमेधी च प्राणदाता द्विजेषु च सममंतिरथा ह्येते त्रयो वै नात्र संशयः। पूर्तं धर्मम
वाप्नोति यथा बह्विधिकल्पितं। यस्मात्कन्याप्रदानेन दातव्या श्रेयमिच्छता। दातव्ये सस्यतस्मादि स्वादिः। ब्राह्मे
णातु विवाहेन यस्तु कन्यां प्रयच्छति। ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्माद्यैः पूजितः सुरैः। यावंति रोमाणि कन्याया
श्चतनौ पुनः। तावद्वर्षसहस्राणि रुद्रलोके महीयते। अश्वलायनः। अलंकृतकन्यामुदकपूर्वां दद्यादेष ब्राह्मो।

२१५

दा॰ घो॰ विवाहस्तस्यां जातो ह्याद्वशावरान्द्वादश परान्पुनात्युभयत इति। भविष्ये। कन्यामलंकृतां दद्यात्समाहूय न

२१५ राधिप विद्यार्थिने ब्राह्मणाय कन्यादानं तदुच्यते। इति भविष्यपुराणे वाक्यत्वात्। विवाहविधिनांतेवा मध्ये क

न्यादानाक्षेपाच्च। शूद्रस्यापि द्विजसंप्रदानकमेव कन्यादानं मुख्यं। शूद्रसंप्रदानकन्यादाने तु भाक्तं दानपदमि

ति मदनरत्नः। ब्राह्मणसंप्रदानकमेव कन्यादानमुख्यं। अत एव नारायणवृत्तिकृता ब्राह्मदैवार्षप्राजापत्यगां

धर्वासुरपैशाचराक्षसान् विवाहानुपक्रम्य पूर्वे ब्राह्मणस्य प्रतिग्रहार्लिंजसंयोगेनादृष्टरूपभार्यात्वोप

पत्तेः। क्षत्रियस्य गांधर्वराक्षसौ पुराणे पुरुषत्वात् पुरुषसंयोगाच्च। आसुरो वैश्यस्य धनयोगात् त्वन्ये स्तद्युक्तं।

अतः प्रतिग्रहपर्यंतदानस्य मुख्यत्वात्। ब्राह्मणसंप्रदानकमेव कन्यादानं मुख्यमित्यल्लेके। क्षत्रियादीनां प्र

तिग्रहे प्रसक्ताभावादंगीकारेण प्रवृत्त क्षत्रियादिसंप्रदानकदानस्य मुख्यत्वेन क्षतिरिति कनिष्ठपितृव्यचर

णाः। न च शूद्रस्य विवाहविधिनैं कन्यादानाक्षेपकः। गांधर्वादिविवाहसंभवादिति वाच्यं। तत्राप्युत्तरकालं दान २१५

स्यसत्वात् । भविष्ये । विलोक्य गोत्रं नक्षत्रं राशिं कूटादिकं तथा । स्तलग्ने सुमूर्ते च दद्यादेव यथाविधि ॥ गोत्रमि
त्युपलक्षणं सापिंड्यमपि द्रष्टव्यं । तन्निरूप्य गोत्रप्रवरनिरूपणं चास्मत्कृतसंस्का॰धा॰ रकौउज्ञेयं । अत्र च क
न्याता च दुह्याहयेत्कन्यां यावदृतुमती भवेदिति अप्राप्तरजोदर्शनाविवक्षिता । कुमार्यास्त्वष्टवर्षीयाः शस्यते पा
णिपीडनमिति तु मात्रास्त्वपरं । पराशरमाधवीये तु जन्मतो गर्भधानाद्वा पंचमे वत्सरे शुभं । कुमारीवरणं दानं मे
खलाबंधनं तथेसुक्तं । कष्यथंगाः । वरगोत्रं समुच्चार्य प्रपितामहपूर्वकं । नामसंकीर्तयेद्विद्वान् कन्यायाश्चैवमे
वहि । तिष्ठेत्सर्वौमुखो दाता वरः प्रत्यङ्मुखो भवेत् । मधुपर्कार्चितायैनां तस्माद्दद्यात्सदक्षिणां । उदपात्रं ततो गृह्य
मंत्रेणानेन दापयेत् । गौरीं कन्यामिमां विप्र यथाशक्ति विभूषितां । गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय । मिं
गावश्चदासीचवासांसि विविधानि च । महिषीवाजिनश्चैव दद्यात्स्वर्णमणीनपि । ततः स्वगृह्यविधिना होमाद्यं क
र्म कारयेत् । यथाचारं विधेयानि मांगल्यकुतुकानि चेति । अथ प्रयोगः ॥ दाता देशकालौ संकीर्त्य मम समस्तपितृ

दा॰ची॰ णांनिरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तयेस्यामुत्पादयिष्यमाणसंततस्याद्वादशा
२१५ वरान्द्वादशपरान्पुरुषान्पवित्रीकर्तुमात्मनश्चश्रीलक्ष्मीनारायणप्रीतयेमुकप्रवरायामुकगोत्रोत्पन्ना
ममुकामुकशर्मणेप्रपौत्रींपौत्रींपुत्रीममुकनाम्नींश्रीरूपिणींप्रजापतिदैवत्यांप्रजोत्पादनार्थंतुभ्यंसंप्रददे
इत्युक्त्वागौरींकन्यामितिपठित्वादक्षिणांसुवर्णभूम्यादिकंदद्यादितिजगद्गुरुनारायणभट्टाःदानवाक्यमूचि
रे। अत्राहुः। कन्यादानकल्पोक्तफलत्वेननोद्देश्यतायोगसिध्यधिकरणविरोधापत्तेः। तत्रापिसर्वेभ्योदर्शपू
र्णमासाविसेतद्बोध्यफलत्वेनोद्देशसंभवात्। लक्ष्मीनारायणप्रीतिश्चहेमाद्रिमदनरत्नादिलिखितवचोनिव
येनश्रुतानफलत्वमर्हतिप्रजोत्पादनार्थमितिचोक्तिमंनातीवसप्रयोजनतामावहति। आत्मनश्चेतियदिसमस्त
पितृणामित्यनेनसमुच्चितुंफलाप्तयेइत्यनेनसंबध्यतेतदापवित्रीकर्तुमित्यनेननसंबध्येत। यदिचाहुतीया २१५
र्थतांकल्पयित्वातत्रसंबंधस्तदाफलावाप्तेरात्मसंधितानस्यात्। तस्मान्नेदृशंदानवाक्यं। किंतुक्रतुशतफललाभक

न्यालोमसमसंख्यावर्षसहस्रावच्छिन्नस्वर्गवासभूदानगोदानाद्यान्वितनित्यदानसस्यवदनव्रताश्वमेधब्राह्म
पाप्राप्यत्राणसकलन्वंजन्मफलब्रह्मलोकप्राप्तिकामोस्यामुत्पादयिष्यमाणपासंतत्याद्वादशावरान्एकविंश
त्यवरान्वातातचदपरान्पुरुषान्पवित्रीकर्तुमात्मानंचततोगोत्रोच्चारादिप्रजापतिदैवत्यांकन्यांतुभ्यंसंप्रददइति
वाक्यंततःपूर्ववदिति। स्कांदे। वैवाहिकप्रदानंचयोददातिद्यापरः। महेंद्रभवनेयातिसेव्यमानोप्सरोगणैः।
तथा। आत्मीकृत्यसवर्णेनपरकीयांतुकन्यकां। धर्मेणविधिनादातुमसगोत्रोपियुज्यते। कृत्वाकन्याप्रदानंच
पितरस्तस्यपितामहाः। विमुक्ताःसर्वपापेभ्योब्रह्मलोकंव्रजंतिते। कन्यागृहेभोजननिषेधआग्नेये। अप्रजायांतुक
न्यायांनभुंजीतकदाचनेति। दक्षः। मातापितृविहीनेंतुसंस्कारोद्वहनादिभिः। यःस्थापयतितस्येहपुण्यसं
ख्यानविद्यते। विष्णुधर्मे। भूपालंयःश्चुतंराज्यात्स्वराज्येस्थापयेत्पुनः। सयातिशक्रसालोक्यंयावछस्याश्चतुर्द
श। ततोमानुष्यमासाद्यराजाभवतिधार्मिकः। स्थानभ्रष्टस्ययःकुर्याद्भूपस्यारोपणंनरः। नाकलोकमवाप्नो

216

तिचिरंतेनेहकर्मणा। अथ कपिलाधेनुमहादानं। कपिला दशधा। स्वर्णकपिला पूर्वा द्वितीया गौरपिंगला। तृतीया
चैव रक्ताक्षी चतुर्थी गुडपिंगला। पंचमी बहुवर्णा स्यात् षष्ठी च श्वेतपिंगला। सप्तमी श्वेतपिंगाक्षी अष्टमी कृष्णपिंग
ला। नवमी पाटला ज्ञेया दशमी पुच्छपिंगलेति। व्यासः॥ सवत्सां कपिलां दत्वा वंशान् सप्त समुद्धरेत्। यावंति वास्या रो
माणि सवत्सायां भवंति हि। सुरभीलोकमासाद्य रमते तावतीः समाः विधिमाहात्म्यमः। रुक्मशृंगी रूप्यखुरां ताम्रलां
गूलभूषितां। कांस्योपदोहनां धेनुं वस्त्रछन्नामलंकृतां। दत्वा द्विजेंद्राय ततः स्वर्गलोके महीयते। दश धेनुप्रदाने
न तुल्यैका कपिला मता। सहस्रं यो गवां दद्यात् कपिलां वापि सुव्रत। सममेव पुरा प्राह ब्रह्मा ब्रह्मविदां वरः। रुक्मरू
प्यकांस्याद्यनुक्तपरिमाणत्वाद्यथाशक्ति ज्ञेयमिति। चतुर्दशासौ वर्णिके शृंगे खुराः पंचपलान्विताः। पंचाशत्पलि
कं कांस्यं ताम्रं चैतावदेव तु। वस्त्रं च त्रिगुणं धेन्वा दक्षिणा च चतुर्गुणा। एतैरलंकृतां धेनुं घंटाविरविभूषितां। क
पिलां विप्रमुख्याय दत्वा मोक्षमवाप्नुयात्। कौर्मे। एतैरुपस्करैर्युक्ता महती कपिला स्मृता। दत्वा सा विप्रमुख्याय स्व

गैलोकफलप्रदा। सप्तजन्मकृतात्पापान्मुच्यते दत्वा संयुतः। दशभिः पुरुषैः सहितः। यान्यान्प्रार्थयते कामांस्तांस्ता
न्प्राप्नोति मानवः। अंते स्वर्गेप – गौवफलमाप्नोत्यसंशयमित्यग्रेतनकौर्मेण फलातिशयस्योक्तेर्गुणफलासं
बंधः अत्र सामान्यतो गोदानेतिकर्त्तव्यता द्रष्टव्या। स्वर्गलोकमहितत्वगोसहस्रदशधेनुदानजन्यफलप्राप्तिका
मः। पितृपुत्रादिदशपुरुषकर्तृकसप्तजन्मकृतपापनाशपूर्वकसकलैहिककामप्राप्त्युत्तरस्वर्गभोगोत्तरमोक्ष
कामः कपिलाधेनुमहादानं करिष्य इति संकल्प्य गोदानविधिना पूजयित्वा ब्राह्मणाय दत्वा। कपिले सर्वभूतानां
पूजनायासि रोहिणि। तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छ मे इति मंत्रं पठित्वा दक्षिणां दत्वा भूयसीं संकल्प्य कर्मे
श्वरार्पणं कुर्यात्। अथ समानवत्साकपिलादानं। भारते। समानवत्सां कपिलां धेनुं दद्यात्पयस्विनीं। सुव्रतां वस्त्र
संवीतां ब्रह्मलोके महीयते। ब्रह्मलोकमहीतत्वकामसमानवत्सकपिलाधेनुदानमहं करिष्य इति विधिः विधिः
सर्वोपि स एव। मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सजनता वल्लीरसालद्रु

दा॰ चो॰
२१७

मः। यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाग्नेयपुराणबोधितमहादाने कृता पद्धतिः। सूनोर्दि
नकरस्यैषा गागाभट्टमनीषिणः। इदानीमतिदानानां विधौ लीला विजृंभते। हेमाद्रावादित्यपुराणे। त्रीण्याहुरति
दानानि गावः पृथ्वी सरस्वती। त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च। अत्र गाव इति प्रत्यक्षगोसाधनके
भयलेखुखी कपिलासमानवत्सासमानवर्णादिदानमुच्यते। रगुडधेन्वादिदानानि। तत्र गोशब्दस्य गौणत्वात्।
वृषभदानमप्यतिदानं गोशब्दस्य जातिमात्रवाचकत्वादिति केचित्। पृथ्वी सरस्वतीति स्त्रीलिंगप्रायणगत्
स्त्रीगोदानमेवातिदानं। अतएव सर्वकामदुघा धेनुर्गावः पृथ्वी सरस्वतीति लैंगं संगच्छत इत्यन्ये। यद्यपि
कपिलादानं महादानेष्वप्यस्ति तथापि तत्रोभयरूपत्वेपि न क्षतिः महादाने नांदीश्राद्धसत्वात्। अतिदा
नत्वेन तदभावइति लक्षणपितृव्यचरणाः। हरिवंशे शालग्रामशिलादानमतिदानं प्रकीर्तितं। तत्रादौ गोदानवि
धिः। हेमाद्रौ भारते। दानानामिह सर्वेषां गवां दानं विशिष्यते। मानः श्रेष्ठाः पवित्राश्च पावना जगदुत्तमाः। २१७

पयसाहविषादध्नासर्पिषाथविचर्मणा।अस्थिभिश्चैववालैश्चशृंगैश्चैवतुभारत।गोभिस्तुल्यंनपश्या
मिधनंकिंचिदिहाच्युत।कीर्तनंश्रवणंदानंदर्शनंवापिपार्थिव।।नगोदानात्परंदानंकिंचिदस्तीतिमेम
तिः।सागौतीमार्जितादत्ताकृत्स्नंतारयतेकुलं।लैंगे।अग्न्यागाराणिविप्राणांदेवतायतनानिचापूज्यंतेश
कृतायास्संकिंदेयमधिकंततः।देवलः।विमानवरमारूढोदिव्याभरणभूषितः।योगंतुमिछतिस्वर्गंस
गोदानंप्रयच्छतु।भविष्ये।आदित्यदुहितागौर्हिपृथ्वीयंपरिकीर्तिता।श्रेयोर्थेसर्वलोकानांमुसन्नाक्र
तुसिद्धये।ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतं।एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति।गोभ्योयज्ञाः
प्रवर्तंतेगोभ्योदेवाःसमुत्थिताः।गोभ्योवेदाःसमुत्कीर्णाःषडंगपदक्रमाः।शृंगमूलेगवांनित्यंब्रह्माविष्णु
समाश्रितौ।शृंगाग्रेसर्वतीर्थानिस्थावराणिचराणिच।शिरोमध्येमहादेवःसर्वभूतमयःस्मृतः।लला
टाग्रेस्थितादेवीनासावंशेचषण्मुखः।कंबलाश्वतरौनागौनासापुटनिवासिनौ।कर्णयोरश्विनौदेवौ

218

चक्षुषोः शशिभास्करौ। दंतेषु वायवः सर्वे जिह्वायां वरुणः स्थितः॥ सरस्वती तु हुंकारे पक्षमासौ च गंडयोः सं
ध्याद्वयं तयोष्ठाभ्यां ग्रीवायामिंद्रः समाश्रितः॥ रक्षांसि कक्षदेशे तु साध्याश्चोरसि संस्थिताः॥ चतुष्पात्सकलो धर्मः
स्वयं जंघासु संस्थितः॥ खुरमध्येतु गंधर्वाः खुराग्रेषु च पन्नगाः॥ खुराणां पश्चिमांगेषु गणा ह्यप्सरसां स्थिताः॥
रुद्रास्त्वेकादश पृष्ठे वसवः संधिषु स्थिताः श्रोणीतटस्थाः पितरः सोमो लांगूलमाश्रितः॥ आदित्यरश्मयो वाल
पिंडीभूता ह्यवस्थिताः॥ साक्षाद्गंगा च गोमूत्रे गोमये यमुना स्थिता क्षीरे सरस्वती देवी नर्मदा दध्नि संस्थिता। उदरे
पृथिवी ज्ञेया सशैलवनकानना। चत्वारः सागराः पूर्णा गवां ये तु पयोधराः॥ एतद्धि कथितं सर्वं यथा गोषु प्रतिष्ठि
तं। इदं तु गवां गात्रास्समात्रं कथनं न त्वासां देवतानां दानकाले आवाहनमिति केचित्। शिष्टास्त्वावाहनं कुर्वंति। नं
दीपुराणे। विधिना तु यदा दत्ता या वै धेनुः सदक्षिणा। तदा तारयते जंतून् कुलानामयुतं शतैः॥ भारते। गां दद्याद्देद
पूर्णाय विप्राय गृहमेधिने। स्वर्णालंकृतशृंगी च वस्त्र घंटासमन्विता। प्रसयाच्चीसमद्धां तु ललाटनटदर्पणा॥

जतछन्नचरणां मुक्तालांगूलभूषितां। कांस्योपदोहनां तत्सां लवणादितृणोदकैः। गवां पुच्छं गृहीत्वा च ससुवर्णेन पाणिना। गृहस्थो वेदविद्विप्रो दापयेत्तत्प्रतिग्रहं। त्रिभिः शीलक्षीरसंतानैः समृद्धामित्यर्थः। विधिमाह विश्वामित्रः। प्राङ्मुखीं गामवस्थाप्य सवत्सां तां सुपूजितां। पुच्छदेशे तु दाता वै स्नातो बद्धशिखो भवेत्। उदङ्मुखस्तु विप्रः स्यात् पात्रलक्षणलक्षितः। आज्यपात्रं करे कृत्वा कनकेन समन्वितं। निक्षिप्य तस्मिन्पुच्छं तु घृतं दुग्धं प्रसज्य च। सतिलं विप्रपाणिं तु प्रागग्रं तु निधापयेत्। सतिलं सकुशं चापि गृहीत्वा दानमाचरेत्। यज्ञसाधनभूता या विश्वस्याघप्रणाशनी। विश्वरूपधरो देवः प्रीयतामनया गवा। गोमतीं च ततो विद्यां जपेत प्रयतः शुचिः। अत्र सुवर्णशृंगादीतिकर्तव्यता कपिलादानोक्तापि ज्ञेया। याज्ञवल्क्यः। यथाकथंचिद्दत्वा गां धेनुं वा धेनुमेव वा। कपिलादानोक्तेतिकर्तव्यतां विनापीत्यर्थः। वसिष्ठः। सवर्णं दक्षिणामाहुर्गोप्रदाने विशेषतः। असुवर्णशब्दो यथाशक्तिहिरण्यपरः। सुवर्णं दक्षिणां दत्वा तावत् द्विगुणमश्नुते इति तेनैवोक्तः। परिमाणपर इति तु हेमाद्रिः। स्कांदे तु। यो नरो गां प्रयच्छेत्तु सवत्सां

कांस्यदोहनां। हेमशृंगीं रौप्यखुरां दुकूलक्षौमवासितां। शय्यास्तरणसंयुक्तां बहुपुष्पैः फलैर्युतां। आस्तरणांस्तर्प्पयि
त्वातुगंधमाल्यैरलंकृतां। देवैरध्यासितां तांतु सर्वैर्हस्तद्वयेनतु। मदुबंधेनवध्नीयात्तच्छ्लक्ष्णोनरज्जुना। कुशाः
सुवर्णबीजानितिलाः सिद्धार्थकास्तथा। प्रदद्यात्तां ततो विप्रश्च मंत्रेणानेनसुव्रत। सर्वदेवमयी दोग्ध्री सर्वलोकम
यीतथा। सर्वलोकनिमित्तांतां सर्वदेवनमस्कृतां। प्रपद्यामिमहासत्वामक्षयापशुभाप्रगां। एवमामंत्र्यतांदत्वा
यत्रयत्रप्रजायते। तत्रतत्रगता सातु जंतुंतारयते भयात्। इतिविधिरुक्तः। नंदिपुराणेतु। चित्रवस्त्रसंवृतां सलो
हपात्रींकुतपेनिष्टचरणं तथेति विशेष उक्तः। लोहंकांस्यंकुतपः कंबलः। कात्यायनः। यावंतितस्यां रोमाणि स
वत्सायां दिवंगतः। तावंतोवत्सरानास्ते सनरो ब्रह्मणोंऽतिके। अत्रशृंगादौ सुवर्णमैच्छिकपरिमाणंकपिलादानोक्तं
वा। यत्तुमदनरत्नादिभिः स्कांदोक्तमकारादौ हेमशृंगीदानमितिसंज्ञांतरमुक्तं तत्रमूलेनकलयामः। रूप्यखुरा
दानत्वापत्तेश्चेति। अथप्रयोगः। देशकालौ संकीर्त्य सवत्सगो------वर्षब्रह्मलोकनिवासकामः सो

वर्णप्रासादरत्नोज्वलविमानकरणकस्वर्गलोकप्राप्तिकामो विष्णुप्रीतिकामो वा गोदानमहं प्रतिपादयिष्ये इति संकल्प्य ब्राह्मणं वृत्वा संपूजयेत् । गोभ्यो यज्ञाः प्रवर्त्तंते गोभ्यो देवाः समुत्थिताः । गोभिर्वेदाः समुद्गीर्णाः सषडंगपदक्रमा इति मंत्रेण । सर्वपापहरा धेनुः सर्वमंगलदायिनी । संसारोत्तारिणी यस्माद्दानस्तुष्टं ददातु मे इति मंत्रेण वा । ततो गोरंगेषु देवानावाहयेत् । शृंगमूले ब्रह्मविष्णु आवाहयामि शृंगाग्रे सर्वतीर्थानि । शृंगमध्ये महादेवं । ललाटे भवानीं । नासावंशे षण्मुखं । नासापुटयोः कंबलाश्वतरौ । कर्णयोः अश्विनौ । चक्षुषोः शशिभास्करौ । दंतेषु वायून् । जिह्वायां वरुणं । हुंकारे सरस्वतीं । गंडयोः पक्षमासौ । ओष्ठयोः संध्येः । ग्रीवायामिंद्रं । कुक्षौ रक्षांसि । उरसि साध्यान् । पादेषु धर्मं । जंघासु धर्मं । खुरमध्ये गंधर्वान् । खुराग्रे पन्नगान् । खुराणां पश्चिमाग्रेषु अप्सरसः । पृष्ठे एकादशरुद्रान् । सर्वसंधिषु वसून् । श्रोण्योः पितॄन् । लांगुले सोमं । अधोगात्रेषु द्वादशादित्यान् । गोमूले गंगां । गोमये यमुनां । क्षीरे सरस्वती नदीं । दध्नि नर्मदां । सर्पिषि हुताशनं । रोमसु अष्टा[illegible] – शान्तिदेव

कोटीः॥ उदरे पृथ्वीं। स्तनेषु सागरान्। संपूज्य गां प्रदक्षिणी कुर्यात्॥ या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता। धेनुरूपेण सा देवी मम पापं व्यपोहतु। देहस्था या च रुद्राणी शंकरस्य च या प्रिया। धेनुः॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः। चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये। चतुर्मुखस्य या लक्ष्मी या लक्ष्मीर्धनदस्य च॥ लक्ष्मीर्या लोकपालानां सा धेनुर्वरदा मम। स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां तथा॥ सर्वपापहरा धेनुस्तस्माच्छ्रीरक्षयास्तु मे। ततो गोपुच्छेन तर्पयेत्। मातृपक्षाश्च ये केचिद्ये केचित्पितृपक्षकाः। गुरुश्वशुरबंधूनां ये कुलेषु समुद्भवाः। ये चान्ये लुप्तपिंडा वै पुत्रदारविवर्जिताः। ते सर्वे तृप्तिमायांतु गोपुच्छोदकतर्पणैः॥ क्रियालोपंगता ये च जात्यंधाः पंगवस्तथा। विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम। ते सर्वे तृप्तिमायांतु गोपुच्छोदकतर्पणैः॥ ततः पुच्छोदकं पीत्वा गवे ग्रासं दद्यात्। सौरभेयी जगत्पूज्ये विश्वमातरघापहे। मयादत्तमिमं ग्रासं ग्रसत्वं विष्णुवंदिते इत्यनेन॥ अथेत्यादि उदङ्मुखीं वा गां कृत्वा तस्याः पुच्छदेशे दाता प्राङ्मुखः ताम्रपात्रमाज्यकनकपुतंक

रेण गृहीत्वा तत्र गोपुच्छं निक्षिप्य घृतदिग्धं कृत्वोदङ्मुखाय इमां गां सवत्सां दिव्यवस्त्रेण दुकूलक्षौमेण चित्रवस्त्रे
ण वासं वीतां। यज्ञोपवीतिनीं स्वर्णतिलकां रौप्यखुरां ताम्रपृष्ठीं कांस्योपदोहां सुवर्णा परिकुतपोपरिवासं
स्थितां सितचामरभूषितां पुष्पशोभितां मुक्तालांगूलभूषितां घंटाभरणपट्टमयग्रहयुतां किंकिणीजालमंडितां
दर्पणयुतां पयस्विनीं सुशीलां शक्त्या आस्तरणोपेतशय्यायुक्तां तरुणीं रुद्रदैवत्यां कपिलां वा तुभ्यमहं संप्रददे
न ममेति सतिलकुशांवारि विप्रपाणौ दद्यात्। कपिले सर्वभूतानां पूजनीयासि रोहिणी। सर्वतीर्थमयी यस्मात्ततः
शांतिं प्रयच्छ मे। कपिलायाः मन्त्रसाधनभूताया विश्वस्याघप्रणाशनी। विश्वरूपधरो देवः प्रीयतामनया गवा।
गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः। गावो मे हृदये संतु गवां मध्ये वसाम्यहं। ततो वक्ष्यमाणगोमन्त्रोऽन्यतर
पाठः कार्यः। तत्र हेमाद्रौ मंत्रांतरं। गवामंगेषु तिष्ठंति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मे स्यादिह लोके प
रत्र च॥ गावो मां गोष्ठितिवा पाठः। जले जलप्रक्षेपमंत्रः। जलशायी ब्रह्मपिता पद्मनाभः सनातनः। अनंत

221

त॰ द्यो॰
२२१

भोगशयनः प्रीयतांपरमः पिता। इमांनः प्रतिगृह्णीष्व धेनुंदत्तांमयाभव। समेपापापनोदायगोविंदः प्रीय
तामिति। हेमाद्रौमंत्रांतरं। धेनोत्वंपृथिवीसर्वायस्मात्केशवसन्निभा। सर्वपापहरानित्यमतः शांतिंप्रयच्छ
मे। अग्निपुराणेत्वन्यदुक्तं। याधेनुः कश्यपस्यासीदग्नेर्वागौतमस्यच। सामेकामफलादेवी इहलोकेपरत्रच।
एवमुच्चार्यतिंविप्रंगोविंदमुपकल्पयेत्। अनुव्रजेत्तुगच्छंतंपदान्यष्टौनराधिप॥ अनेनविधिनाधेनुंयोविप्रा
यप्रयच्छति। सर्वकामसमृद्धात्माविष्णुलोकंसगच्छति। सप्तावरान्सप्तपरानात्मानंचैवसान्वयं। सप्तजन्म
कृतात्पापान्मोचयत्सवनीयते। गोमत्युक्ताभारते। गावोमामुपतिष्ठंतुहेमशृंग्यः पयोमुचः। सुरभ्यः सौरभे
यश्च सरितः सागरंयथा। गावः पश्याम्यहंनित्यंगावः पश्यंतुमांसदा। गावोस्माकंयथातासांयतोगाव
स्ततोवयं। यमः। गावः सुरभयोनित्यंगावोगुग्गुलसन्निभाः। गावः प्रतिष्ठाभूतानांगावः स्वस्त्ययनंमह
त्। अन्नमेवपरंगावोदेवानांहविरुत्तमं। जीवनंसर्वभूतानांरक्षंतिवहरंतिच। हविषामंत्रपूतेनतर्पयंत्य

२२१

मरान्दिवि। त्रयाणामपिहोतॄणांगावोहोमेप्रतिष्ठिताः। सर्वेषामपिभूतानांगावःशरणमुत्तमं। गावः
पवित्रंपरमंगावोमंगलमुत्तमं। गावःसर्वस्यलोकस्यगावोधन्यासवाह्नाः। नमोगोभ्यःश्रीमतीभ्यःसौर
भेयीभ्यएवच। नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः। घृतक्षीरप्रदागावोघृतयोन्योघृतोद्भवाः। घृत
नद्योघृतावर्त्तास्तामेसंतुसदागृहे। घृतंमेहृदयेनित्यंघृतंनाभ्यांप्रतिष्ठितं। घृतंमेसर्वतश्चैवघृतंमनसि
संस्थितं। गावोममाग्रतःसंतुगावःपृष्ठतएवच। गावोमेसर्वतश्चैवघृतंमनसिसंस्थितं। गावोममाग्रतः
संतुगावःपृष्ठतएवच। गावोमेसर्वतश्चैवगवांमध्येवसाम्यहमिति। वसिष्ठेनसर्वगोदानसाधारणोयंमंत्रउक्तः
। ततोदक्षिणांदत्वाशेषंसमापयेत्॥ इतिदिनकरभट्टसूनुगागाभट्टपूरितदिनकरोद्योतेदानकांडेगोदानप्रयो
गः॥ वर्णविशेषेफलविशेषोभारते। भोगसौख्यप्रदाश्वेताताम्राभापापनाशिनी। कृष्णास्वर्गप्रदाज्ञेयागौरीच
कुलवर्द्धिनी॥ रक्तारूपप्रदाज्ञेयापीतादारिद्र्यनाशिनी॥ पुत्रप्रदाकृष्णसारानीलाधर्मविवर्द्धिनी। कपिलास

दा॰ खो॰ वैपापघ्नीनानावर्णाचमोक्षदा। इतिदशवर्णधेनुदानं। अथसमानवत्सागोदानंभारते। तत्रकपिलोक्ता। रो
२२२ हिणींतुल्यवत्सांतुधेनंदत्वापयस्विनीं। सुव्रतांवस्त्रसंपन्नांसूर्यलोकेमहीयते। समानवत्सांशबलांधेनुंद
द्यात्पयस्विनीं। सुव्रतांवस्त्रसंपन्नांसोमलोकेमहीयते। समानवत्सांकृष्णांतुधेनुंदत्वापयस्विनीं॥ सुवस्त्रांवस्त्र
संवीतामग्निलोकेमहीयते। वातरेणुसवर्णांतुसवत्सांकांस्यदोहिनीं। प्रदायवस्त्रसंयुक्तांवायुलोकेमहीयते। धू
म्रवर्णामित्यर्थः। समानवत्सांधूम्रांतुधेनंदत्वापयस्विनीं। सुव्रतांवस्त्रसंवीतांयमलोकेमहीयते। अघ्न्यां
हेमसवर्णांतुसवत्सांकांस्यदोहनां। प्रदायवस्त्रसंवीतांवारुणंलोकमश्नुते। अघ्न्यागोः। हिरण्यवर्णांपिंगा
क्षीं सवत्सांकामदोहनां। प्रदायवस्त्रसंवीतांपितृलोकेमहीयते। सवत्सांपीवरांदत्वाशितिकंठमलंकृतां।
वैश्वदेवमसंबाधंस्थानंश्रेष्ठंप्रपद्यते। शितिकंठीकृष्णपिंगा। समानवत्सांगौरींतुधेनुंदत्वापयस्विनीं। सु
व्रतांवस्त्रसंवीतांसाध्यानांलोकमाप्नुयात्। वत्सोपपन्नांनीलांगांसर्वरत्नसमन्वितां। गंधर्वाप्सरसांलोका २२२

न्दत्वाप्राप्नोतिमानवः। गोप्रदानरतोयातिभित्वाजलदसंचयान्। विमानेनाकवर्णेनदिविराजन्विराजते। अ
त्रापिगोदानेतिकर्तव्यतादृष्टव्या। अथोभयतोमुखीदानं। च्यवनस्मृतौ। अभयशिरसंदद्यातस्याः कालः प्र
सवकालोनान्यंकालंप्रतीक्षेतसर्वैरेवपुण्यकास्तदैवयत्रसाईप्रसूतातत्रस्नातोब्राह्मणं। श्रुतवीलसस
शौचजातिक्रियादौर्गुण्येरूपेतंप्रणिपत्याहमतीवार्त्तोभीतोस्मादगाधादपारात्संसारार्णवात्समुद्धर्तुंदशावा।
न्दशपरान्आत्मानंचैछामिस्वामिन्भवंतंपात्रमासाद्येतिसचैतत्गृह्णातिदातातमनुमंत्रयेत्त्वंमहीमव
र्निविश्वधेनामिति। कइदंकस्माद्प्रतिगृहीतायांदक्षिणेनपाणिनावत्सयाकर्षयेत्। गर्भेंतुसन्नचेषामवेद
मितिनिष्क्रांतेनलमुपसमाधायदेवान्पितॄन्नदीःपर्वतान्वनस्पतीनुदधीस्तर्पयेत्तैस्तैर्मंत्रैस्तेषांमंत्रपदानि
भवंति। येदेवासोदिव्येकादशस्थ। उशंतस्त्वा। इमंमेगंगे। अद्भिःसुतोमतिभिश्चनो—हितः। वनस्पतेशत
वल्शोविरोह। समुद्रज्येष्ठाः। अहिरिवभोगैःपर्येतिबाहुं। मधुवाताऋतदनुपार्थिवीभिःपृथिवीं। ईळेद्यावा

।मही द्यौः। उर्वी पृथ्वी बहुले दूरे अंते। उपब्रुवे नमसा। गौरीर्मिमायेत्यादिभिश्चतुरक्षरी साज्याहुतीर्जुहोति ब्राह्म
णो जयेत्स्वस्त्ययनं वा चयीताथास्य कर्मणो व्युष्टिमुदाहरंति। अगम्यागामिनमभक्ष्यभक्षकमपेयपायिनं
। ब्रह्मघ्नं पितृघ्नं सद्यः पुनाति उपाध्यायां स्वसृतां स्वामिभार्यां मातरं मातृस्वसारं मातुलानीं भागिनीं भागिने
यीं शिष्यजायां धात्रीमन्यामप्यगम्यां गत्वोभयशिरसं सपरिकरं ब्राह्मणाय दद्यात्। परिकरोस्याः सुवर्णर
त्नरूप्यक्षेत्राणि ग्रामा वा धान्यानि वस्त्राणि रसालवाणाद्याश्चंदनाद्यागंधाः शतं गवां तदर्द्धमर्द्धं वा सर्वस्वं
वा सहतया ब्राह्मणाय दद्यान्महापातकविमुक्तये। अत्र स्वर्णसंख्या अलंकृसोक्तविधिना सुवर्णं त्रिपलान्वि
ता दातव्या द्विपलामथैकपलां कन्यसीमतेति देवलोक्तः। यश्चोभयमुखीं दद्यात्प्रभूतकनकान्वितां। तद्दिनं पा
यसाहारः पयसा वातिवाहयेत्।। सुवर्णस्य सहस्रेण तदर्द्धेनापि वा पुनः। तस्याप्यर्द्धशतं वाथ पंचाशच्च ततो
र्द्धकं।। यथाशक्त्यापि दातव्यं वित्तशाठ्यविवर्जितमिति वा होक्ता वा बोध्या। अगम्येत्यादिनोक्तामहापातकनिवृ

त्तिरूपलक्षणं। सूयमानं तु यो दद्याद्धेनुं द्रविणसंयुतां ससमुद्रगुहा भूमिः सशैलवनकानना॥ चतुरंता भवेद्दत्ता
पृथिवी नात्र संशयः॥ यावंति धेनुरोमाणि वत्सस्य च नराधिप। तावत्संख्यान्युगगणान्देवलोके महीयते। पि
तॄन् पितामहांश्चैव तथैव प्रपितामहान्। उद्धरिष्यत्यसंदेहो नरकाद्भूरिदक्षिणं॥ गोलोकः सुलभस्तस्य ब्रह्मलो
कश्च पार्थिव। स्त्रियश्च तं चंद्रसमानवक्त्राः प्रतप्तजांबूनदतुल्यवर्णाः। महानितंबस्तनमध्यवृत्ताभजंत्यज
स्रं नलिनाभनेत्राः इति मात्स्योक्तमपि बोध्यं। वाराहे विशेषः॥ प्रयोगेस्पष्टः॥ अथ प्रयोगः॥ कर्ता प्रसवार्तां गां द
त्त्वा स्नात्वा पात्रं ब्रूयात्। अहमतीवार्त्तो भीतो अस्मादगाधादपारात्संसारार्णवात्त्वमुत्तारयाभि दशावरान्दशपरान्नात्मा
नं च स्वामिन्भवेत्तं दानपात्रमासाद्येति तेन तथेत्युक्ते त्वं मही गौतमो वामदेव इंद्रस्त्रिष्टुप्पात्रानुमंत्रणे विनि
योगः॥ त्वं महीमवनिं विश्वधेनामिति पात्रमनुमंत्र्य देशकालौ संकीर्त्य पंचमहापातकतत्समोपपापादिना
शससमुद्रगृहवनशैलसहितपृथ्वीदानजफलप्राप्त्यैतत्सवत्सधेनुरोमसमसंख्ययुगावच्छिन्नदेवलोकपूज्य

दा·धो· त्वपितृउद्धादिदशापरावरनरकोद्धरणगोलोकप्राप्त्युत्तरब्रह्मलोकाधिकरणत्वकामउभयशिरसंगांदास्येउभयमु
२२४ खींदास्ये। स्वयमानांगांदास्ये इतिवासंकल्प्य पात्रंवृत्वा संपूजयेत्। गवामंगेषु। आगावइतिसप्तर्चेन चसूक्तेनागो
दानोक्तरीत्या शृंगमूलादिदेवतावाहनंतदुक्तरीत्या च स्रुवर्णशृंगादीनां यथास्थानं स्थापनं चकुर्यात्। ततःक्षौ
मंकौसुंभंवासआच्छादनमयाद्त्तंशुद्धं चित्रंसुनिर्मलं। सुरभिर्वस्त्रदानेन प्रीयतांपरमेश्वरीतिसमर्थ्य पुराणमेत्वंज
गन्मातर्देवि विष्णुपदे स्थिता। ग्रासंगृहाणमद्त्तंगोमातस्त्रातुमर्हसीति ग्रासंदत्वा पतीक्षेत्। वत्समुखेनिर्गतेगो
दानोक्तरीत्या सघृतसुवर्णकांस्येगोपुच्छंघृताक्तंकुर्यात्। तज्जलं चादाय रवीक्तफलं विप्रगोत्रनाममनीच समुच्चा
र्येमांगांसुभयशिरसंउभयमुखीं वा सुवर्णशृंगीमित्यादिगोदानवदुक्त्वा तुभ्यं संप्रददेनममेत्युक्त्वा पात्रहस्तेपु
छंदत्वा इमांगृहाणोभयमुखीं भवांस्त्रातामम्मास्तुवै। ममवंशविशुद्ध्यर्थं सदास्वस्तिकरोभव। ~रावतीति ऋचंज
पेत्। प्रतिगृहीता च प्रतिगृह्णामि धेनोत्वांकुटुंबार्थे विशेषतः। स्वस्तिर्भवतु मे नित्यं रुद्रमातर्नमोनमः। ततः। २२४

देवस्यत्वा रुद्रायगांकामस्तुतिंच पठित्वा स्योना पृथिवि इरावतीतिमंत्रद्वयंपठेत् । द्यौस्त्वेप्रतिददामि पृथिवी
तेप्रतिगृह्णामीतिदातृप्रतिगृहीतारौ वदेतामितिकेचित् । ततः पलंतद्द्वयंत्रयंवासुवर्णंदत्वारत्नादिचदत्वा
गोमतींजपेत् । ततोदाताप्रतिगृहीतावागर्भेनुगौतमोवामदेवस्त्रिष्टुप् । वत्साकर्षणेविनियोगः । वत्समाकर्षये
त् । ततः स्वगृह्योक्तमार्गेणाग्निंसंस्थाप्यतिलोदकेन गोपुच्छंगृहीत्वासव्येनैवयेदेवासोदिव्येकादशस्थदेवास्तृ
प्यंतु । उशंतस्त्वा । पितरस्तृप्यंतु । इमंमेगंगे । नद्यस्तृप्यंतु । अद्रिभिःसुतोमतिभिश्चनोहितः । पर्वतास्तृप्यंतु । व
नस्पतेशतवल्शोविरोहवनस्पतयस्तृप्यंतु । समुद्रज्येष्ठाः । उदधयस्तृप्यंतु । अहिरिवभोगैःपर्येतिबाहुं । नागास्तृ
प्यंतु । मधुवाताऋतायते । औषधयस्तृप्यंतु । ईळेद्यावापृथिवी । पृथ्वीस्तृप्यतु । महीद्यौःपृथिवीचनः । पृथ्वी
स्तृप्यतु । उर्वीपृथ्वीबहुलेदूरेअंते । पृथ्वीस्तृप्यतु । गौरीर्मिमायसलिलानितक्षतीति । पृथ्वीतृप्यः । एवंतर्पणां
तेन्वाधानंकुर्यात् । चक्षुषीआज्येनेत्यंते । अत्रप्रधाने गौरीर्मिमायेत्यादिमंत्रैश्चतुरचीत्याज्याहुतिभिः शेषे

228

णस्विष्टकृतमित्यादि। क्षेमप्रकाशमतेतु गोरीर्मिमायेति मंत्रस्तर्पण एव तथा चानिर्दिष्टदेवतत्वाद्व्याहृतिभिर्हो
मः प्रजापतिर्देवता। तत्र प्रजापतिं व्याहृतिभिश्चतुरशीतिसंख्याकाभिराज्याहुतिभिः शेषेपोत्यादि। इदं वन
मुक्तं गोरीर्मिमायेत्यादिपदस्यासंगतत्वापत्तेः। गोरीर्मिमायेत्यादिभिरादिभूतैर्गोपिकाशाकैर्हिरुण्वतीतिसूक्त
स्यैगौरिमीमेदनुवत्संमिषंतं। अयंसशिङ्क्तेयेनगौरभीवृता। सूयवसाद्भगवतीहिभूया इतिमंत्रत्रयेणाहुत्वाहोम
इतिकेचित्। ततोहोमांतेभूयसींब्राह्मणभोजनंचसंकल्प्य तद्दिने पयोभक्षः पायसभक्षो वातिष्ठेदिति। अथवैत
रणीदानं। ब्रह्मवैवर्ते। पाठलामथवाकृष्णां कुर्याद्वैतरणीं शुभां। स्वर्णशृंगींरौप्यखुरां ताम्रपात्रसुदोहनां। कृष्ण
वस्त्रयुगच्छन्नां सप्तधान्यसमन्वितां। कार्पासद्रोणशिखरआसीनां ताम्रभाजने। पट्टं हैमं प्रकुर्वीत लोहदंडस
मन्वितं। महामहिषमारूढं रूप्या शंकरे परे। इक्षुवंशमयं बद्ध्वा उडुपं रक्ष्या नौ। इममुच्चारयेन्मंत्रं संगृह्योद
कमंडलुं। यमद्वारे महाघोरे दृष्ट्वा वैतरणीनदी। तर्तुकामो ददाम्येतां तुभ्यं वैतरणीं वगां। विष्णुरूपद्विजश्रेष्ठ

भूदेवपंक्तिपावन। सदक्षिणां मया तुभ्यं दत्ता वैतरणी नदी॥ तांतत्तुंगां ददाम्येतां तुभ्यं वैतरणीमहं। धर्मराजं
च विप्रं च धेनुं वैतरणीं तदा। सर्वप्रदक्षिणीकृत्य ब्राह्मणाय निवेदयेत्। पुच्छं संगृह्य तद्दोरग्रे कृत्वा च ब्राह्म
णं। धेनुके त्वं प्रतीक्ष स्व यमद्वारे महापथे। उत्तितीर्षुरहं देवी वैतरण्यै नमो नमः॥ अनुव्रजेच्च गच्छंतं सर्वं तस्य
गृहं नयेत्। अत्र वैतरण्याः सुखोत्तरणकामो वैतरणीधेनुदानं करिष्य इति संकल्प्य कार्पासद्रोणेन परिता
म्रपात्रे धेनुं उडुपे चोत्तरूपं यमं संस्थाप्य गोदानोक्तमार्गेण गां यमाय सोममिति यमं च संपूज्य यमद्वार इति
मंत्रेण धेनुमभ्युक्ष्य कुशाद्यादाय पूर्ववत्फलमुच्चार्येमां उडुपास्थितयमप्रतिमासहितां कार्पासद्रोणोपरिस्थित
ताम्रपात्रसंस्थितां स्वर्णशृंगाद्युपस्करयुतां वैतरणीं तुभ्यं संप्रदद इति। दत्वा सुवर्णदक्षिणां दत्वा विष्णुरूपेति
मंत्रं पठित्वा धेनुके इति मंत्रेणानुगच्छेत्। मरणकाले वैतरणीं तु गां। शक्तोऽन्योऽशक्तश्च दत्वा श्रेयो दद्यान्नतस्मृति
तिव्यासोक्तेः। अकृतश्चाकृत इत्यर्थः। अथ मोक्षकरणपापोक्तेति धेनवः। तन्मंत्रादिवोदासीये। विधिस्तु गोदाने नी

पएव।मोक्षंदेहिहृषीकेशमोक्षंदेहिजनार्दन।मोक्षधेनुप्रदानेनमुकुंदः प्रीयतांमम।यन्मयाजन्मभिः पूर्वं
ऋणरूपेणसंचितं।ज्ञाताज्ञातविनाशायऋणधेनुंददाम्यहं।ऐहिकामुष्मिकंयच्चसप्तजन्मार्जितंऋणं।त
त्सर्वंशुद्धिमायातुप्रागेतांददतोमम।आजन्मोपार्जितंपापंमनोवाक्कायकर्मभिः।तत्सर्वंशुद्धिमायातुप्रागेतांदद
तोमम।आजन्मोपार्ज्जितंपापंमनोवाक्कायकर्मभिः।तत्सर्वंनाशमायातुगोप्रदानेनकेशव।अत्युत्क्रांतौप्रवृत्तस्य
स्करवोत्क्रांतिविवृत्तये।तुभ्यंसंप्रददेतांत्वांगांसत्तुत्क्रांतिसंज्ञिकां।एतासांधेनूनामशक्तौव्यासः।आसन्नमृत्यु
नादेयागोः सवत्सानुपूर्ववत्।तदभावेतुगौरेवनरकोद्धरणायवै।पूर्ववत्।गोदानेतिकर्त्तव्यताकामिमित्य
र्थः।अथगृष्टिदानं।।सद्यःप्रसूतागृष्टिगौः।तद्विधिर्विष्णुधर्मे।पुण्यंदिनमथासाद्यस्नात्वातर्प्यपितॄंस्तथा
।कृतोपवासःसंप्राप्यपंचगव्यंनरेश्वरः।घृतक्षीराभिषेकंचकृत्वाविष्णोःशिवस्यच।समभ्यर्च्ययथान्यायं
पुष्पादिभिरनुक्रमात्।उदङ्मुखींप्राङ्मुखींवागृष्टिंकृत्वापयस्विनीं।सपुत्रांवस्त्रसंवीतांसितयज्ञोपवीति २२६

नी। स्वर्णशृंगीरौप्यखुरं। सवर्णैंपरिसंस्थिता। शक्तितोदक्षिणायुक्तां ब्राह्मणायनिवेदयेत्। गावोममाग्रतः
संतुगावोमेसंतुपृष्ठतः। गावोमेहृदयेसंतुगवांमध्येवसाम्यहं। प्रदक्षिणंततः कृत्वाधेनुं द्विजवरंचतं। इमान्तः
प्रतिगृह्णीष्वधेनुंदत्तांमयातवासमेपापापनोदायगोविंदः प्रीयतामिति। एवमुच्चार्यतं विप्रं गोविंदं तु प्रक
ल्पयेत्। अनुव्रजेत्तुगच्छंतंपदान्यष्टौनराधिप। अनेनविधिनाधेनुंयोविप्रायप्रयच्छति। सर्वकामसमृद्धात्मा
विष्णुलोकंसगच्छतीति। अत्रत्रिरात्रगोदानं॥ तत्रैवत्रिरात्रंस्थंडिलेसुप्त्वात्रिरात्रंगोरसाशनः। तृप्तांतुतर्पिते
दत्वावाससमासंवृते द्विजे। सदक्षिणांमहाभागत्रिरात्रंगोरसैस्ततः। प्राणसंधारणंकृत्वाभवांलोकेमहीयते। या
वंतिधेनोरोमाणितावद्वर्षाणिमानवः। दत्वैवकपिलांविप्रः प्राप्नोत्यभ्यधिकंफलं। अत्रापिसमस्तगोदाने
तिकर्तव्यतादव्यनाद्रष्टव्या। एवंप्रकारेणकपिलादानेतुब्राह्मणस्यैवाधिकारः विप्रग्रहणात्। अन्यगोदा
नेतुशूद्रस्यापि। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैःश्चान्यैश्चमानवैः। लोकाः कामदुघाप्राप्तादत्वैतद्विधिना

न्पेति। विष्णुधर्मोत्तरात्। अथ देवताभ्यो गोदानं। स्कांदे॥ शिवाय विष्णवे वापि यो वै दद्यात्पयस्विनीं। धेनुं स्थानो
पहारार्थं स परं ब्रह्म गच्छति। भविष्ये। सौरीं सूर्याय यो दद्यात्तरुणीं च पयस्विनीं। कुलीनां कपिलां दत्वा दत्तं भवति
गोशतं। शिवधर्मेषु। दश गावः सवृषभा वृषभैकादशी स्मृता। शिवाय विनिवेद्यैवं विश्वदेवांतरात्मना। रुद्रैकाद
शतुल्यात्मा बलभोगादिभिर्गुणैः। शिवादिभिः स लोकेषु यथेष्टं मोदते वशी। भविष्ये तु। दश गावः सवृषभा वृषभै
कादशी स्मृता। सूर्याय विनिवेद्यैवं लभते तत्फलं शृणु। द्वादशादित्यतुल्यात्मा अणिमादिगुणैर्युतः। सौरादिसर्वलो
केषु सूर्यवन्मोदते दिवि। शिवधर्मे। सवृषं गोशतं दद्याच्छिवायातीवशोभनं। शतरुद्रबलोपेतो वीरभद्र इ
वापरः। गत्वा शिवपुरं दिव्यमशेषाधिपतिर्भवेत्। भविष्ये॥ सवृषं गोशतं दत्वा भास्कराय नराधिप। विमानैः सू
र्यसंकाशैर्दिवाकर इवापरः। गत्वादित्यपुरं रम्यं क्रीडते सूर्यवन्नृप। इति गोदानानि। अथ वृषदानं। भविष्ये॥
दशधेनुसमो नड्वान्। एकश्चैव धुरंधरः। दशधेनुप्रदानाद्धि वृष एको विशिष्यते। वृषभश्चापि पुष्टांगो ह्यु

रोगः पांडुनंदनः युवा भद्रः सुश्रीलक्ष्म सर्वदोषविवर्जितः। अलंकृत्य वृषं शांतं पुण्येन्हि समुपस्थिते। स्वर्णशृंगं गा
दिभिः सांगैर्गोदानोक्तैरलंकृतमिति मदनरत्ने। विशेषमाह। रूप्यलांगूलसंयुक्तं ब्राह्मणाय निवेदयेत्। धर्म
स्त्वं वृषरूपेण जगदानंदकारक। अष्टमूर्तेरधिष्ठानमतः पाहि सनातन। दत्त्वैवं दक्षिणायुक्तं प्रणिपत्य विस
र्जयेत्। सप्तजन्मकृतं पापं वाङ्मनःकायकर्मजं। तत्सर्वं विलयं याति गोदानसुकृतेन वै। यानं वृषभसंयुक्तं दीप्यमानं
सुशोभनं। आरुह्य कामगं दिव्यं स्वर्लोकमधिरोहति। यावंति चैव रोमाणि गोवृषस्य महीपते। तावद्वर्षसहस्राणि
गवां लोके महीयते। गोलोकादवतीर्णस्तु इहलोके द्विलो भवेत्। सत्रयाजी महातेजाः सर्वब्राह्मणपूजितः। सप्तजन्मा
वच्छिन्नकायीकवाचिकमानसीकसर्वपापनाशवृषभयुक्तदेदीप्यमानयानकरणस्वकर्मकरणस्वर्लोकाधिरो
हणवृषभरोमसमसंख्यवर्षावच्छिन्नगोलोकवासोत्तरैहिकसत्रयाजिसर्वब्राह्मणपूजितद्विजत्वकाम इति संकल्पः।
गोदानेति। कर्त्तव्यता समस्ता ज्ञेया। स्तनेषु सारघ्रं। विना देवतावाहनमपीति केचित्। रुद्रयागमिति प्रतिग्रहः। मीमांसे

दा॰पो॰ कधुरंधरः श्रुतिधरोन्यायोपिवागीश्वरासाहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः। यंविद्वन्मणिशेखरो
२२८ दिनकरः प्रासूतविश्वेश्वरंतेनाकारिसमस्तगोतिददतौसन्मल्लिकापद्धतिः॥ स्तनुर्दिनकरस्यैषभट्टविश्वेश्वराभि
धः॥ विद्यातिदाननिर्णीतौवक्तुमारभतेधुना। नंदिपुराणे। यस्तुपुण्यपरोमर्त्योजिगीषुःकीर्तिसाधकः। सविधा
नेनवैदद्याद्विद्यांविविधकामदां। विद्याचचतुर्दशभेदाषडंगाश्चतुरोवेदाधर्मशास्त्रंपुरातनं। मीमांसातर्क
मपिचएताविद्याश्चतुर्दशेतिनंदीपुराणात्। धर्मशास्त्रंस्मृतयः। पुरातनंपुराणंवेदपदमुपवेदानामप्युपल
क्षणं। सर्वेषामेववेदानामुपवेदान्शृणुष्वतान्। आयुर्वेदोथऋग्वेदेयजुर्वेदेधनुस्तथा। सामवेदस्यगांधर्वम
थर्वशास्त्रमथर्वणः। इतिगारुडे। तेषांतदंगत्वोक्तेः। अत्रचवेदवत्सत्कमकारणामेवस्मृतीनांधर्मशास्त्रत्वा
त्तदीकानांतदर्थविचारात्मकत्वाधर्मशास्त्रत्वात्क्षतेस्तद्दानस्यातिदानत्वमप्याहुः। हेमाद्रिमाधवनिबंधदा २२८
नेतुनेतिकेचित्। पुराणपदंचपुराणांतरनिरूप्यविद्याभेदपरं। पुराणांतरदत्वापराविद्याःसहस्रशः॥

आयुर्वेदः सस्यवेदो। शिल्पविद्यास्तथापराः॥ इति गारुडात्। वेददानं नंदीपुराणे। वेदविद्यां नरो दत्वा स्वर्गे कल्पत्रयं
वसेत्। विद्यादानं च त्रिविधं। अध्यापनप्रतिमादानपुस्तकदानभेदात्। तत्रादौ याज्ञवल्क्यः॥ सर्वकर्ममयं ब्रह्म
प्रदानेभ्योधिकं ततः॥ तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतः॥ ब्रह्मवेदः॥ विष्णुधर्मे। वेददानाद्वाप्नोति सर्वय
ज्ञफलं नृप। उपवेदप्रदानेन गंधर्वैः सहमोदते। वेदांगानां च दानेन शक्रलोकमवाप्नुयात्। अध्यापनविधिर्ग
रुडे॥ स्वयं शुचिः शुचीन्विप्रान्स्नातः स्नातो जितेंद्रियः॥ दर्भीनादाय पाणो तु पाठयेत्तांस्तथाविधात्। अनध्यायान्प
रिहरन्नीवातश्चावयन्नपि। एवं विधानयो यस्तु ऋचमकां प्रयच्छति। त्रिर्वित्तपूर्णा संपूर्णा तेन दत्ता मही भवेत्।
नैतत्कल्पसहस्रेण गदितुं शक्यते फलं। यद्वेददानेनाप्नोति स्वल्पादपि महीपते। यावंति वेदगीतानि पुण्यवेदव्रतानि
च। तावंति वेददानेन प्राप्नुयाद्भक्तिभावितः॥ उपाध्यायस्य यो वृत्तिं दत्वाध्यापयते जनं। किं न दत्तं भवेत्तेन धर्मकामा
र्थदर्शिते। छात्राणां भोजनाभ्यंगवस्त्रं भिक्षामथापि वा। दत्वा प्राप्नोति पुरुषः सर्वकामान्नसंशयः॥ आग्नेये।

प्रातरुत्थापयोवेदंवेदांगमपिपाठयेत्। पृथिवीदानतुल्यंस्यात्फलंतस्यनृपोत्तम। योवृत्तिंपठमानानांकरोत्यनुदि
नंनृप। सयज्ञफलमादत्तेदानाछादनभोजनैः। अपुत्रोलभतेपुत्रानधनोधनमाप्नुत्। अविद्वान्विद्यामाप्नोति
दुःखीदुःखात्प्रमुच्यते। उपवेदाध्यापनेवेदांगाध्यापनेचायमेवविधिः। अनध्यायवर्जनंतुनास्तिअंगा
न्यनध्यायइतिस्मरणात्। अथवेदप्रतिमादानंगारुडे। अथदानविधिंवक्ष्येरहस्यंपरमंमतं। यंविधायन
रोघोरान्निरयान्नोपसर्पति। आम्नायरूपाणिविधायसम्यक्हैमानिपूर्वोदितलक्षणानि। विशुद्धनानामणि
भूषितानि। ऋगादिवेदक्रमतोनिवेश्यामहाभूतघटदानोनोक्तलक्षणानीत्यर्थः। वासांसिदेयानियथाक्र
मेणपीतानिशुक्लान्यथलोहितानि। नीलानिचैवंकुसुमानिदत्वासंपूज्यगंधाक्षतधूपदीपैः। आमोदिमो
दकयुतंघृतपायसंचसक्षौद्रमन्नमथदुग्धघृतक्रमेण। तेभ्योनिवेद्यविधिवत्प्रयतःप्रणम्यसम्यक्प्र
दक्षिणाविधिर्विदधीतविद्वान्। तेषांपूजाविधिःकार्योगापआधीमतांवर। व्याहृत्यव्याहृतिःकुर्यादावाहन

विसर्जने। मंत्रैरेतैस्ततः कुर्यादमीषामनुमंत्रणं। ऋग्वेद पद्मपत्राक्ष रक्ष रक्ष क्षिपाशुभं। शरणं त्वां प्रपन्नो
ऽस्मि धेहि मे हितमद्भुतं। यजुर्वेद नमस्तेस्तु लोकत्राणपरायण। त्वत्प्रसादेन कामे निखिलाः संतु संततं। सामवेद मा
हाबाहो त्वं हि साक्षादधोक्षजः। प्रसादसुमुखो भूत्वा कृपया तु गृहाण मं। अथर्वन् सर्वभूतानां त्वदायत्ते हिताहि
ते। शांतिं कुरुष्व देवेश पुष्टिमिष्टिं प्रयछतः। इति संप्रार्थ्य देवेशान् विप्रेभ्यः प्रतिपादयेत्। प्रदद्यादेकदेकस्मै
सुवर्णत्रिपलान्वितं। दद्यादेकपलोपेतमेकैकमिह दुर्बलः। अथ स्वशक्तितो वापि दानमेषां विधीयते। एतदे
व प्रमाणं स्यादेतेषां मूर्तिनिर्मितौ। अनधीनवतो वेदान्वेददाने विधिस्त्वयं। सदाध्ययनमुक्तस्य शिष्याध्यापन
मेव हीति। अथ शास्त्रप्रदानं। नंदीपुराणे। तर्कविद्यां नरो दत्वा वारुणं लोकमाप्नुयात्। मीमांसां तु नरो दत्वा शास्त्र
मिंद्रपुरं वसेत्। आत्मविद्यां तु यो दद्यात्कल्पायुतमनुत्तमं। तत्र लोके वसेन्मर्त्यो यत्र ब्रह्मा वसेत्प्रभुः। शाल्यविद्यां
नरो दत्वा याति वै ब्रह्मणोंतिकं। कलाविद्यां नरो दत्वा वैष्णवं लोकमाप्नुयात्। आयुर्वेदं नरो दत्वा वारुणं लोकमा

ब्रुयात्। पाणिनीयं निरुक्तादि वेदांगानि स्मृतिस्तथा। दत्वा ज्ञानमवाप्नोति वेदांतांश्च विशेषतः॥ धर्मशास्त्रं नरो
दत्वा स्वर्गलोके महीयते। पुराणविद्यादातारस्त्वनंतफलभागिनः॥ धर्मशास्त्रं स्मृतयः॥ तद्भेदे मामकाश्लोकाः॥
मनुर्वसिष्ठोत्रिपराशरौ च दक्षोशनो व्यासबुधप्रचेताः॥ कात्यायनो गौतमशंखविष्णुसंवर्त्तशातातपयाज्ञवल्क्य
॥१॥ हरीतपैठीनसिऋष्यशृंगाबौधायनोमाघवृहस्पती चासस्यव्रतात्रेयपुलस्त्यवत्समरीचिपारस्करगार्ग्यसोमाः॥२॥
कार्ष्णीजिनः काश्यपनाचिकेतजाबालिलौगाक्षिसनत्कुमाराः॥ यमोंगिराः कश्यपबभ्रुवृद्धशातातपानारददेव
लौव। पितामहः शौनकछागलेयभृगुक्रतुस्कंदसुमंतवध्या। तथा भरद्वाजकपिंजलौ च प्रजापतिश्चाप्यथ शाक
प्राणि॥४॥ आपस्तंबश्च्यवनो जातुकर्ण्यो विश्वामित्रो जमदग्निः कणादः॥ एते चान्या त्यौलहं चाश्वलायनीयं चाथो
लेखितं जानकं च॥५॥ शतद्रुवृद्धवासिष्ठवृद्धपाराशरीयकं। नैताः प्रमाणं स्मृतयो हेमाद्यादावनुक्तितः॥६॥ एते
षामध्यापनविधिः पूर्ववदेव। विशेषस्तु नंदीपुराणे। अनेनैव विधानेन ब्राह्मणे शीलशालिनि। प्रवोधव

तिधीयुक्तेयुक्तिज्ञेवेदवादिनी। विन्यसेत्तुशुभंशास्त्रंमहापुण्यजिगीषया। विधिः। पूर्वोक्तकुशधारणप्रातस्ना
नपूर्वकत्वादीतिकर्तव्यताविधिः। गुरुश्चाधीतशास्त्रःस्याच्छब्दशास्त्रविशारदः। अनक्षरंचहृद्यस्तुव्युत्पादि
श्यार्थबोधकः। आलापमात्रैर्व्याख्यानैर्यश्चशिष्यान्प्रबोधयेत्। तस्माद्व्याख्यांशुभांश्रुत्वागुरवक्त्रान्नरोत्तमः।
स्वदंचसंशयेजातेपृष्ट्वावाक्यमुदीरयेत्। गुरुणाचोत्तमेकालेश्रूवद्वाक्यमाश्रयेत्। पश्चाश्रुत्वान्यतःशास्त्रंसं
स्कारंचाथवाशुभं। अन्यस्यजनयेत्कीर्तिंसगुरोर्ब्रैलहाभवेत्। नानावृत्तानुरूपेणलालिसेनवाचयेत्। समाहे
वाचनेमिष्टंब्रूयादेवंविचक्षणः। सुश्रुतंसुश्रुतंब्रूयादस्तुव्याख्यानमित्यदः। श्लोकः प्रवर्तितोधर्मैराज्ञावास्तुस
दाजयी। धर्मवान्धनसंपन्नोगुरुश्चास्तुनिरामयः। इतिश्रोत्रपथाज्जातंगंतव्यंचविभाविते। शिष्यैःपर
स्परंशास्त्रंचिंतनीयंविचक्षणैरिति। तथाश्लोकंप्रहेलिकांगाथामन्यद्वापिसुभाषितं। दत्वाप्रीतिकरंया
तिलोकमप्सरसांशुभंतथा। यथैकोजीवतिप्राणिकयापिकिलपुत्रचित्। अप्रदानात्पिसाविद्याकुलाना

231

दा॰ धो॰ शातमुद्धरेत्। अप्रदातअविहितदानकेत्यर्थः॥ वाराहे। रामायणं भारतं च दत्वा स्वर्गे महीयते। पुराणं तर्क
२३१ शास्त्रं च छंदोलंकारलक्षणं। वेदमीमांसकं दत्वा शिवधर्मं चवैन्नृप। सप्तद्वीपपृथिव्यां तु राजराजो भवेत्तु
स इति। अथैतत्पुस्तकदानं। वाराहे। विद्यादानविधिं वक्ष्ये यथातत्वेन ते पुनः। सुसमे भूप्रदेशे च गोमयेनोपले
पिते। पुष्पप्राकारसंपन्ने गीतवाद्यसमाकुले। चतुरस्रं वितानं च कृत्वा तत्रोपलेपयेत्। वेदिकां चतुरस्रां च चं
दनेनैव कारयेत्। संस्थाप्य पुस्तकं तत्र धर्मशास्त्रस्य धीमता। ब्राह्मणान्वेदसंपन्नान् छंदोलक्षणपार
गान्। लिखापयित्वा यत्नेन तत्समग्रं शुभाक्षरैः। सौवर्णी लेखनी कार्या मषीभाडं च रूप्यकं। जयशब्दं
समुद्घोष्य आरभ्य लेखकः सुधीः। चंद्रसूर्योपरागे च संक्रांत्ययनवासरे। पुण्येन्हि तत्सुसंपूज्य वस्त्रालंकार
भूषणैः। घृतधेन्वायुतरत्नैर्दद्यात्पुणवते ततः। रत्नानां दक्षिणा तेन दानं। तच्छास्त्रं शृण्वतां नित्यं जनानां नाश २३१
पमाप्नुयात्। इति। उपक्रमोपसंहाराभ्यां सर्वपुस्तकदानमेतद्दिति केचित्। प्रकरणाद्धर्मशास्त्रदानमिति मदनरत्नः॥ प्र

तिमादानेपुस्तकदानेचस्त्रियोप्यधिकारः। स्त्रीवानेनैवविधिनाविद्यादानफलंलभेदितिहेमाद्रौनंदीपुराणात्। अथपुराणदानं। नंदीपुराणे। पुराणविद्यादातारःस्त्वनंतफलभागिनः। पुराणभेदेमामकाः श्लोकाः। ब्राह्मंपाद्मंवैष्णवंवायवीयंमार्कंडेयंनारदीयंभविष्यलैंगंस्कांदंगारुडंमात्स्यकौर्मंब्रह्मांडंचब्रह्मवैवर्तमेव।१। वाराहमाग्नेयमथोपिपुण्यंश्रीवामनंभागवतंतथैव। इत्येवमष्टादशवायवीयस्थानेचकेचित्त्वथशैवमाहुः।२। खेंदु १० पांडवशरो ५५ दधिद्वये २४। नंद ९ बाणयुग २५ सागरेंदवः १४। रुद्र ११ चंद्रवसु ८१ नंदचंद्रकाः १९ शैलचंद्र १७ मनु १४ सूर्य १२ दतिकुः १८।३ नलषोडश १६ खचंद्र १० दंतिगो १८ रेभिरेवगणिताः सहस्रकाः। कालिकाह्वयमथोपराशरंनारसिंहमथनारदीयकं।४। सनत्कुमारीयमथोपिसौरंदौर्वासिसंज्ञानवकापिलेये। श्रीविष्णुधर्मोत्तरशैवधर्मौमाहेश्वरंनंदिपुराणमेव।५। कौमारौशनसेदेवीपुराणंवारुणंतथा। एतान्युपपुराणानि। संख्ययाष्टादशानितु।६। अथैतेषांदानविधिः। ब्राह्मंतुदशसाहस्रंपुराणंपरिकीर्तितं। लिखित्वातच्चयोदद्याज्जलधेनुसमन्वितं।

दा॰ख्यो॰
१३२

ठ। वैशाखां पौर्णमास्यांतुब्रह्मलोकेमहीयते॥ एतदेवयदापद्मंमभूद्धैरण्मयंजगत्॥ तद्वृत्तांताश्रयंतद्वत्पाद्ममित्युच्यतेबुधैः॥ पाद्मंतत्पंचपंचाशत्सहस्राणीतिपठ्यते॥ तत्पुराणंचयोदद्यात्सुवर्णकमलान्वितं॥ ज्येष्ठेमासितिलैर्युक्तंसोश्वमेधफलंलभेत्॥ वाराहकल्पवृत्तांतमधिकृत्यपराशरः॥ यत्राहधर्मानखिलांस्तद्युक्तंवैष्णवंविदुः॥ तदाषाढेचयोदद्याद्घृतधेनुसमन्वितं॥ पौर्णमास्यांविपूतात्मासपदंयातिवारुणं॥ चतुर्विंशतिसाहस्रंतत्पुराणंविदुर्बुधः॥ श्वेतकल्पप्रसंगेनधर्मान्वायुरिहाब्रवीत्॥ यत्रतद्वायवीयंस्याद्रुद्रमाहात्म्यसंयुतं॥ चतुर्विंशतिसाहस्रंपुराणंतदिहोच्यते॥ श्रावण्यांश्रावणेमासेगुडधेनुसमन्वितं॥ योदद्याद्दधिसंयुक्तंब्राह्मणायकुटुंबिने॥ शिवलोकेसपूतात्माकल्पमेकंवसेन्नरः॥ यत्राधिकृत्यगायत्रींवर्ण्यतेधर्मविस्तरः॥ वृत्रासुरवधोपेतंतद्भागवतमुच्यते॥ सारस्वतस्यकल्पस्यमध्येयेस्युर्नसंशयः॥ तद्वृत्तांतोद्भवंलोकेतद्भागवतमुच्यते॥ लिखित्वातच्चयोदद्यात्हेमसिंहसमन्वितं॥ पौर्णमास्यांप्रोष्ठपद्यांसयातिपरमंपदं॥ अष्टादशसहस्राणिपुराणंतत्प्रकीर्तितं॥५॥ यत्राहना

२३२

रदो धर्मान्बृहत्कल्पाश्रितांस्त्विह पंचविंशतिसाहस्रं नारदीयं तदुच्यते। तदिदं पंचदश्यां तु यो दद्याद्धेमसंयुतं।
उत्तमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभं॥६॥ यत्राधिकृत्य शकुनीन् धर्माधर्मविचारणं। पुराणं नवसाहस्रं मार्कंडे
यमिहोच्यते। परिलिख्य च यो दद्यात्सौवर्णकरसंयुतां। कार्तिक्यां पुंडरीकस्य यज्ञस्य फलभाग्भवेत्॥७॥ यत्तदीशानक
ल्पस्य वृत्तांतमधिकृत्य च। वसिष्ठायाग्निना प्रोक्तमाग्नेयं तत्प्रचक्षते। लिखापयित्वा यो दद्याद्धेमपद्मसमन्वितं। मार्ग
शीर्ष्यां विधानेन तिलधेन्वान्वितं तथा। एतत्षोडशसाहस्रं सर्वक्रतुफलप्रदं॥८॥ यत्राधिकृत्य माहात्म्यमादित्यस्य च
तुर्मुखः। अघोरकल्पविश्रांतप्रसंगेन जगत्पतिः। मनवे कथयामास भूतग्रामस्य लक्षणं। चतुर्दशसहस्राणि
तथा पंचशतानि च। भविष्यचरितप्रायं भविष्यं तदिहोच्यते। तत्पौषे मासि यो दद्यात्पौर्णमास्यां विमत्सरः। गुड
कुंभसमायुक्तमग्निष्टोमफलं लभेत्॥९॥ रथंतरस्य कल्पस्य वृत्तांतमधिकृत्य च। सावर्णिना नारदाय कृष्णमा
हात्म्यसंयुतं। यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः। तदष्टादशसाहस्रं ब्रह्मवैवर्तमुच्यते। पुराणं ब्रह्मवैवर्तं

योदद्यान्माघमासिच। पौर्णमास्यांसभवंनंब्रह्मलोकेमहीयते।।१०।।यत्राग्निर्लिंगमध्यस्थःप्राहदेवोमहेश्वरः।
धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्यचा। कल्पांतलैंगमित्युक्तंपुराणंब्रह्मणास्वयं। तदेकादशसाहस्रंफाल्गु
न्यांयःप्रयच्छतितिलधेनुसमायुक्तंसयातिशिवसात्म्यतां।।११।। महावराहस्यपुनर्माहात्म्यमधिकृत्यच। विष्णु
नाभिहितंक्षोण्येतद्वाराहमिहोच्यते। मानवस्यप्रसंगेनकल्पस्यमुनिसत्तम। चतुर्विंशत्सहस्राणितत्पुराणमि
होच्यते। कांचनंगरुडंकृत्वातिलधेनुसमन्वितं। पौर्णमास्यांमधौदत्वाब्राह्मणायकुटुंबिने। वाराहस्यप्रसादे
नपदमाप्नोतिवैष्णवं।।१२।। यत्रमाहेश्वरान्धर्मानाधिकृत्यचषण्मुखः। कल्पेतत्पुरुषेवृत्तेचरितैरुपबृंहि
तं। स्कांदंनामपुराणंतदेकशी। तन्निगद्यते। सहस्राणिशतंचैकमितिमर्त्येषुपद्यते। परिलिख्यचयोदद्याद्धे
मशूलसमन्वितं। शैवंचपदमाप्नोतिमकरोपगमेरवेः।।१३।। त्रिविक्रमस्यमाहात्म्यमधिकृत्यचतुर्मुखः। त्रि
वर्गमभ्यधात्तत्रवामनंपरिकीर्त्यते। पुराणंदशसाहस्रंकूर्मकल्पानुगंशिवं। यःशरद्विषुवेदद्याद्धैमवंयात्स

सौपदं।१४। यत्र धमार्थकामानां मोक्षस्य चरसालये। माहात्म्यं कथयामास कूर्मरूपी जनार्दनः। इंद्रद्युम्नप्रसंगे
न ऋषीणां शक्रसंनिधौ। समादशसहस्राणि। लक्षकल्पानुषंगिकं। योदद्यादयने कूर्मं हेमकूर्मसमन्वितं। गोस
हस्रप्रदानस्य स फलं प्राप्नुयान्नरः १५ श्रुतीनां यत्र कल्पादौ प्रवृत्यर्थं जनार्दनः। मत्स्यरूपी च मनवे नरसिंहोप
वर्णनं। अधिकृत्याब्रवीत्सप्तकल्पवृत्तं मुनिव्रताः। तन्मात्स्यमनुजानीध्वं सहस्राणि चतुर्दश। विषुवे हेममत्स्ये
न धेन्वा चैव समन्वितं। योदद्यात्पृथिवी तेन दत्ता भवति चाखिला।१६। यदा च गारुडे कल्पे विश्वराद्गरुडध्वजः। अधि
कृत्याब्रवीत्कृष्णो गारुडं तदिहोच्यते। तदष्टादशचैकं च सहस्राणीह पठ्यते। सौवर्णहंससंयुक्तं गारुडं विषुवे न
रः। योददाति परांसिद्धिमाप्नोति शिवसंमितां १७। ब्रह्मा ब्रह्मांडमाहात्म्यमधिकृत्याब्रवीत्पुनः। तत्र द्वादशसाह
स्रं ब्रह्मांडं द्विशताधिकं। भविष्याणां च कल्पानां श्रूयते यत्र विस्तरः। तद्ब्रह्मांडपुराणं तु ब्रह्मणा समुदाहृतं। योद
द्याद्व्यतीपाते पत्राणयुगसंयुतं राजसूयसहस्रस्य फलमाप्नोति मानवः। हेमधेन्वा युतं तच्च ब्रह्मलोकफल

दा॰घो
२३४

मदं।१०।भारतहरिवंशश्रवणविधिरनेडमल्लहरसरस्वतीदानविधिश्च पितृकृतकर्मविपाकसारे ज्ञेयः।उपपु
राणदानविधिरपि पूर्वोक्तपुस्तकदानविधिना स्पष्टः। नंदीपुराणे। येपि पत्रं मषीपत्रं लेखनीयं पुस्तादिकं। दद्युः
शास्त्राभियुक्ताय तेपि विद्याप्रदायिनः। यांति लोकान्शुभान्मर्त्याः पुण्यभाजो नराधिप॥ मीमांसैकधुरंधरः श्रु
तिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः। यं विद्वन्मणिशेखरो दिनकरः प्रास्त वि
श्वेश्वरं तेनेत्थं समकारि पद्धतिरियं विद्यातिदाने शुभा। इति मीमांसकभट्टविश्वेश्वरकृतौ दानदिनकरद्योतेति
दाननिरूपणे। आधाय राधाधवपादपद्मे बुद्धिं समाधाय मनश्च सम्यक्। प्रेक्ष्यावतां प्रेक्ष्य ततो निबंधान्विश्वेश्वरः
शैलददौ तनोति। अथ पर्वतदानं हेमाद्रौ पद्मे। मेरोः प्रदानं वक्ष्यामि दशधा मुनिसत्तम। यत्प्रमादान्नरो लोकाना
प्नोति सुरपूजितान्। प्रथमो धान्यशैलः स्यात् द्वितीयो लवणाचलः। गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः। पंच
मस्तिलशैलः स्यात्। षष्ठः कार्पासपर्वतः। सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः। राजतो नवमस्तद्वद्दशमः शार्करा

२३४

चलः। वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः।। मंडपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखं। प्रागुदक्प्रवणं तद्वत्प्राङ्मु
खं वा विधानतः।। गोमयेनोपलिप्तायां भूमावास्तीर्य वा कुशान्। तन्मध्ये पर्वतं कुर्याद्विष्कंभं पर्वतान्वितं। धान्यद्रोण
सहस्रेण भवेद्गिरिरिहोत्तमः।। मध्यमः पंचशतिकः कनिष्ठः स्यात्त्रिभिः शतैः। मेरुर्महाव्रीहिमयस्तु मध्ये
सुवर्णवृक्षत्रयसंयुतः स्यात्। पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः।। पश्चाच्च गारुत्मतनील
रत्नैः। सौम्येन वैडूर्यसरोजरागैः। श्रीखंडखंडैरभितः प्रवाललतान्वितः शुक्तिशिलातलः स्यात्। ब्रह्माथ विष्णु
र्भगवान्पुरारिर्दिवाकरोप्यत्र हिरण्मयः स्यात्। मूर्द्ध्यवस्थागतमत्सरेण कार्याः सुवर्णेन तथाद्विजौघाः चत्वा
रि शृंगाणि च राजतानि नितंबभागेपि च राजतं स्यात्। आर्द्रेक्षुवंशावृतकंदरस्तु घृतोदकप्रस्रवणश्च दिक्षु। शुक्लां
बराण्यंबुधरावली स्यात्पूर्वेण पीतानि च दक्षिणानि वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतो घनाली।। रौ
प्यान्महेंद्रप्रमुखानथाष्टौ संस्थाप्य लोकाधिपतीक्रमेण नानाफलाली च समंततः स्यान्मनोरमं माल्यविलेप

रा॰ षो॰ नं चावितानकं चोपरि पंचवर्णमम्लानपुष्पाभरणं सितं च। इत्थं निवेश्य। मरुशैलमग्रमेरोस्तु विष्कंभगिरीन्क्रमे
२३५ ण। तुरीयभागे न चतुर्दिशं तु संस्थापयेत्तु ष्यं विलेपनाद्यान्। पूर्वेण मंदरमनेकफलैश्च युक्तं युक्तं गणैः कनकभद्र
कदंबचिन्हं। कामेन कांचनमयेन विराजमानमाकारयेत्कुसुमवस्त्रविलेपनाद्यैः॥ क्षीरारुणोदसरसा च वनेन
चैव रौप्येण शुक्लिघटितेन विराजमानं। याम्येन गंधमदनश्च निवेशनीयो गोधूमसंचयमयः कलधौतजंब्वा।
हैमेन यक्षपतिनाध्युतमानसेन वस्त्रैश्च राजतवलेन च संयुतः स्यात्। पश्चात्तिलाचलमनेकसुगंधपुष्पसौ
वर्णपिप्पलहिरण्मयहंसयुक्तः। आकारयेद्रजतपुष्पवनेन तद्वत्स्नान्वितं दधिसितोदसरस्तथाग्रे। संस्थाप्य
तं विपुलशैलमथांतरेण शैलं सुपार्श्वमथ माषमयं सुवस्त्रां पुष्पैश्च हेमवटपादपशेखरं तमाकारयेत्कनकधे
नुविराजमानं। माक्षीकभद्रसरसा च वनेन तद्वत्तरौप्येण भास्करकृतां च युतं विधाय। होमश्चतुर्भिरथ वेदपुराण
वद्भिः दांतैरनिंद्यचरिताकृतिभिर्द्विजेंद्रैः पूर्वेण हस्तमितमत्र विधाय कुंडं कार्यस्तिलैर्यवघृतेन समित्कुशैश्च॥ २३५

त्रौचजागरमनुद्धतगीतरूपैरावाह्यनंचकथयामिशिलोच्चयानां । आवाहनमंत्राः प्रयोगेस्यपृष्टाः । एवमामंत्र्यता
न्सर्वान्प्रभातेविमलेपुनः । स्नातायगुरवेदद्यान्मध्यमंपर्वतोत्तमं । विष्कंभपर्वतान्दद्यादृत्विग्भ्यः क्रमशोनृप । गा
वोदद्याच्चतुर्विंशदथषोडशपार्थिव । शक्तितःसप्तवाष्टौवापंचदद्यादशक्तवान्‌ । एकांवागुरवेदद्यात्कपिलांगांपय
स्विनी । अन्नाद्भवंतिभूतानिजगदन्नेनवर्त्तते । अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः । धान्यपर्वतरूपेणपाहि
तस्मान्नमोन्नमः । अनेनविधिनायस्तुदद्याद्धान्यमयंगिरिं । मन्वंतरशतंसाग्रंदेवलोकेमहीयते । अप्सरोगण
गंधर्वैराकीर्णेनविराजिता । विमानेनदिवः । पृष्ठमायातिस्मरसेवितः । कर्मक्षयाद्राजराज्यंप्राप्नोतीहनसंश
यः । विधानमिति । अत्रकालः । कार्तिक्यामयनेचैवग्रहणेवापिसर्वशः । अन्येष्वपिचकालेषुयदाश्रद्धाभिजा
यते इतिब्रह्मांडात्‌ज्ञेयः । प्रथमइत्यादिपाठसाम्यादनुवादः नतुक्रमविधिः । मंडपइतिक्लिप्तमधुपर्काधिवास
नादीनांतुलोक्तानामुपलक्षणं । कुंडंत्वेकमेवाऋत्विजोष्टौचत्वारोवा । पूर्वतःकारयेत्कुंडंहस्तमात्रंसुशोभनं । आ

दा.पो.
२३६

लिणास्तत्र होतारो अष्टौ चत्वार एव चेति। ब्रह्मांडादिति हेमाद्रिः। तुलापुरुषे षोडशानां मध्ये षण्णामेव होमक
र्तृत्वात्तदनुवादः। तेन षोडश एव ऋत्विज इत्यन्ये। भूमावित्युक्ते वैदिर्नेति केचित्। किंतु मंडपपूर्वभागे एवं कुं
डं विधाय मंडपपूर्वोत्तरे स्वदेवतावेदिं कृत्वा तत्र ग्रहादियज्ञेति हेमाद्रिः। द्रोणसहस्रेणेत्यादि शक्तविषयं। अला
भे वा यथाशक्त्या कारयेद्धृतान्वितइति। ब्रह्मांडात्। कुर्याद्विभवसारत इति भविष्योत्तराच्च। महाव्रीहय इति इ
दमुपलक्षणं। व्रीहिभिः कारयेत्तं तु गोधूमैरथवा यवैरिति भविष्योत्तरात् महाव्रीहयो राजशालयः। वृक्षत्रये
ति। दक्षिणोत्तरयोर्मंदारपारिजातौ मध्ये कल्पतरुरिति वृक्षत्रयं। अत्र च पूर्वपश्चिमयोः हरिचंदनसंतानवृक्षा
वपि कार्यौ। मंदारः पारिजातश्च तृतीयः कल्पपादपः। एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निवेशयेत्। हरिचंदनसंतानौ
पूर्वपश्चिमयोः हरिचंदनसंतानौ पूर्वपश्चिमभागयोः। निवेश्यौ पूर्वशैलेषु विशेषाच्छर्कराचल इत्युक्ते विशेषा
दित्यनेन शर्कराचल एव तयोरावश्यकत्वादन्यत्राशक्तौ वृक्षत्रयमेवेति मदनरत्नः। वृक्षत्रयांतर्गतः। हरिचंदनसं २३६

तानयोः शर्करा चलआवश्यकत्वोक्त्या अन्यत्रानावश्यकत्वादशक्तौ एक एव वृक्ष इत्यपि केचित्। वज्रं हीरकं। गारुत्मतं मरकतं। सरोजरागः पद्मरागः। मुक्तादीनां राजतशृंगेषु खचितत्वेन पूर्वादिसंलग्नत्वे मानाभावात्स्थापनमित्यन्ये। शुक्तिशिलेति। शुक्त्य एव शिलाः। ताभिस्तलं अधोदेशो यस्येत्यर्थः। ब्रह्मादीति। ब्रह्मा विष्णु रुद्रादि सप्रतिमा मूर्द्धनि स्थाप्या इत्यर्थः। द्विजौघा इति। ब्राह्मणः पक्षिणश्चेत्यर्थः। चत्वारीति शृंगाकाराणि कार्याणीत्यर्थः। नितंबेति। धान्यराशेर्मध्यभागं परिकल्प्य रजतसूत्रेण वेष्टयेदित्यर्थः। आर्द्रे इति। आर्द्रेक्षव एव वंशाः तैरावृता आच्छिन्नाः। कंदरा यस्य सः। तत्रैव कंदराः परिकल्प्येक्षुभिः छादयेत्। घृतेति चतुर्दिक्षु घृतपूर्णानि पात्राणि स्थापयेदित्यर्थः। शुक्लेति दिक्षु पूर्वादिक्रमेण शुक्लपीतकर्बुररक्तवस्त्राणि स्थाप्यानीत्यर्थः। एतेषां च स्थापनं मध्ये रोप्यानि तिलोकपालाष्टकस्य भूमौ स्थापनं। समंतादिति केचित्। नितंबभाग इत्यन्ये। मूर्द्धीत्यपरे। नानेति। फलानां माल्यानां विलेपनस्य च भूमौ स्थापनं। तुरीयेति। चतुर्थभागे नैको न तु सर्वे चतुर्थांशेन विष्कंभान् पर्वतान् कारयेत्। पृथगिति पा

दा.पो. ध्यात्। पूर्वेणेति मंदरो व्रीहिमय इति हेमाद्रिः। विष्कंभपर्वतं चैव यवैः कुर्यात् पर्वत इति ब्रह्मांडाद्यवमय इत्यन्ये। ग
२३० णैरिति त्रिभिः गुरुभिरित्यर्थः। भद्रकदंब कदंबाकारो वृक्षः। सौवर्णतद्वृक्षयुक्तमित्यर्थः। कामेनेति। मदूनि स्थित
स्य कदंबस्य मूले स्थापने। कामलक्षणमुक्तं कल्पतरुदाने। क्षीरेति। अरुणोदसरस्थानीयाक्षीरपूरितरौप्यघटि
तवनयुक्तं चेत्यर्थः। याम्येनेति। सौवर्णजंबुवृक्षतन्मूलस्थसौवर्णकुबेरप्रतिमायुक्तमित्यर्थः। एवं च देवमानसे
नसरसा वनेन च युक्तमित्यर्थः। पश्चादिति सौवर्णपिप्पलमूलस्थितसौवर्णहंसयुक्ते तिले विपुलशैलं कुर्यादित्य
र्थः। दधिपूर्णराजतपात्रे कल्पितयत्सरः तच्छीतोदस्थाने कल्पनीयमित्यर्थः। सुपार्श्वमिति। सौवर्णवटवृ
क्षमूलस्थितसौवर्णधेनुयुक्तमित्यर्थः। माक्षीकं मधु कामादीनां स्थापने विशेषः शर्कराचले मंदारे कामदेवश्च
प्रत्यावक्त्रः सदा भवेत्। गंधमादनशृंगे च धनदः स्यादुदङ्मुखः। प्राङ्मुखो वेदपूर्णिश्च हंसः स्याद्विपुलाचले।
हैमी सुपार्श्वे सुरभिर्दक्षिणाभिमुखी भवेदिति। पाद्मेभिहितः। होमश्चेति। होमस्तिलाज्येन सहस्रसंख्या २३०

क्रः करालककुडोक्केरिति हेमाद्रिः। अन्येतु एवंविधास्तथा विप्रा होमं कुर्युरतंद्रिताः॥ इंद्राद्या लोकपालाये ते
षां होमो विधीयते। तल्लिंगैश्चैवमैंत्रैश्च समिद्भिरथवा तिलैः॥ पौरुषेण तु सूक्तेन ब्रह्मादीनां विधीयते। तथाव्या
हृतिभिर्होमं तिलैराज्येन चैव हि। अष्टशतं तु होतव्यं सर्वकामसमृद्धय इति ब्रह्मांडात्। अष्टशतं होमः। समित्तिल
योर्विकल्प इत्याहुः देवतास्तन्मंत्राश्च प्रयोगे स्पष्टाः। एवमिति। विमल इति प्रभातविशेषणं। स्नात्वेति गुर्वर्त्वि
ग्भिरभिषिक्तः। गाश्चेति। गवां दक्षिणात्वेन दानमिति केचित् सहस्रदक्षिणं कृत्वा शक्त्याशुचिभवस्यचेति
ब्रह्मांडात् सहस्रं दक्षिणा। गवादीनां त्वंगत्वे नादृष्टार्थं दानमिति हेमाद्रिः। इष्टार्थत्वसंभवे दृष्टार्थत्वस्यान्यात्वा
तुलावदिदमनुज्ञार्थं गोदानं। तेन यथेछविभागपक्षोप्यस्तीति संप्रतीमः। भोजनं शक्तितः कुर्यात्सर्वशैलेष्वम
त्सरः। सर्वत्राक्षारलवणमश्नीयात्तदनुज्ञया। अतो भोजने विकल्पः। ऋत्विजामपीति हेमाद्रिः। अंते च पर्वतोपस्क
रांस्वान्मापयेद्ब्राह्मणायत्विति विशेषः शेषं स्पष्टं। इति धान्यपर्वतविधिः। वक्ष्यमाणलवणादिपर्वतेषु धा

238

दा·खं·
२३८

न्यपर्वतधर्मातिदेशो हेमाद्रौ मामात्स्ये। पर्वतानामशेषाणामेषएवविधिः स्मृतः। ग्रहाणांलोकपालानांब्रह्मा
दीनांचसर्वशः। स्वमंत्रैरेवसर्वेषुहोमः शैलेषुपद्यते। उपवासोभवेन्नित्यमशक्तेनक्तमिष्यते। विधानंसर्वशैला
नांक्रमशः शृणुपार्थिवदानकालेषुयेमंत्राः पर्वतेषुचतत्फलमिति। अथलवणाचलः। हेमाद्रौ पाद्मे। अथातः
संप्रवक्ष्यामिलवणाचलमुत्तमं। यत्प्रदानान्नरोलोकमाप्नोतिशिवपूजितं। उत्तमः षोडशद्रोणः कर्त्तव्योलव
णाचलः। मध्यमस्यात्तदर्द्धेनचतुर्भिरधमः स्मृतः। वित्तहीनोयथाशक्त्याद्रोणादूर्ध्वंतुकारयेत्। चतुर्थांशेनवि
ष्कंभपर्वतान्कारयेत्पृथक्। विधानंपूर्ववत्कुर्यात्ब्रह्मादीनांचसर्वदा। तद्वद्धेमतरून्सर्वान्लोकपालान्निवेशनं।
सरांसिकामदेवादींस्तद्वदत्रनिवेशयेत्। कुर्याज्जागरमत्रापिदानमंत्रान्निबोधत। सौभाग्यरससंभूतोयतोयं
लवणोरसः। तदात्मकत्वेनचमांपाहिपापान्नगोत्तम। यस्मादन्नरसाः सर्वेनोत्कृष्टालवणंविना। प्रियंतंशिव
योर्नित्यंतस्माच्छांतिंप्रयच्छमे। विष्णुदेहसमुद्भूतंयस्मादारोग्यवर्द्धनं। तस्मात्पर्वतरूपेणपाहिसंसारसागरात्। २३८

अनेनेविधिनायस्तुदद्यालवणपर्वतं। उमालोकेवसेन्निसंततोयातिपरांगतिं। विधानमितिप्रजनमिसर्थः। प्र
र्ववद्दितिधान्यशैलोद्दितसर्वधर्मीतिदेशः। जागरग्रहणमनुवादः। पूर्ववदेवान्नदानविकल्पोद्रष्टव्यः। अथगुड
पर्वतःपाद्मे। अथातःसंप्रवक्ष्यामिगुडपर्वतमुत्तमं। यत्प्रदानान्नरःस्वर्गमाप्नोतिसुरपूजितं। उत्तमोदशभि
र्भारैर्मध्यमःपंचभिर्मतः। त्रिभिर्भारैःकनिष्ठःस्यात्तदर्धेनाल्पवित्तवान्। तद्वदामंत्रणंपूजाहेमवृक्षसुरार्चनं। वि
ष्कंभपर्वतास्तद्वत्सरांसिवनदेवताः। होमंजागरणंतद्वल्लोकपालाधिवासनं। धान्यपर्वतवत्कुर्यादिमंमंत्रमुदीर
येत्। यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः। सामवेदस्तुवेदानांमहादेवस्तुयोगिनां। प्रणवःसर्वमंत्राणांनारीणां
पार्वतीयथा। तथारसानांप्रवरःसदैवेक्षुरसोमतः। ममतस्मात्परांलक्ष्मींददस्वगुडसर्वदा। यस्मात्सौभाग्यदायिन्याभ्राता
त्वंगुडपर्वतं। निवासश्चापिपार्वत्यास्तस्मान्मांपाहिसर्वदा। अनेनविधिनायस्तुदद्याद्गुडमयंगिरिं। पूज्यमानःसगंधर्वैर्गौ
रीलोकेमहीयते। पुनःकल्पशतांतेतुसप्तद्वीपाधिपोभवेत्। आयुरारोग्यसंपन्नःशत्रुभिश्चापराजितः। अत्रचदान

२३९

दा॰ प्रा॰ मेतत्प्रशस्तं स्यात्स्त्रीणांता अविशेषत इति ब्रह्मांडात्। स्त्रीणामेवाधिकार इति काश्चित्। अयमनुवाद इत्यन्ये। उत्तम

२३९ इति इदमुपलक्षणं। विंशद्वारस्तु कर्तव्यः शेषं पूर्ववदाचरेदिति। ब्रह्मांडात्। तद्विधिः। अत्र हेमवृक्षादीनां पुनः संकी

र्तनात्। भृंगादीन्यन्यप्रकाराणि। अत एव ब्रह्मांडे। लोकपालसमोपेतं तथा कांचनशृंगिणां। मुक्ताफलविचित्रांगं वस्त्रा

लंकृतविग्रहं। प्रवालपल्लवोपेतमिक्षुदंडोपवेणुकं। कुर्यात्कांस्यमयस्कंधं नानासानुविभूषितं। सर्वौषधिस

मोपेतं सभृंगसमहाद्रुममित्युक्तं। अत्र ऋत्विजश्चत्वार एव। पंचमो गुरुरत्रोक्तस्तान्। सर्वान्पूजयेत्तत्र इति ब्रह्मांडा

त्। होम इति। अतिदेशप्राप्तो ग्रहादिहोमो व्याहृतिहोमश्चात्र द्रष्टव्यः। महाव्याहृतिभिश्चैव। अश्रुतं तत्र होमयेतद्

ति ब्रह्मांडात्। शेषं स्पष्टं। अथ सुवर्णाचलः। पाद्मे। अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमं। यस्य प्रदानाद्भवनं वैरिं

चं याति मानवः। उत्तमः पलसाहस्रो मध्यमः पंचपंचभिः शतैः। तदर्धेनाधमः सर्वं विदध्याद्द्विजसत्तम। विष्कं

भशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत्। नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय वै नमः। यस्मादनंतफलदस्तस्मात्पाहि २३९

शिलोच्चय। यस्मादग्नेरपत्यं त्वं यस्मात्तेजो जगत्सवेः। हेमपर्वतरूपेण तस्मात्पाहि नगोत्तम। अनेन विधिना यस्तु द
धात्कनकपर्वतं। स याति परमं ब्रह्मलोकमानंदकारकं। तत्र कल्पशतं तिष्ठेत्ततो याति परां गतिं। अत्र मध्यमशै
लस्याल्पद्रव्यत्वे गुरवे दानं बहुद्रव्यत्वे तु गुर्वनुज्ञया तुलापुरुषवदन्येभ्योपि दानमिति हेमाद्रिः॥ युक्तं त्वाचार्या
यैव दानमिति। अथ तिलाचलः पाद्मे। अथातः संप्रवक्ष्यामि तिलशैलं विधानतः॥ यत्प्रदानान्नरो याति विष्णुलो
कमनुत्तमं। उत्तमो दशभिर्द्रोणैः पंचभिर्मध्यमस्तथा॥ त्रिभिः कनिष्ठो विप्रेंद्र तिलशैलः प्रकीर्त्तितः॥ पूर्ववि
च्चापरे सर्वं वृक्षाविष्कंभकादिकं। दानमंत्रान्प्रवक्ष्यामि यथावद्द्विजसत्तम। यस्मान्मधुवने विष्णोर्देहस्वेदस
मुद्भवाः॥ तिलाः कुशाश्च माषाश्च तस्माच्छन्नो भवत्विह। हव्यकव्येषु यस्माच्च तिलैरेवाभिरक्षणं। भवादुद्धर
शैलेंद्र तिलाचल नमोस्तु ते। इत्यामंत्र्य ततो दद्यात्तिलाचलमनुत्तमं। सर्वेश्वरपदं याति पुनरावृत्तिदुर्लभं। दीर्घायु
ष्यमवाप्नोति इह चामुत्र मानवः॥ पितृभिर्देवगंधर्वैः पूज्यमानो दिवं व्रजेत्॥ उत्तम इति इदमुपलक्षणं। शत

240

दा·धो·

२४०

त्रयेणद्रोणानां शत्स्यावपि प्रकल्पयेदिति। ब्रह्मांडात्। पूर्ववदिति। अत्र केचित् दिशाचलान्मंदारादीनति
लैरेव प्रकल्पयेदिति ब्रह्मांडे तिलाचलेतिदेशप्राप्तविष्कंभपर्वतद्व्यवाधात्। अन्यपर्वते तत्र धान्मेरेवविष्कंभ
पर्वता इत्याहुः। अन्ये तु चतुर्थीशादिपदसमभिव्याहारात् मुख्यपर्वतद्रव्येणैव विष्कंभपर्वतकल्पनमित्याहुः
। अत्र लोकपालाः सौवर्णाः। ब्रह्मादिलोकपालांश्च सौवर्णान्कारयेत्तथेति ब्रह्मांडात्। अत्र सहस्रं दक्षिणा।
सहस्रं दक्षिणां दद्याच्छत्त्या वापि प्रदापयेत्। अत्रापि चगावीदातव्या अष्टौ चत्वार एवं चेति ब्रह्मांडात्। यस्मादिति।
एतेषां दानमंत्रान्प्रवक्ष्यामीति उपक्रमे दानमंत्रत्वश्रवणादुपसंहारे इत्यामंत्र्येत्यस्योच्चारणार्थत्वेनाप्युपपत्ते
रेतेषां दानमंत्रत्वमेवेति केचित्। सर्वाचलेष्वामंत्रणमंत्राणां वदानमंत्रा इति मदनरत्नः। लैंगे तु दशतालं प्रमा
णो नदंसस्त्वाप्य वै मुने। दंडात्मादे शतलेधेउत्तमः परिकीर्तितः। चतुरंगुलहीनश्च मध्यमः परिकीर्तितः।
दंड ~ त्यः कनिष्ठः स्यान्नवैर्वस्त्रैश्च वेष्टयेदित्युक्तं। निष्कपरिमितसुवर्णेन सद्योजातवामदे[illegible]कादिपंच

२५

वस्त्रपंचकैकादशरुद्राणांनिष्कत्रयसौवर्णप्रतिमाः।रजतस्यचलोकपालादिप्रतिमाःकार्याइत्युक्तं।प्रस
न्नोत्तरतंत्रेतुतुलावह्निनायकोमापतिपूजनमष्टकुंडीयोक्ताषड्भागेनततःकार्याःसमंताद्दूर्वपर्वताः।माल्य
वान्निषधश्चैवहेमवान्हेमकूटकः।गंधमादनशैलश्चशृंगवान्श्वेतशैलकाः।इत्यनेनमाल्यवन्निषध
हिमवद्धेमकूटगंधमादनश्वेताख्याषट्किछंभाइत्युक्तं।तथा।अधस्तात्कल्पवृक्षाणांसौवर्णेकमलेह
रंसुखासीनंचतुर्बाहुंजटामुकुटमंडितं।त्रिनेत्रंसौम्यवदनंसौवर्णंन्यस्यपूजयेत्।पूजनंचैकादशरुद्रनामभिः
।पूजयित्वाद्विजानग्रेदीनांधकृपणांस्ततइति।अथकार्पासाचलः।पाद्मे।कार्पासपर्वतस्तद्वद्विंशद्भारैरिहो
त्तमः।दशभिर्मध्यमःप्रोक्तः।कनिष्ठःपंचभिःस्मृतः।भारेणाल्पधनोदद्याद्वित्तशाठ्यविवर्जितः।धान्यपर्व
तवत्सर्वमासाद्यराजसत्तम।प्रभातायांतुशर्वर्यांदद्यादिदमुदीरयन्।त्वमेवावरणंयस्माल्लोकानामिहसर्व
दा।कार्पासाचलस्मात्त्वमघौघध्वंसनोभव।एवंकार्पासशैलेंद्रंयोदद्याच्छर्वसन्निधौ।रुद्रलोकेवसेत्कल्पंततो

२५१

राजाभवेदिह। धान्यपर्वतवदिति। ब्रह्मांडपुराणोक्तविशेषधर्मातिरिक्तसकलधर्मातिदेशसंग्रहः। तेचसौ
वर्णशिखरान्सर्वान्सर्वरत्नोपशोभितान्। नानाधातुविचित्रांगान् इतिविष्कंभपर्वतेषुधर्मविशेषः। कुं
डेवास्थंडिलेवापितत्रहोमोविधीयते। ऋत्विजश्चतथाचाष्टौकारयेद्वित्तमान्। होमोव्याहृतिभिश्चैवअ
ग्नौतद्देवतैरपि। गंधेनसर्पिषातत्रतथाभक्ष्यतिलैरपि। अयुतंहोमसंख्याचपलाशसमिधस्तथेतिहोमधर्माद्
ति। अथघृताचलः। पाद्मे। अथातःसंप्रवक्ष्यामिघृतशैलमनुत्तमं। तेजोमृतमयंदिव्यंमहापातकनाशनं
विंशत्याघृतकुंभानामुत्तमःस्यात्घृताचलः। दशभिर्मध्यमःप्रोक्तःपंचभिस्त्वधमःस्मृतः। अल्पवित्तः
प्रकुर्वीतद्वाभ्यामिहविधानतः। विष्कंभपर्वतांस्तद्वच्चतुर्भागेनकल्पयेत्। शालितंडुलपात्राणिकुंभोपरि
निवेशयेत्। कारयेत्संहतान्सर्वान्यथाशोभंविधानतः। वेष्टयेच्छुक्लवासोभिरिक्षुदंडफलादिकैः। धान्य
पर्वतवत्त्वेवंविधानमिहपठ्यते। अधिवासंचकुर्वीततद्धोमंसुरार्चनं। प्रभातायांतुशर्वर्यांगुरवेविनिवेदये

तः। विष्कंभपर्वतांस्तद्दत्विग्भ्यः शांतमानसः॥ संयोगात् घृतमुत्पन्नं तस्मादमृततेजसोः॥ तस्मात् घृतार्चि। वि
श्वात्मा प्रीयतामत्र शंकरः॥ यस्तु तेजोमयं ब्रह्म घृते तत्त्वव्यवस्थितं। घृतपर्वतरूपेण तस्मान्नः पहि भूधर।
अनेन विधिना दद्यात् घृताचलमुत्तमं। महापातकयुक्तोपि लोकमायाति शांकरं। हंससारसयुक्तेन किं
किणीजालमालिना। विमानेनाप्सरोभिश्च सिद्धविद्याधरैर्वृतः॥ विहरेत्पितृभिः सार्द्धं यावदाभूतसंप्लवं॥ कुं
भ इति सहस्रफलं कुंभः॥ शालीतंडुलेति पर्वतपंचकान्यस्य लोकप्रसिद्धकुंभपंचके निधात्तदपेक्षया बहुवचनं इ
ति हेमाद्रिः॥ वस्तुतु विष्कंभपर्वतानामाज्यद्रव्यकत्वाभावान्मुख्यपर्वताज्यस्य बहुत्वे नैककलशे निवेशासंभवा
बहुकलशाधारकत्वेन तदभिप्रायं बहुवचनं। नचैवमव्यवस्थितशास्त्रार्थापत्तिः॥ एकस्मिन्द्वयोर्वा कलश
योस्तावदाज्यानिवेशस्य निसत्वात् तादृशकुंभकरणं तु प्रमाणाभावादेवायुक्तं। अतो मुख्यपर्वतकलशापेक्ष
यैव बहुत्वमिति वदामः॥ अथ रत्नाचलमनुत्तमं। मुक्ताफलसहस्रेण पर्वतस्यादिहोत्तमः॥ मध्यमः पंचश

दा॰ घो॰ तिकस्त्रिशतेनाधमः स्मृतः । चतुर्थांशेन विष्कंभपर्वताः स्युः समंततः । पूर्वेण वज्रगोमेदैर्दक्षिणेनेंद्रनील
२४२ कैः । पुष्परागयुतैः कार्यो विद्वद्भिर्गंधमादनः । वैडूर्यविद्रुमैः पश्चात्संमिश्रो विपुलाचलः । पद्मरागैः ससौपर्णै
रुत्तरेण तु विन्यसेत् । धान्यपर्वतवत्सर्वमत्रापि परिकल्पयेत् । तद्वदावाहनं कुर्याद्वृक्षान्देवांश्च कांचनान् । पूजयेत्पु
ष्पपानीयैः प्रभाते च विसर्जनं । पूर्ववद्गुरुऋत्विग्भ्य इमांमंत्रानुदीरयेत् । यथा देवगणाः सर्वे सर्वरत्ने – पिस्थि
तिः । त्वं च रत्नमयो नित्यमतः पाहि महाचल । यस्माद्रत्नप्रसादेन तुष्टिं प्रकुरुते हरिः । महारत्नप्रसादेन तस्मा
त्वं पाहि सर्वतः । अनेन विधिना यस्तु दद्याद्रत्नमयं गिरिं । स याति वैष्णवं लोकममरेश्वरपूजितः । यावत्कल्पश
तं साग्रं वसेदिह नराधिप । रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् । ब्रह्महत्यादिकं यत्स्यादिह वामुत्र वा
कृतं । तत्सर्वं नाशमायाति गिरिर्वज्रहतो यथा । चतुर्थांशेनेति संख्यायेत्यर्थः । अत्र विष्कंभपर्वताः । न धा
न्यमय इत्याह । वज्रगोमेदैरिति समसंख्यैरिति हेमाद्रिः । सौपर्णैरिति गारुत्मतैरित्यर्थः । देवांश्चेति लोक २४२

पाला अपि सौवर्णा इत्यर्थः। अत्रापि गुर्वादिकसंप्रदानत्वपक्षो यथेच्छविभागपक्षो वा द्रष्टव्यः। अथ रौप्याच
लः॥ पाद्मे॥ अथातः संप्रवक्ष्यामि रौप्याचलमनुत्तमं। यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तमः। दशभिः पल
सहस्रैरुत्तमो रजताचलः। पंचभिर्मध्यमः प्रोक्तस्तदर्धेनाधमः स्मृतः। अशक्तो विंशतेरूर्ध्वं कारयेच्छक्तितः
सदा। विष्कंभपर्वतांस्तद्वत्तुरीयांशेन कल्पयेत्। पूर्ववद्राजतान्कुर्यान्मंदारादीन्विधानतः। कलधौतमयांस्तत्र
लोकेशानर्चयेद्बुधः — ब्रह्मविष्ण्वर्कवान्कार्यो नितंबोत्र हिरणमयः। राजतं स्याद्यदन्येषां सर्वं तदिह कांचनं। शे
षं च पूर्ववत्कुर्याद्धोमजागरणादिकं। दद्यात्तद्वत्प्रभाते तु गुरवे रौप्यपर्वतं। विष्कंभशैलान्त्विग्भ्यः पूज्य वस्त्रवि
भूषणैः। इमं मंत्रं पठन्दद्यात्दर्भपाणिर्विमत्सरः। पितृणां वल्लभं यस्माद्धरींद्वोः शंकरस्य च। रजतं पाहि त
स्मान्नः शोकसंसारसागरात्। इत्थं निवेश्य यो दद्याद्रजताचलमुत्तमं। गवायुतसहस्रस्य फलं प्राप्नोति मानवः। सो
मलोके स गंधर्वैः किंनराप्सरसां गणैः। पूज्यमानो वसेद्विद्वान्यावदाभूतसंप्लवं। राजा तानि लयेनेतानि देशे प्राप्नुय

(243)

वादिमयत्वबाधः।गुरवइतिअत्रापिगुर्वर्त्तिकसंप्रदानत्वपक्षोयथेछविभागपक्षोवाद्रष्टव्यः।अथशर्करा
चलः॥पाद्मे।अथातःसंप्रवक्ष्यामिशर्कराचलमुत्तमं।यस्यप्रदानाद्विष्ण्वर्करुद्रास्तुष्यंतिसर्वदा।अष्टाभिःश
र्कराभारैरुत्तमस्यान्महागिरिः।चतुर्भिर्मध्यमःप्रोक्तोभाराभ्यामधरःस्मृतः।भारेणवार्द्धभारेणकुर्याद्यःस्वल्प
वित्तवान्।विष्कंभपर्वतान्कुर्यात्तुरीयांशेनमानवः।धान्यपर्वतवत्सर्वमासाद्यामरसंयुतं।मेरोरुपरितद्वच्चस्था
प्यंहेमतरुत्रयं।मंदारःपारिजातश्चतृतीयःकल्पपादपः।एतद्वृक्षत्रयंमूर्ध्निसर्वेष्वपिनिवेशयेत्।हरिचंदन
संतानौपूर्वपश्चिमभागयोः।निवेश्यौसर्वशैलेषुविशेषाच्छर्कराचले।धान्यपर्वतवत्सर्वमावाहनमखादिकं।
कृत्वाथगुरवेदद्यान्मध्यमंपर्वतोत्तमं।ऋत्विग्भ्यश्चतुरःशैलानिमान्मंत्रानुदीरयेत्।सौभाग्यामृतसारोयंपर
मंशर्करायतः।तन्मंमानंदकारीत्वंभवशैलेंद्रसर्वदा।अमृतंपिबतांयेतुनिपेतुर्भुविशीकराः।देवानांत
त्समुत्थोयंपाहिनःशर्कराचल।मनोभवधनुर्मध्यादुद्भूताशर्करायतः।तन्मयोसिमहाशैलपाहिसंसारसा

गरात्। योदद्याच्छर्कराशैलमनेन विधिना नरः॥ सर्वपापविनिर्मुक्तः प्रयाति शिवमंदिरं। चंद्रादित्यप्रतिका
शमधिरुह्यानुजीविभिः॥ सहेमयानमातिष्ठेत्ततो रुद्रपुरं व्रजेत्। ततः कल्पशतांते तु सप्तद्वीपाधिपो भवेत्। आ
युरारोग्यसंपन्नो यावज्जन्मायुतत्रयं। भोजनं शक्तितः कुर्यात्सर्वशैलेष्वमत्सरः॥ विष्कंभपर्वतानीति। अ
त्र विष्कंभा धान्यपर्वतवद्यवादिमया एव। अतिदेशिकद्रव्यबाधे मानाभावात्। इति केचित्। शार्करामयाद्
यन्ये। गुरव इति। अत्रापि गुर्वीर्त्विक्संप्रदानपक्षो यथेष्टविभागपक्षो वा द्रष्टव्यः॥ सर्वशैलदानविधिः॥ अथ धा
न्यशैलदानप्रयोगः॥ तत्रादौ तन्निर्माणप्रकारः॥ राजशालिद्रोणसहस्रेण तदर्द्धेन तदर्द्धेन वा। शक्त्या नामंड
पमध्ये राशिं कृत्वा पलतदर्द्धतदर्द्धसुवर्णमितं पारिजातं मूर्द्धनि संस्थाप्य पारिजातं सुवर्णचतुर्थांशनिर्मि
तं कल्पतरुं दक्षिणे मंदारं चोत्तरे च स्थापयेत्। शक्तौ पूर्वोक्तपरिमाणौ हरिचंदनसंतानौ पूर्वपश्चिमयोः स्थाप
येत्। शर्कराचल एव तयोरावश्यकत्वात्। ततः पूर्वे मुक्तात्रयं हीरकत्रयं च दक्षिणतो गोमेदत्रयं पुष्परागत्रयं

पश्चात्। मरकतत्रयं नीलत्रयं उत्तरतो वैडूर्यत्रं पंचपद्मरागत्रयं च तैः खचितं राजतशृंगचतुष्टयं वा स्था
पयेत्। श्रीखंडखंडानि चोर्ध्वाग्राणि राशेरुपरिभागे स्थापयेत्॥ प्रवालानि च अवतरणभागे स्थाप्यानि पूर्वादि
षु यथाशक्ति सुवर्णनिर्मितब्रह्मविष्णुरुद्रसूर्यप्रतिमाः यथाशक्ति रजतनिर्मितशृंगचतुष्टयं शृंगोपरि य
थाशक्ति सुवर्णनिर्मितान्यक्षिणोयोमिनश्च शृंगाधस्तात् स्थापयेत्। शृंगेभ्यो बहिर्यथाशक्ति रजतनि
र्मितान् लोकपालान् दिग्विदिक्षु स्थापयेत्। मध्ये च रजतसूत्रेण वेष्टयेत्। ततः पूर्वादिषु शुक्लकृष्णपीतकर्बु
रकानि वासांसि मेघाकाराणि स्थाप्यानि। घृतपात्रचतुष्टयं प्रस्रवणस्थाने दिक्षु स्थाप्यं। इक्षुभिः कंद
राः कल्पनीयाः। वसंततश्चंदनपुष्पफलानि स्थापयेत्॥ ततः पूर्वकल्पितमेरुचतुर्थांशाद्रीदिभिर्यवैर्वा
मंदारं परिकल्प्य तदुपरि शक्त्या सौवर्णवृषत्रयं सौवर्णं च कदंबवृक्षं वृक्षमूले च सुवर्णनिर्मितं कामं प्र
द्युम्नं स्थाप्य शक्त्या रजतपात्रं क्षीरपूर्णमरुणोदसरः स्थाने कल्पयित्वा राजतशकलैः चैत्ररथाख्यं व

नंवल्पयित्वानानाफलवस्त्रचंदनपुष्पैर्भूषयेत्। ततोदक्षिणेतावद्भिर्गोधूमैःगंधमादनंतदुपरिसुवर्णेन
जंबूवृक्षंतन्मूलेचोदङ्मुखींधनदप्रतिमांसंस्थाप्यघृतपूरितंराजतपात्रंमानससरःस्थानेपरिकल्प्यराजतश
कलैर्गंधर्ववनंपरिकल्प्यनानाफलवस्त्रचंदनपुष्पैर्भूषयेत्। ततःपश्चिमेतावद्भिस्तिलैर्विपुलंकल्पयित्वात
दुपरिसौवर्णंपिप्पलंपिप्पलमूलेसौवर्णंहंसंप्राङ्मुखंसंस्थाप्यदधिपूरितंराजतपात्रंसितोदसरःकल्पयित्वार
जतशकलैर्वैभ्राजवनंपरिकल्प्यवस्त्रादिभिर्भूषयेत्। ततउत्तरेतावद्भिर्माषैःसुपार्श्वंतदुपरिसौवर्णंवटं
वटमूलेचसौवर्णकामधेनुप्रतिमांदक्षिणाभिमुखींसंस्थाप्यमधुपूरितराजतपात्रंभद्रसरःप्रकल्प्यरौप्य
शकलैसावित्रंवनंप्रकल्प्यवस्त्रादिभिर्भूषयेत्। ततउपरिवितानंबध्नीयात्। कर्ताधिवासनदिनेदेशकाले
संकीर्त्यममसुरपूजितलोकप्राप्त्यप्सरोगणगंधर्वविराजमानदिव्यविमानकरणकयुगमनानंतरदेवलोक
निवासोत्तरभूलोकेराजराजत्वप्राप्तिसाग्रमन्वंतरशतावच्छिन्नकालब्रह्मलोकमहितत्वकामःश्वोधान्य

पर्वतदानं प्रतिपादयिष्ये करिष्ये इति वा संसंकल्प्य गणेशपूजनं पुण्याहवाचनं चतुर्णामष्टानां वर्त्विजां वरणा
दि मधुपर्कांतं कृत्वा पूर्वभागस्थिते कहस्तं कुंडं मंडपं कृत्वा भद्रं कर्णेभिरित्यादि महाध्वजोच्छ्रयणांते मध्ये गो
मयेनोपलिप्योक्तप्रकारेण धान्यपर्वतं कृत्वा कामदेवादीन् लोकपालादीन् पर्वतोक्तनाममंत्रेण संपूज्य
कुंडेग्निं प्रतिष्ठाप्येशान्ये वेद्यां ग्रहान्विनायकादीनधिदेवताः प्रत्यधिदेवताश्चावाह्य पूजयित्वा होमार्थं ऋत्विजो
नियोजयेत् नवग्रहाधिदेवताप्रत्यधिदेवताविनायकादिपंचदशदिक्पालवस्वष्टकैकादशरुद्रद्वादशादित्यब्र
ह्मविष्णुशिवसूर्यकामधनदहंसकामधेनुभ्यो वैदिकैर्नाममंत्रैर्वा प्रत्येकं तिलयवौदुंबरसमित्कुशैर्घृताक्तैस्त्र
योदशत्रयोदशसंख्यया जुहुयात्। अष्टशतं वा होमांते रात्रौ यजमानः पर्वतानावाहयेत्। त्वं सर्वदेवगणधाम
निधिर्विरुद्धमस्मद्गृहे ------- तनाशयाशु। क्षेमं विधत्स्व कुरु शांतिमनुत्तमां नः संपूजितः परमभक्तिम
ता मयाघा। त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः। मूर्तामूर्तं परं बीजमतः पाहि सनातन। यस्मात्त्वं लोकपाला

नो विश्वमूर्त्तेश्च मंदिरं। रुद्रादित्यवसूनां च ततः शांतिं प्रयच्छ मे। यस्मादश्न्यममरैर्न्नारीभिश्च शिरस्तव। तस्मान्मामुद्धराशेषदुःखसागरसागरात्। मेरुं। यस्माच्चैत्ररथेन त्वं भद्राश्वेन च सर्वदा। शोभसे मंदर क्षिप्रम लंपुष्टिकरो भव। मंदारं। यस्माच्चूडामणिर्जंबूद्वीपे त्वं गंधमादन। गंधर्वकृतशोभो वा ततः कीर्त्तिर्दृढास्तु मे। गंधमादनं। यस्मात्त्वं केतुमालेन वैभ्राजेन च। हिरण्मयाश्व लुसखस्तस्माल्लक्ष्मीर्ध्रुवास्तु मे। विपुलं। उत्तरैः कुरुभिर्यस्मात्सावित्रेण वनेन च। सुपार्श्व राजसे नित्यमतः श्रीरक्षयास्तु मे। सुपार्श्वं। एवमावाह्य पूजयेत्। ततः प्रातः स्विष्टकृद्बलि पूर्णाहुति यजमानाभिषेकांते यजमानो गृहीतपुष्पांजलिः पर्वतान्प्रदक्षिणीकृत्य पुष्पांजलिं समर्प्याचार्यं संपूज्य पूर्वं फलमुख्याचार्येमं धान्यमेरुं हैममंदरादितरुत्रययवस्त्र लविष्णुरुद्रार्कविधुतं ब्रह्मादिप्रतराजतश्रृंगचतुष्कनितंबेंद्रादिप्रतिमायुतमिक्षुवंशावृतकंदरं दिक्तुष्टयस्थापितराजतघृतपात्रकल्पितोदकस्रवणं वासोघनावृतं माल्यादिभूषितं गुरुनामगोत्रे समुच्चार्य संप्रददे इति दद्यात्। अन्नं ब्रह्मयतः प्रोक्तमन्ने प्राणा

२५६

दा.पो.
२५६

प्रतिष्ठिता ॥ अन्नाद्भवंति भूतानि जगदन्नेन वर्तते । अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ॥ धान्यपर्वतरूपेण
पाहि तस्मान्नमो नमः इति पठेत् । ततो गुरुः स्वस्तिमुक्ता कामसूक्तिं पठेत् । ततो ऋत्विक्हस्ते इमं पूर्वावस्थितधान्य
मंदरं हैमगणत्रयमूलस्थितकामभद्रकदंबयुतं क्षीरपूर्णराजपात्रकल्पितारुणोदसरसं राजतचैत्ररथवनं
वस्त्रादिभूषितं संकल्पयेत् । इमं दक्षिणावस्थितगोधूमकल्पितगंधमादनं हैममूलस्थितकुबेरजंबूवृक्षं
घृतपूर्णराजतपात्रकल्पितमानससरसं रजतशकलकृतगंधर्ववनं वस्त्रादिभूषतं संकल्पयेत् । इमं पश्चि
मावस्थितं तिलकल्पितविपुलं विष्कंभं हैममूलस्थितहंसपिप्पलयुतं दधिपूर्णराजतपात्रकल्पितसितोदस
रसं रजतशकलकल्पितवैभ्राजवनं वस्त्रादिभूषितं संकल्पयेत् । इमं उत्तरावस्थितमापनिर्मितसुपार्श्वं वि
ष्कंभं हैममूलस्थकामधेनुवटं मधुपूर्णरजतपात्रकल्पितभद्रसरसं रजतशकलकृतसावित्रवनं वस्त्रादि
भूषितं संकल्पयेत् । ततो गां दक्षिणात्वेन संकल्पयेत् । चतुर्विंशतिपक्षे अष्टौ गुरवे दश पक्षे षट् । अष्टपक्षे च २५६

तस्त्रः॥ सप्तपक्षे तिस्त्रः॥ पंचपक्षे एकैकामिति। एकपक्षे सर्वेभ्यः सहस्रं स्ववर्णभां वा दक्षिणात्वेन। यद्गुर्वीत्वि-
ग्भ्यो गाः संकल्प्य तदनु तु पापर्वतान्नानानामगोत्रेभ्यः संकल्पयेत्। ततो गृहादीनामुत्तरपूजां विसर्जनं च कृ-
त्वा यथाशक्ति ब्राह्मणान्भोजयेदिति। शिवलोकप्राप्तिपूर्वककल्पावधिकोमालोकनिवासानंतर परमगति-
प्राप्तिकाम इति लवणाचले पापक्षयगंधर्वपूज्यमानत्वकल्पप्रमितकाल गौरीलोकपूज्यत्वोत्तरकालावच्छि-
न्नारोग्यसंपत्तिसमृद्धिपाधिपत्यकाम इति गुडाचले। पापक्षयपूर्वककल्पशतावच्छिन्नब्रह्मलोकावा-
स्तितदनंतर परमगतिप्राप्तिकाम इति सौवर्णे। पापक्षयदीर्घायुःपुत्रपौत्राद्यवाप्त्युत्तरपितृदेवगंध-
र्वपूज्यमानत्वविशिष्टद्युगमनानंतर वैष्णवपदप्राप्तिकाम इति तिलाचले। पापक्षयकल्पावच्छिन्नरुद्र-
लोकनिवासोत्तरभूलोकराजराजत्वकाम इति कार्पासचले। पापपूर्वकक्षयहंससारसयुतार्कवर्णविमाना-
धिरोहणविशिष्टशंकरलोकगमनपितृसिद्धविद्याधरपूज्यत्वकाम इति घृताचले। सर्वपापनाशपूर्वकाम

दा.यो. रेश्वरपूज्यमानत्वकल्पशतावच्छिन्नविष्णुलोकवासोत्तरसप्तद्वीपाधिपत्यकाम इति रत्नाचले। सर्वपापक्ष
२८७ यायुतगोदानफलावाप्तिगंधर्वकिंनराप्सरोगणपूज्यमानत्वविशिष्टसोमलोकनिवासकाम इति रजताच
ले। पापक्षयपूर्वकानुजीविसहितचंद्रादित्यप्रतिकाशविमानकरणकशिवलोकविष्णुलोकप्राप्त्युत्तरजन्मा
युतत्रयावच्छिन्नायुरारोग्यसप्तद्वीपाधिपत्यकाम इति शर्कराचले दानवाक्यानि। सर्वेष्वन्यत्सर्ववत् इति।
इति श्रीभट्टदिनकरसूनुगागाभट्टकृतदानदिनकरद्योते धान्यादिशैलदानप्रयोगः॥ अथ द्वादशमेरुदा
नं हेमाद्रौ कालोत्तरे शैवशास्त्रे। अथातः संप्रवक्ष्यामि मेरुदानं यथाक्रमं। आकार्तिकात्समारभ्य मेरुव्रतं
समाचरेत्। कार्त्तिक्यां रत्नमेरुश्च दातव्यस्तु शिवाग्रतः। सर्वेषां चैव मेरूणां प्रमाणं क्रमशः शृणु। व
ज्रपद्ममहानीलनीलस्फटिकसंज्ञितः। पुष्यं मरकतं च क्रमाद्यस्यास्त्वस्तिभवेन्नतु। प्रस्थमात्रस्तु संग्राह्याः
प्रस्थस्यार्द्धार्द्धमेव च। यथाशक्त्यथवा देया वित्तशाठ्यं विनासुत मेरोर्विभागं वक्ष्यामि शिवस्याग्रे यथाचं २८७

येत्। कर्णिकायां न्यसेन्मेरुं रत्नविस्त्रीशभूषितं। तत्पूर्वे माल्यवान्नाम पर्वतं पूजयेत्तदा। तत्पूर्वे भद्रसंज्ञं च
अश्ववृक्षं ततः परं। मिरुतः पूर्वदिग्भागे पूर्वपूर्वत्तरं त्रयं। कथितं सर्वशेषेण दक्षिणास्यां ततः परं। निषधो हे
मकूटश्च हिमवांश्च तथा त्रयं। एवमुत्तरभागे तु नीलश्वेतश्च शृंगवान्। पश्चिमे गंधमादाख्यं केतुं वै केतुमा
ल्यकं। एवं द्वादशसंयुक्तं मेरुं पर्वतनायकं। सोपवासः शुचिर्भूत्वा विशेषात्पूजयेच्छिवं। महास्नानं प्रकर्त्तव्यं महा
पूजा तथास्तु ता। पूजांते देवदेवाग्रे रत्नमेरुं प्रकल्पयेत्। प्रदद्याच्छिवविप्राय शिवमंत्रमनुस्मरन्। महास्नानं
फलसहस्त्रद्वयपरिमितपंचामृतस्मानंदन्नाद्रोणैस्तु नैवेद्यमष्टद्रोणैरथापि वा द्वाद्रोणसमं पुण्यं आढकेन
विधीयते। वित्तहीनस्य भक्तस्य नात्र कार्या विचारणा। भेरीमृदंगमुरजमिलितैः पटहादिभिः। वादित्रैर्वि
धैश्चान्यैरांदोलैर्विविधैरपि। जागरं कारयेत्तत्र प्रार्थयेत्तु यथाक्रमं। स्वभृत्यपुत्रदारैश्च तथा संवंधिवांध
वैः। सार्द्धं प्रदक्षिणं कृत्वा प्रार्थयेल्लिंगमैश्वरं। द्रव्यहीनैः क्रियाहीनैः श्राद्धहीनैः सुरेश्वरः। कृतं वाप्य

दा॰ चो॰ कृतां वापि क्षंतुमर्हति शंकरः॥ इत्युक्त्वा चैव रुद्रं च त्वरितं शांतिमेव च। सद्गुल्येवमहाबीजं तथा पंचाक्षरे
२४८ णवै। नमः कांचनदेहाय धराधाराय वै नमः॥ ब्रह्मविष्णीशशृंगाय धरानाभिस्थिताय च। नगद्वादशनाथा
य सर्वपापापहारिणे॥ शिवभक्ताय शुद्धाय त्राणं मे कुरु सर्वदा॥ निःपापः पितृभिः सार्द्धं शिवं गच्छामि हं नमः॥
त्वं शिवस्त्वं शिवस्यार्थे शिवो हं च शिवाय च। निवेदयामि भक्त्या तु पितॄणां तारयेदिति। हेममेरुप्रमाणं तु फलं
चैवं प्रपूजयेत्तत्। पलानां तु सहस्रेण मध्यमेरुं प्रकल्पयेत्। शृंगत्रयसमायुक्तं ब्रह्मविष्णुहरान्वितं। एकैकं पर्व
तं तस्य शतैकैकेन कारयेत्। मेरूणां सहपूर्वेण विख्यातस्तु त्रयोदशा। एवं शिवाय तो मेरुर्दातव्यस्तु प्रयत्नतः
॥ अमनेषु च सर्वेषु ग्रहणेषु विशेषतः॥ आचार्याय प्रदातव्यः संहितापारगाय च। पूर्वोक्तस्य महामेरोः स
नगस्य महात्मनः॥ शिवलोके वसेत्सोपि यावंतः परमाणवः। पितॄन्पितामहांश्चैव तथैव प्रपितामहान्। पु २४८
त्रान्पौत्रान्प्रपौत्रांश्च तारयेत्किमतः परं। भोगान्भुक्त्वा महीं कृत्स्नां भुंक्ते च शिवभावितः॥ दरिद्रो रूप्यमेरुं

चहेममानेनकारयेत्। पर्वताद्वादशतथासंकल्प्यारचनान्विताः॥ उत्तरेह्ययनेदेयंदेयंवाग्रहणाद्वये। प्रा
गुक्तंतुफलंतस्यभवत्यत्रनसंशयः॥ भूमिमेरुप्रमाणंतुकथ्यमानंशृणुष्वतत्। विषयेमंडलंवाथा
ग्रामंवापर्वतंस्मरेत्। शेषास्तदर्द्धमानेननगास्सुरविसंख्यया॥ भूमिपर्वतपुण्यंतुकोवावर्णयितुंक्ष
मः॥ परमाणुरजोयावत्क्षितीशोभवतिध्रुवं। तावत्कोटिसहस्राणिशिवलोकेमहीयते। भोगान्भु
क्त्वाततोराजाजायतेयोगिनांकुले। ज्ञानंप्राप्यतदातस्यपुनर्जन्मनविद्यते। हस्तिमेरुमतोवक्ष्येसंक्षेपा
त्पार्वतीसुत। नवृद्धंनतथावालंदंतपुच्छसुशोभितं। सौरंसर्वगुणोपेतंघंटाचामरभूषितं। नक्षत्रमाला
संयुक्तंशंखध्वजविभूषितंदिव्यवस्त्रसमायुक्तंसवर्णरजतान्वितं॥ सूर्यस्यग्रहणेदेयंगुरवेतंशिवात्र
तः॥ तेनदत्तेनदत्तंतुलक्ष--------पुरुषत्रयसंयुक्तंपर्वतद्वादशान्वितं। मुच्यतेसर्वपापेभ्यःशिव
सायुज्यतांव्रजेत्। पितरस्तस्यरमोदंतेशिवलोकेसमंततः॥ एतत्तत्वसमाख्यातंहस्तिदानंसमासतः॥ अ

दा·पो· थाश्वमेरुर्वा देयो योदत्तो रविणा पुरा। श्वेतैर्विनीतैः सौवर्णैः प्रलग्नैः पंचसंख्यया। मध्ये मेरुः कल्पित
२८९ व्योरविसंख्यास्तु पर्वताः। सवस्त्रहेमदानैश्च सत्तवाध्वजभूषिताः। वैशाख्यां वाथ कार्तिक्यां दातव्यः सुशि
वाग्रतः। विप्राय शिवभक्ताय संहितापारगाय च। तस्मै देयं यथोक्तम्य हयमेरुर्विधानतः। संपूज्य परया
भक्त्या हेमकंकणकुंडलैः। रसनामुकुटेनैव अंगुलीयद्वयेन तु। सर्वेषां चैव दानानां भूषणै भूषयेत द्वा।
अकृत्रिमैर्भूषिणैस्तु राजमेरुं विभूषयेत्। अश्वमेरुप्रदानेन रुद्रलोके महीयते। अश्वाभावे दरिद्रस्तु गो
मेरुं वा प्रकल्पयेत्। अश्वसंख्याप्रमाणेन फलं वैतत्समं भवेत्। अथवा वस्त्रमेरुश्च दातव्यस्तु शिवा
ग्रतः। भारमात्रेण पट्टैस्तु नानावर्णैस्तु पर्वतः। मध्ये मेरुः कल्पनीयो वस्त्रैः शेषांस्तु कल्पयेत्। मेरुव
स्त्रस्य मानेन नानावर्णैः सुशोभनैः। प्रत्येकं पर्वताः कल्प्या हेमशृंगाः सुवर्णकाः। शिवभक्ताय वि
प्राय दातव्यास्तु शिवाग्रतः। दिव्यैश्वर्यपदं याति सहस्रक्रतुसंभवं। द्विव्यवर्षशतं सम्यक् कुर्यात्तभो २८९

गंधर्वैछया। चक्रवर्तिनमभ्येति ज्ञानवान्जायते तदा। शिवालयं ततो याति न भूयो जन्म वाप्नुयात्।। अथ वा।
अथवा घृतमेरुस्तु दातव्यः कथ्यते मया। मेरुः पलानां मध्ये तु सहस्रैः पंचाभिर्हितः। शतैः पंचभिरेकैकं
पर्वतं तत्र कल्पयेत्। त्रिशृंगं त्रिपलं मेरोः कांचनं देवतार्चनं। एकैकं पलिकं शेषं पर्वतेव स्त्रभाविते। कृत्वा
पूजां विशेषेण शिवस्याग्रे प्रकल्पयेत्। शिवभक्ताय विप्राय दातव्यं शिवमिछता। कुलमुद्धरते सोपि पेतृकं मातृ
कं तथा। दिव्यं वर्षशतं साग्रं रुद्रलोके महीयते। भारते पृथिवीखंडे पत्तिर्भवति नान्यथा। एवं वै खंडमेरुं तु शि
ताखंडेन कल्पयेत्। रुद्रलोकपदं याति पितृभिः सह मोदते। अथवा धान्यमेरुं तु शिवस्याग्रे प्रकल्पयेत्। पं
चखारीमितं मध्ये मेरुं धान्येन कल्पयेत्। एकैकं खारिमात्रेण पर्वतं शेषमादिशेत्। पूर्ववद्धेमशृंगं तु सर्वत्र
परिकल्पयेत्। शिवपूजाविधानेन शैवविप्राय दापयेत्। कल्पकोटिसहस्राणि शिवलोके महीयते। पितरस्त
स्य मोदंते ब्रह्मलोके तथा विरं। एतद्दशांशमानेन तिलमेरुं प्रकल्पयेत्। शृंगाणि पूर्ववत्तस्य तथान्येषु नगे

दा·घो· पुच। तिलमेरुः प्रदातव्यः शिवस्याग्रे गुरोः सदा। प्रयाति शिवसायुज्यं बंधुभिः सहितो नरः। मेरुदानमिति।
२५· द्वादशपर्वतसहितमेरुदानमित्यर्थः। स च रत्नसुवर्णरौप्यभूगजाश्वगोवस्त्रघृतखंडधान्यतिलमेरुभे
दाद्द्वादशधा। रत्नमेरुरपि वज्रादिभिरष्टधा। तत्र मेरुद्रव्ये एवमाल्यवदादिद्वादशपर्वतनिर्माणं मेरुद्रव्यद
शांशपरिमितेन धान्यतिलमेर्वोस्तु पंचमांशमितेन। हेममेर्वादिषु तथा दर्शनात्। तत्राष्टादशमेरुदाने कार्ति
क्यां रत्नमेरुर्मार्गशीर्ष्यां सुवर्णमेरुरित्यादिक्रमः। इच्छा तु यस्मिन् कस्मिंश्चित् पर्वणि यस्य कस्यचिद्दान
मिति। अत्र च लक्षयोजनपरिमितमेरुपरमाणुसमसंख्यकल्पसहस्रावच्छिन्नशिवलोकमहितत्वसमकु
लसंतसंतगतगुरुद्रोहिपितृघातकादिमहापातकिपतितादिकर्मका शिवसामीप्यनयनरकाम इति रत्नम
रौ मेरुपरमाणुसमसंख्यकल्पावच्छिन्नशिवलोकप्राप्त्युत्तरजन्मावच्छिन्नसकलमहामंडलराजत्वपित्
पुत्रादिपुत्रयोद्धरणकाम इति हेममेरौ। राजतेऽप्येवं। मेरुपरमाणुसमसंख्याकल्पसहस्रावच्छिन्नशिवलो २५०

कमहितत्वोत्तरयोगिकुलोत्पत्तिराजत्वभवनोत्तरतत्वज्ञानद्वारकमुक्तिकाम इति भूमेरौ। सर्वपापक्षयपूर्व
कशिवसायुज्यकाम इति हस्तिमेरौ। रुद्रलोकमहितत्वकाम इत्यश्वमेरौ। गोमेरावप्येवं। दिव्यवर्षशताव
च्छिन्नक्रतुसहस्रयागैश्वर्यभोगोत्तरचक्रवर्तित्वप्राप्त्युत्तरतत्वज्ञानपूर्वकशिवसायुज्यरूपमुक्तिकाम इति व
स्त्रमे – पितृमातृकुलोद्धरणपूर्वकसाय दिव्यवर्षशतावच्छिन्नरुद्रलोकमहितत्वोत्तरभारतखंडस्वाम्य
काम इति घृतमेरौ। पितृसहितरुद्रलोकाधिकरणकानंदकाम इति शर्करामेरौ। कल्पकोटिशतावच्छिन्नात्मक
मैकशिवलोकमहितत्वब्रह्मलोकाधिकरणकचिरकालावच्छिन्नपित्राद्यानंदकाम इति धान्यमेरौ। बंधुसहि
तशिवसायुज्योत्तरजन्मावच्छिन्नसमपृथिवीभोगोत्तरशिवसायुज्यकाम इति तिलमेरौ संकल्पः। शेषप्रयोग
स्पष्टः। विष्णुधर्मोत्तरे। अत्र सौवर्णराजतताम्रकांस्यलोहसीसलवणव्रीहिशर्करागुडकस्तूरिकर्पूरकुंकुम
कार्पासानां परिमाणविशिष्टानां मेरुरुक्तः। मात्स्यवदादिपर्वतास्त्वनोक्ताः। तत्राप्येते ज्ञेया इति केचित्। नेत्य

२५

न्ये। अथ। शिखरदानं। विष्णुधर्मोत्तरे। माघशुक्लतृतीयायां मार्गशीर्षे यथा पुनः। तृतीयायां वाथ वैशाखे शु
क्लायां रोहिणीयुता। प्रोष्ठपद्यां तृतीयायां विशेषेण भृगूद्वह। गुडेक्षुवस्त्रलवणधान्यकाजातिशर्कराख
र्जूरतंडुलद्राक्षाक्षौद्रैर्मलयजेन वा। फलैर्मनोहरैरन्यैः शिखराणि प्रकल्पयेत्। एषामन्यतमं दत्वा यथा श्र
द्धं विधानतः। आत्मप्रमाणं कुर्वीत प्रादेशाभ्यधिकं भवेत्। शुचिगोमयलिप्तायामिक्षुपत्राणि संस्तरेत्। त
तः कुर्वीत शिखरं गौरीस्नानमनुत्तमं। द्विहस्तममलं कर्त्तव्यं हस्तमात्रं शिरस्तथा। भित्तिरिक्षुदलैः कार्या वेष्ट
येच्छुक्लवाससा॥ दानद्रव्येण तन्मध्ये पूरयेद्भृगुनंदन। इक्षुपत्रकटे गौरीं तस्योपरि निवेशयेत्। चतुर्भुजां हेम
मयीं पूजयेत्कुंकुमेन तु। वेष्टयेत्सूक्ष्मवस्त्रेण देवीं शिखरमेव च। अष्टांगं पूजयेद्गौरीमेतैर्मंत्रैश्च भक्तितः।
ॐ नमो भवान्यै पादौ तु कामिन्यै जानुनी ततः। वामदेव्यै तथा चोरू नाभौ चैव जगत्प्रिये। आनंदायै तु हृदयं नं
दायै पूजयेत्स्तनौ। सुभद्रायै मुखं पूज्यं ललितायै नमः शिरः। एवं पूज्य महादेवीं शिखरं चाभिमंत्रयेत्। यस्मा

न्निवासःपार्वत्याःशिखरस्त्वंसुरैर्वृतः॥तस्मान्मांपाहिभगवंस्त्वंगौरीशिखरःसदा।एवंमामंत्र्यशिखरंत्व
तीयायांतदग्रतः॥ततःस्नात्वाप्रभातेतुदद्यान्मंत्रेणभक्तितः॥यस्मात्त्वंसर्वभूतानामुपरिष्टादवस्थितः॥त
स्मात्शिवःप्रीयतांमेतवदानात्सदानघ।अर्धभागंचतुर्थंवापंचमंवाततोगुरोः॥दत्वाशेषंतुबंधूनांशिष्टा
नांस्वजनस्यच।अनुजीविनांचभक्तानांदुर्गतानांचकामतः॥एवंदत्वातुशिखरंगौर्याभुंजीतवाग्यतः॥स्वमु
क्तकेशःसंप्राप्यक्षीरंघृतमथापिवा।विधिनानेनयोदद्यात्।गौर्याःशिखरमुत्तमं।सवसेद्भवनेदेव्याःक
ल्पकोटिशतत्रयं।पुण्यक्षयादिहागत्यसंजायतेपृथिवीपतिः॥इतिशिखरदानं।मीमांसैकधुरंधरःश्रुति
धरोन्यायेपिवागीश्वरःसाहित्यामृतसागरःसुजनतावल्लीरसालद्रुमः।यंविद्वन्मणिशेखरोदिनकरःप्रा
सूतविश्वेश्वरंतेनाकारिसमग्रशैलददतौसत्प्रीतयेपद्धतिः॥सत्याअपेक्ष्याबहुपरिकल्पिता।सुदत्तासुधे
नुषुबहूनिफलानियासु।तद्दानपद्धतिमनेकपुराणजातमालोक्यदैनकरिरातनुतेसुखाय।अथदशधेनु

दा॰सो॰ दानानि।प्रथमागुडधेनुःस्यात्घृतधेनुस्तथापरा।तिलधेनुस्तृतीयातुचतुर्थीजलसंस्थिता।क्षीरधेनु
२५२ श्चविख्यातामधुधेनुस्तथापरा।सप्तमीशर्कराधेनुरष्टमीलवणोत्तमा।कार्पासधेनुर्नवमीकस्तूरादशमी
तथा।एतासांतुविधानानिममचक्ष्वजगत्पते।किंरूपाकेनमानेनदातव्यास्तदिहोच्यतां।कृष्णाजिनंचतु
र्हस्तंप्राक्ग्रीवंविन्यसेद्भुवि।गोमयेनोपलिप्तायांदर्भानास्तीर्यसर्वतः।लघ्वेणकाजिनंतद्वद्वत्सस्यपरिकल्पये
त्।प्राङ्मुखींस्थापयेद्धेनुंउदक्पादांसवत्सकां।उत्तमागुडधेनुस्यात्सदाभारचतुष्टयं।वत्संभारेणकुर्वीतभा
राभ्यांमध्यमास्मृता।अर्द्धभारेणवत्सःस्यात्गृहवित्तानुसारतः।धेनुवत्सौघृतास्यौतुसितसूक्ष्मांबरावृतौ
।शुक्तिकर्णाविक्षुपादौशुचिमुक्ताफलेक्षणौ।सितसूत्रसिरालौतौसितकंबलकंबलौ।ताम्रगंडुकपृष्ठौतु
सितचामररोमकौ।विद्रुमभ्रूयुगोपेतौनवनीतस्तनान्वितौ।क्षोमपुछौकांस्यदोहाविंद्रनीलकतारकौ।सवर्ण २५२
शृंगाभरणौराजतक्षुरसंयुतौनानाफलमयैर्दंतैर्घ्राणगंधकरंडकौ।इत्येवंरचयित्वातांधूपदीपैस्तथार्चयेत्।

एवमामंत्र्यतांधेनुंब्राह्मणायनिवेदयेत्।अनुमंत्रणवाहनदानमंत्राः।प्रयोगेस्फुटाः।विधानमेतद्धेनूनां
सर्वासामिहपच्यते।सर्वासांप्रत्यक्षधेनुव्यतिरिक्तानामिसवगंतव्यं।तथा।एतदेवविधानंस्यात्तएवोपस्कृ
राःस्मृताः।मंत्रावाहनसंयुक्ताःसदापर्वणिपर्वणि।यथाश्रद्धप्रदातव्याभुक्तिमुक्तिफलप्रदा।अशेषय
ज्ञफलदाःसर्वपापहराःशुभाः।अयनेविषुवेपुण्यव्यतीपातेतथापुनः।गुडधेन्वादयोदया।उपरागादिप
र्वसु।कार्तिक्यांतुतथामाघ्यांयुगादिषुचपर्वसु।समुपोपौष्यनरोदद्यात्सप्तम्यांवादिनेशिवः।दिनत्रयं
तदाहारोयातिविष्णोःपरंपदं।इहलोकेतिसौभाग्यंआयुरारोग्यमेवच।वैष्णवंलोकमाप्नोतिमरणेस्मरणं
हरेः।दशार्बुदसहस्राणिशतंचाष्टौचधर्मवित्।नशोकदुखमाप्नोतिदौर्गत्यंनैवजायते।प्रथमेतिसप्त
मीशर्कराधेनुरित्यस्माग्रेदधिधेनुतथाष्टमी।रसधेनुस्तुनवमीदशमीस्यात्स्वरूपतः।सुवर्णधेनुमप्यत्र
केचिदिच्छंतिमानवाः।नवमीतिलतैलेनतथान्येपिमहर्षयइतिक्वचित्पाठः।इच्छयाविकल्पः।आथर्वणि

परिशिष्टे तु रत्नधेनुरधिकोक्ता। आग्नेये गंधधेनुरप्युक्ता। प्रथमस्तेत्यादिपाठप्राप्तानुवादः। न क्रमविधा
नं। भिन्नफलार्थत्वेन प्रयोगविधीनां भेदात्। यदि च दशधेनुदानस्यैकफलार्थत्वश्रवणं तदस्तु तस्मिन्
पक्षे क्रमविधिरिति दिक्। लघ्वीति। हस्तमितमित्यर्थः। चतुर्थीशस्त्वात्। अत्र चतुर्हस्तैककृष्णाजिनाभावाद्ब
हुभिः कृष्णाजिनैराच्छादितं चतुर्हस्तं कर्तव्यमिति महार्णवः। आयामविस्ताराभ्यां चतुर्हस्तमित्यन्ये प्राग्ग्रीवीमि
ति प्राक्शिरस्कामित्यर्थः। सवत्सकामिति वत्सस्थापनमुदीच्यामिति केचित्। स्तनाधःप्रदेशादित्यन्ये। भारेति
चत्वारिंशछटुकमितसेरेण सेरशतकं भारः शतद्वयं वा। शक्ताशक्तविषयं पक्षद्वयं द्रोणस्य वत्सकं कुर्या
च्चतुर्द्रोणां तु गौः स्मृते स्वाग्नेये तु द्रोणाशद्वोभारलक्षकः। द्रोणपरिमाणस्य रसे असत्त्वादिति केचित्। घृतेति
अत्र तत्तत्परिपूर्णपात्राणां तत्तद्देशे स्थापनं कृत्वा तत्तत्त्वेन भावनां कुर्यात्। ताम्रेति। गडुकं ककुत्। नवनी
तेति। वत्सस्यापि स्तनाः। अतो वत्सोपि स्त्रीरूप एवेति केचित्। वस्तुतो नानेन वत्सस्य स्त्रीरूपत्वं सिध्यति।

किंतुकांस्यदोहाविस्यनेनपुंवत्सेदोहासंभवादितिध्येयं। स्वर्वर्णेति। अत्रपरिमाणानुक्तेर्यथाशक्तीतिज्ञे
यं। दंतैरितियुक्ताविति शेषः। घ्राणेतिगंधकरंडकद्वयघ्राणस्थानेस्थाप्यमित्यर्थः। ब्राह्मणायेति। अत्रै
कस्माएवदानं। अत्रदक्षिणानाम्नानेपिसामान्यतःसुवर्णंदक्षिणासर्वासामिति। प्रत्यक्षधेनुव्यतिरिक्ताना
मित्यर्थः। द्रोणमात्रेणधेनुकथनमन्यःप्रकार इतिकल्पतरुः। अथघृतधेनुः। मात्स्ये। वासुदेवंजगन्नाथं
घृतक्षीराभिषेचनात्। संपूज्यपूर्वंपुष्पैर्गंधपुष्पादिभिर्नरः। अहोरात्रोषितोनाम्ना अभिष्टूयघृतार्चिषं। घृ
तार्चिषेजगन्नाथायदेवायनम इतिश्रुतिः। गव्यस्यसर्पिषःकुंभंपुष्पमालाविभूषितं कांस्योपिधानसंयु
क्तंसितवस्त्रयुगेनच। हिरण्यगर्भसहितंमणिविद्रुममौक्तिकैः। इक्षुयष्टिमयान्पादान्खुरान्रूप्यमयांस्तथा। सौ
वर्णेवाक्षिणीकुर्यात्शृंगेचागरुकाष्ठजे। सप्तधान्यमयेपार्श्वेपदोर्णेनवकंबलं। कुर्यात्तुरुष्ककर्पूरैर्घ्राणंफलम
यंस्तनान्। तद्वच्छर्करयाजिह्वांगुडक्षीरमयंमुखं क्षौमसूत्रेणलांगूलं रोमाणिसितसर्षपैः। ताम्रपत्रमयंपृष्ठं

कुर्यात्तुद्धासमन्वितः। तद्वत्कल्पनया दिव्या नृप घृतवत्संप्रकल्पयेत्। तंच विप्रं महाभागं मनसैकघृतार्चिषं।
कल्पयित्वात तस्तस्मै विप्राय प्रतिपादयेत्। एतां ममोपकाराय गृह्णीष्व त्वं द्विजोत्तम। प्रीयतां मम देवेशो घृता
र्चिः पुरुषोत्तमः। इत्युदाहृत्य विप्राय दद्यादेतां नराधिप। मंत्रस्तु घृतं गावः प्रसूयंते घृतं भूम्यां प्रतिष्ठितं। घृ
तमग्निश्च देवाश्च घृतं मे संप्रसीदतु। घृतमग्निर्घृतं सोमस्तन्मयाः सर्वदेवताः। घृतधेनुप्रदानेन सर्वास्तृप्यं
तिदेवता इति। दत्वैकरात्रं स्थित्वा तु घृताहारो नराधिप। मुच्येसर्वपापेभ्य यथा दानफलं श्रृणु। सकामा ना
मिसंप्राप्तिः कपिला नृपसत्तम। वासुदेवात्मिति। इदं चोपलक्षणं। देवीपुराणादित्यपुराणयोर्भवानीसूर्ययज
नयोरुभयोरुक्तत्वात्। अतस्तेषां समुच्चयोऽदृष्टार्थत्वात्। कुंभमिति। द्वादशाधिकपंचशतंपलानि कुंभ इ
ति केचित्। सहस्रपल इत्यन्ये हिरण्यमिति परिमाणानुक्तेः सर्वं यथाशक्तिज्ञेयं। तुरुष्कः। सिह्लकः। तद्व
दिति। धेनुचतुर्थांशेन गुड धेनुवदित्यर्थः। शृंगे इति। अत्रसुवर्णमयत्वस्य बाधः। व्याघ्रिरिति। साधनमि

त्यथः॥सकलपातकक्षयपूर्वकघृतक्षीरवहनदीपायसकर्दमयुक्तपुण्यलोकाधिकरणकोत्पत्तिसप्ताव
रसप्तपरपितृलोककर्मकन्यपलोकाधिनयनपूर्वकसकलफलप्राप्तिकामइतिसंकल्पः॥ अथतिलधेनुः॥
हेमाद्रौ विष्णुधर्मोत्तरे। अनुलिप्ते मही पृष्ठे वस्त्राजिनसमावृते। धेनुं तिलमयीं कृत्वा सर्वरत्नैरलंकृतां। धेनुं
द्रोणेन कुर्वीत आढकेन तु वत्सकं। स्वर्णशृंगीं रूप्यखुरां गंधघ्राणवतीं तथा। कुर्याच्च शर्कराजिह्वां गुडास्या
मविकंबलां। इक्षुपादां ताम्रपृष्ठां शुचिमुक्ताफलेक्षणां। प्रशस्तपत्रश्रवणां फलदंतवतीं शुभां। स्रग्दामपुच्छां
कुर्वीत नवनीतस्तनान्वितां। सीतसूत्रसरालां निसितसर्षपरोमिकां फलैर्मनोहरैर्भक्ष्यैर्मणिमुक्ताफला
न्वितां। सितवस्त्रयुगच्छन्नां घंटाभरणभूषितां। ईदृक्संस्थानसंपन्नां कृत्वा श्रद्धासमन्वितः। कांस्योपदोह
नां दत्वा केशवः प्रीयतामिति। आवाहनमंत्रप्रयोगे वक्ष्यंते दानमंत्रश्च। तिलाश्च सोमदेवत्या गोसवेदेव
निर्मिताः। तस्मात्तिलमयी धेनुर्दत्ता प्रीणातु केशवं। इतिवह्निपुराणोपठितः॥ प्रदक्षिणं ततः कृत्वा प्रजपि

दा·घो·
२५५

त्वाप्रणम्यवा।सदक्षिणामयातुभ्यंदत्तेत्युक्त्वाविसर्जयेत्।अनेनविधिनादत्वातिलधेनुंनराधि।सर्वपापविनि
र्मुक्तःपरंब्रह्माधिगच्छति।त्रिरात्रंतुतिलाहारस्तिलधेनुप्रदोभवेत्।वस्त्राजिनेति।इदंचविकल्पितं।गोमयेनोप
लिप्तायांतत्रधेनुंसमालिखेत्।इत्यादित्यपुराणेभूमावेवलिखनोक्तेः।द्रोणेनेति।इदंचशक्तविषयं।वाराहेषोडश
भिःप्रस्थैर्देनोरुक्तत्वात्।पद्मपुराणेषोडशाढकैरुक्तेश्च।देवीपुराणेद्रोणोक्तेश्च।तुभ्यंदत्तेत्युक्त्वेति।क्वचित्तुगो
मतीपाठोप्ययुक्तः।गोमतीविद्यातुगोदानोक्ताते।अन्यत्स्पष्टं।सर्वपापविमोकपूर्वकपरब्रह्मैक्यभवनकाम
इतिसंकल्पः।लैंगेतु।तुलावत्कुंडमंडपादिकृत्वामध्येषोडशारेपद्मेमेघाच्छुंखीशिवप्रतिमांसंपूज्यतत्पुरतोभ
मौपद्ममालिख्यवाससाछाद्यतत्रतिलद्रोणेनपद्माकारंकृत्वावाससाछाद्यत्रिंशन्निष्कतदर्धतदर्धार्धयथाशक्ति
सुवर्णनिर्मितंपद्मंस्थापयेत्।ततःपद्मोत्तरएकादशरुद्ररूपेणपूर्वेद्वादशआदित्यरूपेणदक्षिणतःषोडश
मूर्त्तिविद्येशरूपान्यथाक्रमंयेदेवादिव्येकादशस्थःयज्ञोदेवानांप्रत्येतिसुम्नं।भवायदेवायेत्यादिनामभिःपूप २५५

ज्य शतपलं कांस्यपात्रं च पं एकादशधा द्वादशधा षोडशधा। — भक्त्यातिब्राह्मणं दद्यात्। प्रतिब्राह्मणं च शक्त्या सु
वर्णशृंग हयरौप्यखुर चतुष्पेक्षुदंडयुतान्। वारिमितांस्तिलान्दद्यात्। अथवा ससी चोष्णीषकुंडलांगुलीयस
हितं निर्मित पद्मदशांगशासुवर्णदक्षिणायुतं पद्मं दद्यात्। तुलावदधिवासनादि सर्वं कार्यमिति प्रकारस्तृकः। अ
थ नवनीतधेनुः। भविष्योत्तरे। घृतधेनुविधानेन नवनीतमयी शुभा। दातव्या नृपते धेनुर्न्यूनाधिक्यविवर्जिता।
मंत्रः स एव संदिष्टो घृतधेनौ तु यः स्मृतः। शृणु पार्थ महाबाहो प्रदानफलमुत्तमं। घृतक्षीरवहा यत्र पायसक
र्दमः। घृतयोनिप्रदो याति तत्र कामैः सुपूजितः। सकलपापनाशपूर्वक घृतक्षीरवहनदीपायसकर्दमयुत
देशपूजितत्वकाम इति संकल्पः। अथ जलधेनुः। विष्णुधर्मोत्तरे। जलधेनुं प्रवक्ष्यामि प्राप्यते दत्तया यया। दे
वदेवो हृषीकेशः सर्वेशः सर्वभावनः। जलकुंभं नरव्याघ्र सुसुवर्णरजतान्वितं रत्नगर्भमशेषैस्तु ग्राम्यैर्धान्यैः
समन्वितं। सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितं। कुष्ठमांसीमुरोशीरवालकामलकैर्युतं। प्रियंगुपत्रसहितं सि

दा॰चो॰ तवस्त्रोपवीतनं। सछत्रं सउपानत्कं दर्भविष्टरसंस्थितं। चतुर्भिः संवृतं भूपतिलपात्रैश्चतुर्दिशां स्थगितं दधि
२५६ पात्रेण घृतक्षौद्रवतामुखे॰डपोषितः समभ्यर्च्य वासुदेवं जलेशयं। पुष्पधूपोपहारैश्च यथाविभवमाहृतः। संक
ल्प्यजलधेनुं च कुंभं तमभिपूज्य च पूजयेद्वत्सकं तद्वत्कृतं जलमयं पुनः। एवं प्रपूज्य गोविंदं जलधेनुं सवत्सकां।
दद्यान्द्विजेंद्रराजेंद्र प्रीत्यर्थं जलशायिनः। जलशायी जगद्योनिः प्रीयतां मम केशवः। इति चोच्चार्य भूनाथ विप्राय
प्रतिपाद्यतां। अपक्वान्नाशितास्थेय महोरात्रमतः परं। अनेन विधिना दत्वा जलधेनुं नराधिप। सर्वान्कामानवा
प्नोति ये दिव्या ये च मानुषाः। शरीरारोग्यता बाधाप्रशमः सर्वकामकः। नृणां भवति दत्तायां जलधेन्वां न संश
य इति। कुंभः शतपलपरिमाणमिति मदनरत्ने। अत्रापि सुवर्णशृंग रूप्यखुरकुस्याजिनाधिकरणरूप सामा
न्येतिकर्तव्यता भवतीति केचित्। दधिपात्रं कांस्यं। धान्यस्थापनं पार्श्वद्वये। कुष्ठादीनां घ्राणदेशे स्थापनं।
प्रियंगुपत्रस्य श्रवणे। यज्ञोपवीतस्य शिरसि। सुवर्णं दक्षिणा। वत्सश्चतुर्थांशेनेति। सौरपुराणे तु स्वर्णप्र २५६

तिमापूजनयुक्तं। दद्यात्द्विजायदेवाग्रेप्रीत्यर्थंमिहिरस्यतु। आदित्यश्चजगद्योनिःप्रीयतांमिहिरःसदेति मंत्रःपठितः॥ सर्वकामवाप्तिपूर्वकोत्तरजन्मशरीरारोग्यज्ञानसिद्धिसर्वबाधाप्रशमपूर्वकसर्वकामुकत्वभवतकामइतिसंकल्पः॥ अथक्षीरधेनुः॥ स्कांदे॥ क्षीरधेनुंप्रवक्ष्यामितन्निबोधनराधिप। अनुलिप्तेमहीपृष्ठेगोमयेननरोत्तम। गोचर्ममात्रमानेनकुशानास्तीर्यसर्वशः॥ तत्रोपरिमहाराजन्यसेत्कृष्णाजिनंततः॥ तत्रोपरिकुंडलिकांगोमयेनकृतामपि। क्षीरकुंभंततःस्थाप्यचतुर्थांशेनवत्सकं। सुवर्णमुखश्रृंगाणिचंदनागरुकाणिच। प्रशस्तपत्रश्रवणंतिलपात्रोपरिन्यसेत्। मुखंगुडमयंतस्याजिह्वाशर्करयातथा। फलप्रशस्तदंताचमुक्ताफलमयेक्षणा। इक्षुपादादर्भरोमासितकंबलकंबला। ताम्रपृष्ठाकांस्यदोहापटसूत्रमयंतथा। पुच्छंचनृपशार्दूलनवनीतमयस्तना। स्वर्णशृंगीरूप्यखुरापंचरत्नमयीभुवि। चत्वारिलिचपात्राणिचतुर्दिक्षुपिविन्यसेत्। सप्तव्रीहीसमायुक्तान्दिक्षुसर्वासुनिक्षिपेत्। आच्छाद्यवस्त्रयुग्मेनगंधपुष्पैःसमर्च

येत्। धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत्। आछाद्यालंकृतां कृत्वा मुद्रिकाकर्णमात्रकैः। पादुकापान
हछत्रं दत्वा दानं समर्पयेत्। अनेनैवा तु मंत्रेण क्षीरधेनुं प्रकल्पयेत्। या लक्ष्मीः सर्वभूतानामित्यादि नरपुं
गव। आप्यायस्वेति मंत्रेण क्षीरधेनुं प्रदापयेत्। गृह्णामि त्वां देवि भक्त्या कुटुंबार्थे विशेषतः। भरस्व कामै
र्मां सर्वैः क्षीरधेनो नमोस्तु ते। एवं धेनुं स दत्वा च क्षीराहारो दिनं भवेत्। त्रिरात्रं तु पयो भक्षो ब्राह्मणो राजस
त्तम। एतां हेमसहस्रेण शतेनाथ स्वशक्तितः। शतार्धमथवाप्यर्द्धं तस्याप्यर्धमथेच्छया। दद्याद्धेनुं महा
राज शृणु तस्यापि यत्फलं। दिव्यं वर्षसहस्रं तु रुद्रलोके महीयते। पितृपैतामहैः सार्द्धं ब्रह्मणो भवनं व्रजेत्। दि
व्यं विमानमारुह्य दिव्यगंधानुलेपनं। क्रीडित्वा तु चिरं कालं विष्णुलोके स गच्छति। द्वादशादित्यसंकाशे वि
मानवरमंडितैः। गीतवादित्रनिर्घोषैरप्सरोगणसेवितैः। तत्रोपविष्टो राजा स विष्णुसायुज्यमाप्नुयात्। कुंड
लिकामिति। धारभूतामित्यर्थः। कुंभशब्दः कुंभपरिमाणवदुग्धविशिष्टघटवाचः। एकालाभे तद्द्वयेन २५७

कुंडलीकयोरपिद्वित्वं। सुवर्णेति। मुखेगुडमयत्वस्यअंगयोः सुवर्णमयत्वस्यवक्ष्यमाणत्वात्सुवर्णमय
त्वं रत्नागरुमयत्वयोर्विकल्पः। तिलेति। श्रवणयोस्तिलपात्रोपरिस्थापनेन तद्रूपं कल्प्यं। मुखमिति। एतद
रभ्यभुवीति संबध्यते। स्थाप्यमिति शेषः। सप्तेति। सप्तसंख्याकानि सेके। व्रीहिपदस्य धान्यलक्षणया सप्तधा
न्यानीत्यन्ये प्रकल्पयेदिति। आवाहयेदित्यर्थः। अनुमंत्रयेदित्यर्थ इति मदनरत्ने। प्रसादयेत्। उपतिष्ठेतेत्यर्थः।
गृह्णामि त्वामिति गृहीतमंत्रः। दानोत्तरनियमो दानांभतः। एवमित्यादि दक्षिणांतं विकल्पः शक्त्याशक्तिवि
षयः। अपि शब्दः पूर्वोक्तजलधेनुसमुच्चयार्थः। इत्येके। केवलाया अपि एतादृश्या दक्षिणाकाया अपीत्यर्थ इत्य
न्ये। दिव्यवर्षसहस्रावच्छिन्नरुद्रलोकमहितत्वतदुत्तरपितृपितामहसहितब्रह्मलोकगमनदिव्यविमानारो
हणपूर्वकचिरकालक्रीडनोत्तरविष्णुलोकगमनोत्तरद्वादशादित्यसदृशोत्तमविमानभूषितगीतादिनिर्घो
षअप्सरोगणसेवितदेशोपविष्टराजत्वभवनोत्तरविष्णुसायुज्यप्राप्तिकाम इति संकल्पः। अथमधुधे

२५४

दा॰ खो॰ त्रुः। स्कांदे। मधुधेनुं प्रवक्ष्यामि सर्वपापप्रणाशनीं। अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे। धेनुं मधुम
२५८ यीं कृत्वा संपूर्णघटपूरितां। तच्चतुर्थभागेन वत्सकं परिकल्पयेत्। सौवर्णं तु मुखं कृत्वा शृंगाण्यगरुचंदनैः।
पृष्ठं ताम्रमयं तस्याः पुच्छं सूत्रमयं तथा। पादाः स्युरिक्षुमयाः कार्याः सितकंबलकंबलं। मुखं गुडमयं कृत्वा जि
ह्वा शर्करया तथा। मौक्तिकं नयने तस्या दंताः फलमयास्त— दर्भरोमधरा देवी खुरे रूप्यविभूषिता। प्रशस्त
पत्रश्रवणं नवनीतमयस्तनी। सर्वलक्षणसंयुक्तां सप्तधान्यानि दापयेत्। चत्वारि तिलपात्राणि चतुर्दिक्षु
च विन्यसेत्। आच्छाद्य वस्त्रयुग्मेन घंटाभरणभूषितां। कांस्योपदोहनां कृत्वा गंधपुष्पैः समर्चयेत्। पुच्छदेशो
पविष्टाय भूषिताय च भूषणैः। स्वशक्त्या दक्षिणां दत्वा वित्तशाठ्यविवर्जितः। रसज्ञः सर्वदेवस्याः सर्वभूत
हितेरतः। प्रीयतां पितृदेवाश्च मधुधेनो नमोस्तु ते। एवमुच्चार्य तां धेनुं ब्राह्मणाय निवेदयेत्। अहं गृह्णा २५८
मि तां देवि कुटुंबार्थे विशेषतः। कामान्कामदुघे धुंक्ष्व मधुधेनो नमोस्तु ते। मधुवातेति मंत्रेण प्रदापया

यतचेतसा। दत्वा धेनुं महाराज छत्रकोपानहौ तथा। दत्वा दानेंशपसेन मधुना च दिनं नयेत्। ब्राह्मणो
पित्रिणत्रं तु मधुपायससंस्रुतः। यत्र मधुवाहा नद्यो यत्र पायसकर्दम॥ ऋषयो मुनयः सिद्धास्तत्र गच्छं
ति धेनुदाः। तत्र भोगान्वरान्भुक्त्वा ब्रह्मलोके सति ष्ठति। दशपूर्वान्दशपरानात्मानं चैकविंशकं। सनयेद्वि
ष्णुसायुज्यं मधुधेनुप्रसादतः। पापक्षयपूर्वकमधुवलनदीपायसकर्दमऋषिमुनिसिद्धयुतदेशाधिक
रणकवरभोगभोगपूर्वकब्रह्मलोकगमनोत्तरदशपूर्वदशापरात्मैकविंशविष्णुसायुज्यनयनकाम इति
संकल्पः। अथ शर्कराधेनुः॥ स्कांदे। अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे। धेनुः शर्करया राजन्सदा
भारचतुष्टयं। उत्तमा कथ्यते सद्भिश्चतुर्थांशेन वत्सकः। तदर्धं मध्यमा प्रोक्ता चतुर्थांशेन कन्यसी। त
द्वत्सं प्रकुर्वीत चतुर्थांशेन धेनवः। अष्टमांशस्य शक्त्या वा आत्मानं नैव पीडयेत्। सर्वबीजानि संस्था
प्य चतुर्दिक्षु समंततः। सौवर्णमुखशृंगाणि मौक्तिकैर्नयनानि तु। गुडेन च मुखं कार्यं जिका पिष्टम

सा॰यो॰ यीतथा। कंबलं पट्टसूत्रेण कंठाभरणसंयुता। पंचरत्नसमायुक्ता दर्भरोमसमन्विता कांस्योपदोहना सम्य
२५९ गंधपुष्पैः समन्विता। धपुष्पैश्च वस्त्रैश्चालंकृत्य निवेदयेत्। वेदवेदांगविदुषे विशेषेणाग्निहोत्रिणे॥ पू
र्वामुखस्थितो दाता अथवा तु उदङ्मुखः। धेनुं पूर्वमुखीं कृत्वा वत्समुत्तरतो न्यसेत्। दानकाले तु ये मंत्रास्ता
न्पठित्वा समर्पयेत्। आच्छाद्य चैव तं विप्रं मुद्रिकाकर्णवेष्टकैः। स्वशक्त्या दक्षिणां दद्याद्गंधपुष्पं च चंदनं धे
नुं समर्पयेत्तस्य मुखं च न विलोकयेत्। एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत्। सर्वपापहरा धेनुः सर्व
कामसमृद्धिदा। सर्वपापक्षयपूर्वकसर्वकामफलसमृद्धिकाम इति संकल्पः। अथ लवणधेनुः। भविष्ये।
गोमयेनानुलिप्ते तु दर्भसंस्तरसंस्थितः। आविकं चर्म विन्यस्य पूर्वशाभिमुखं स्थितं। वस्त्रेण छादितं कृत्वा
धेनुं कुर्वीत बुद्धिमान्। आढकेनैव कुर्वीत बहुवित्तोल्पवानपि। स्वर्णशृंगी रौप्यखुरा मिक्षुपादा फलस्तनी॥ २५९
कार्या शर्करया जिह्वा गंधघ्राणवती तथा। समुद्रोदरजे शुक्तिकर्णे च परिकल्पयेत्। शृंगे चंदनकाष्ठाभ्यां

मौक्तिकेचाक्षिणीउभे। कपालौसक्तुपिंडाभ्यांयवैरास्यंप्रकल्पयेत्। कंपलंपट्टसूत्रेणग्रीवायांतुवि
कांतथा। पृष्ठेवैताम्रपात्रंस्यात्पानेगुडपिंडिका। लंगुलेकंबलंदद्यारसक्षीरप्रदेशतः। योनिप्रदेशे
चमधुसर्वतस्तत्फलान्विता। स्थापयेद्धूसकंवापिचतुर्भागेनमानवः। एवंधेनुंसमभ्यर्च्यमाल्यवस्त्रवि
भूषणैः। कृत्वाप्रदक्षिणंतांचपुत्रभार्यासमन्वितः। दद्यात्सर्वेसुसर्वेषुमंत्रेणानेनमानवः। लवणेवैरसास
र्वेलवणेसर्वदेवताः। सर्वदेवमयेदेवीलवणाख्येनमोस्तुते। एवमुच्चार्यमंत्रांतेविप्रायप्रतिपादयेत्। सम्य
क्प्रदक्षिणीकृत्यदक्षिणासहितान्नृपा। सौभाग्यंचपरावृद्धिः शरीरारोग्यसंपदः। नृणांभवतिदत्वातुरसधेनुं
नसंशयः। पत्रोर्णकंबलगलांलवणोदकेनकृत्वाफलस्तनवहंमपिचर्मपृष्ठे। दत्वाद्विजायविधिद्रसधे
नुमेतांलोकेंगवांसकलसौख्ययुतंप्रयाति। पापक्षयपूर्वकसौभाग्यादियुक्तःशरीरावाप्त्युत्तरगोलोकव्रज
नकामहूतिसंकल्पः। अथकार्पासधेनुः। वाराहेअतःपरंप्रवक्ष्यामिधेनुंकार्पासिकींशुभां। साचकार्पा

दा.धे. सभारेणधेनुःश्रेष्ठाप्रकीर्तिता।मध्यमाचतदर्द्धेनतस्याप्यर्द्धेनकन्यसी।एवंवस्त्रधान्यंचहिरण्यंचत
२६ थैवच।वत्सकंतुचतुर्थांशोदानमंत्रोविधीयते।कुर्वीतपूर्ववद्वत्सवस्त्रधान्याद्युपस्करं।हिमकुंदेंदुसद
शेक्षीरार्णवसमुद्भवे।सोमप्रियेसुधेन्वाख्येसौरभेयिनमोस्तुते।दत्तेयमिंदुनाथायशशांकायामृतायच।
अत्रिनेत्रप्रजातायसोमराजायवैनमः।यस्त्वेवंपरयाभक्त्याब्राह्मणायप्रयच्छति।सयातिचंद्रलोकंतुसो
मेनसहमोदते।नरोगीनज्वरीकुष्ठीकुलेतस्यप्रजायते।पुत्रदारसमोपेतोजीवेच्चशरदांशतं।पापक्षयपूर्व
कचंद्रलोकगमनतदधिकरणकसोमसहितमोदनपूर्वकरोगाद्यनभिभूतकुलभवनोत्तरपुत्रदारसमोपेतव
र्षशतजीवनकामइतिसंकल्पः।अथकर्पूरधेनुः।विष्णुधर्मे।कर्पूरधेनुंवक्ष्यामिसर्वगंधमयींशुभां।भूमा
वास्तीर्यनेत्रंतुशंखयुक्तांबरंतथा।कार्याचतुःपलाधेनुःपलमात्रस्तुवत्सकः।अथवापलिकाधेनुर्वत्सः
कार्यस्तुकर्षतः।स्वर्णशृंगीरूप्यखुरांमुखंकुंकुमसंभवां।मृगनाभिमयादंतांग्रंथिपर्णमयंमुखं।अक्षिणी २६

सिह्लकमयेकर्णौ चागरुकाष्ठजौ। देवदारुमयंपुछंगुदंगुग्गुलसंभवं। कुष्टंकपोलकेप्रोक्तमुशिरंचर्मवैचतुरु
दरेचंदनंदद्यात्खुराग्रेनखमेवच। एवंसंकल्प्यकर्पूरधेनुंवस्त्रेणपूजितां। पुष्पगंधार्चितासामेकमलाप्री
यतामिति। दत्वाधेनुमिमांराजन्नांधवीणांसमोहवत्। कल्पत्रयंवसेत्स्वर्गेराजराजोभवेद्दिदि। सर्वान्कामान
वाप्नोतिगौरीलोकेमहीयते। नेत्रंकुराः। ग्रंथिपर्णमयमिति अत्रमुखपर्णेजिह्वालक्षणेषु। पापक्षयपूर्वक
गंधर्वगणसमतावाप्त्युत्तरकल्पत्रयावच्छिन्नस्वर्गवासोत्तरराजराजत्वसर्वकामवाप्तिपूर्वकगौरीलोकमहि
लक्षव्यामइसंकल्पः। अथकस्तूरीधेनुः। तथाकस्तूरिकाधेनुःश्रद्धावित्तसमन्वितः। पात्रेदद्यान्नपश्चेष्ठ
मंत्रमेतमुदीरयेत्। एवंकर्पूरधेनुक्रमः। इदंचसर्वैतिकर्तव्यतोपलक्षणं। कर्पूरधेनुवत्संकल्पः। अथगं
धधेनुः। दत्वागंधमयींधेनुंकामानांफलमाप्नुयात्। सर्वकाम्यफलमित्यर्थः। पापक्षयपूर्वकसकल
कामफलसमृद्धिकामइतिसंकल्पः। अथदधिधेनुः। स्कांदे॥ अनुलिप्तेमहीभागेगोमयेननराधिप।

गोचर्ममात्रंतुपुनःपुष्पप्रकरसंयुतं।कुशैरास्तीर्य्यवसुधांकृष्णाजिनकृतास्तरां। दधिकुंभंवसंस्थाप्य
सप्तधान्यस्यचोपरि। चतुर्थांशेनवत्संतुसौवर्णमुखसंयुतं। प्रशस्तपत्रश्रवणांमुक्ताफलमयेक्षणां।चं
दनागरुशृंगीचमुखंवैगंधमालिकां।जिह्वांशार्करयाराजन्घ्राणंश्रीखंडकंतथा। फलमूलमयादंताः
सितसूत्रस्यकंबलः।ताम्रपृष्ठीदर्भरोमापुच्छंसूत्रमयंतथा।स्वर्णशृंगीरूप्यखुरांनवनीतमयस्तनी।इ
क्षुपादांसुसंकृत्ससर्वाभरणभूषितां। आच्छाद्यवस्त्रयुग्मेनपुष्पगंधैःसुपूजितां।पुच्छदेशोपविष्टायमु
द्रिकाकर्णभूषणां।पादुकोपाहनौछत्रेदत्वामंत्रमनुस्मरेत्।दधिक्राव्णोतिमंत्रेणदधिधेनुंप्रदापयेत्।
एकाहारोदिनंतिष्ठेद्भावानंदनंदन।यजमानोवसेद्धुज्ञात्रिदिनंचद्विजोत्तमः।दशपूर्वान्दशपराना
त्मानंचैकविंशकं।विष्णुलोकमवाप्नोतिस्वयंयातिपरांगतिं।पापक्षयपूर्वकदशपूर्वदशापरात्मैकाविं
शकविष्णुलोकावाप्तिपूर्वकोत्तमगतिप्राप्तिकामइतिसंकल्पः।अथरसधेनुः।स्कांदे।।अनुलिप्तेमही

पृष्ठेकृष्णाजिनकुशोत्तरे ॥ रसस्यतुघटंराजनसंपूर्णमैस्थवस्यतु । तद्वत्संकल्पयेत्मात्रंश्चतुर्थांशेनचैव
ति ॥ इक्षुदंडमयाः पादाराजतक्षुरसंयुताः ॥ सवर्णशृंगाभरणावस्त्रपुछाश्चतस्तनी ॥ पुष्पफलकृतेक्षणा
॥ सप्तव्रीहिसमायुक्तांचतुर्दिक्षुसदीपका ॥ सर्वोपस्करसंयुक्तासर्वगंधविभूषिता ॥ चत्वारितिलपात्रा-
णिचतुर्दिक्षुनिवेशयेत् ॥ धेनुंचपूजयित्वाथगंधधूपस्रगादिभिः ॥ पूर्वोक्तायेचतेमंत्रास्तानेवप्रयतः
पठेत् ॥ एवमुच्चारयित्वायोददातिद्विजसत्तमे ॥ दत्वापूर्वीन्परांश्चैवआत्मानंचैकुविंशकं ॥ नयेत्तुपर
मंस्थानंयस्मान्नावर्त्ततेपुनः ॥ दाताबाग्राहकोवापिएकाहंरसभोजनः ॥ पूर्वोक्तामंत्रायालक्ष्मीरित्या
दयः ॥ स्वरूपधेनुदानमितिदानेस्पष्टं ॥ पापक्षयपूर्वकदशपूर्वदशापरात्मैकविंशकर्मकपुनरावृत्ति
रहितमरमस्थाननयनकामइतिसंकल्पः ॥ अथस्वर्णधेनुः ॥ विष्णुधर्मे ॥ स्वर्णस्यसुवर्णेनशुद्धेन
परिकल्पितां ॥ रौप्यवत्सकसंयुक्तांमुक्ताफलविभूषितां ॥ प्रवालशृंगोपयुतांपद्मरागाक्षिशालिनीं ।

२८७

दा॰ धो॰ घृतपात्रस्तनवतीं कर्पूरागरुनासिकां। शर्करारसनोपेतां भक्ष्यान्नमुखवासितां। शंखशृंगां तुरां शुक्तिल
२६२ लाटस्थानकल्पितां। फलदंतां वस्त्रयुग्मपार्श्वां क्षौमसूत्रकंबलां। इक्षुपादां नालिकेरश्रवणां गुडजानुकां। पं
चगव्यापानवनीतास्पृष्टसमन्वितां। सुपट्टसूत्रलांगूलां सप्तधान्यसमन्वितां। फलपुष्पसमोपेतां छ
त्रोपानत्समन्वितां। हिरण्यरेताः पुरुषपुराणः कृष्णपिंगलः। तप्तहेमछविः स्रष्टा विश्वात्मा प्रीयतामिति।
अनेनैव तु मंत्रेण धेनोर्दानं प्रकीर्तितं। अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयं। कुलानां तु सहस्रस्य स्व
र्गे न्यपतितद्बुधः। सुवर्णस्येति शोभनवर्णस्येत्यर्थः। अत्र यद्यपि मानं नोक्तं तथापि सुवर्णधेनश्चाप्यत्र
सुवर्णाश्चतुर्दश। सुनिर्निक्तसुवर्णैश्च सप्तभिर्मध्यमा मता। चतुर्भिः कन्यसी प्रोक्ता चतुर्थांशेन वत्स
कः। इत्याग्नेयोक्तं ग्राह्यं। सुवर्णशब्दः परिमाणवाचक इति मदनरत्ने। अत्र गुडादिव सुवर्णस्याप २६२
नमुपस्करैश्चाकारकल्पनमिति केचित्। सुवर्णेन साकारां धेनुं कृत्वोपस्कराणां तेन तेनावयवेन स्पर्श

नेनमित्यन्ये । वत्सरौप्यसौवर्णत्वयोर्विकल्पः ॥ पापक्षयपूर्वकाश्वमेधसहस्रफलसमफलप्राप्त्युत्तरात्स
कुलसहस्रकर्मकस्वर्गनयनकाम इति संकल्पः ॥ तिलतैलधेनुस्तु घृतधेनुवत् । घृतधेनुविधानं च तै
लधेनौ प्रकल्पितमिति । हेमाद्रौ मात्स्यात् । घृतधेनुवत्संकल्पः ॥ अथ हिरण्यरत्नधेनुः ॥ मात्स्ये । हिरण्य
रत्नधेनुश्च प्रदेया विधिनामुना । मुच्यते सर्वपापेभ्यः सर्वान्कामानवाप्नुयात् । गुडधेनुविधानेत्यर्थः ॥ स
र्वपापक्षयपूर्वकामारोग्यफलकाम इति संकल्पः ॥ अथ धान्यधेनुः ॥ वाराहे । उत्तमा धान्यधेनुः स्यात् द्रोणा
नां तु चतुष्टयं । मध्यमा च तदर्धेन तदर्धेन कनीयसी । चतुर्थांशेन धेन्वाश्ववत्सं तु परिकल्पयेत् । रुक्मेण
शृंगे कर्तव्ये राजताश्च खुरास्तथा । गोमयेनाक्षिणी कुर्यात् । घ्राणं अगरुचंदनं । मुक्ताफलमया दंता गु
डक्षौद्रमयं मुखं । प्रशस्तपत्रश्रवणा कांस्यदोहनकान्विता । इक्षुपष्टिमयाः पादाः क्षौमपुच्छसमन्विता ॥
नानाफलसमोपेता रत्नगर्भसमन्विता ॥ पादुकोपानहच्छत्रभाजनं दर्पणं तथा ॥ इत्येवं रचयित्वा गां कृ

दा॰धो त्वादीपार्चनादिकं।पुण्यकालंवसंकल्प्यस्मातःपुष्कलंवरोगृही।त्रिःप्रदक्षिणमावृत्यमंत्रानेतानु
२६३ दीरयेत्॥भवविप्रमहाभागवेदवेदांगपारग॥एतांममोपकारायगृह्णीष्वत्वंद्विजोत्तम।प्रीयतांम
मदेवेशोभगवान्मधुसूदनः।त्वमेवलक्ष्मीर्गोविंदेस्वाहाचैवविभावसौ।शक्रेशचीतिविख्याताशिवेगौ
रीतिसंस्थिता।गायत्रीब्रह्मणिप्रोक्ताज्योतिश्चंद्रेरवौप्रभा।बुद्धिर्बृहस्पतौख्यातामेधामुनिषुसत्तमे।
तस्मात्सर्वमयेदेविधान्यरूपेणसंस्थिता।एवमुच्चार्यतांधेनुंप्रदद्याद्धान्यदानतः।तस्मान्नरैःप्रदा
तव्याभुक्तिमुक्तिफलप्रदा।इहलोकेचसौभाग्यमायुरारोग्यवर्धनं।विमानिनार्कवर्णेनाकिंकिणीरत्न
मालिना।सहदेवाप्सरोभिश्चप्रयातिशिवमंदिरं।यावत्तस्यात्क्षयेजन्मतावत्स्वर्गेमहीयते।पापक्ष
यपूर्वकैहिकभुक्तिसौभाग्यायुरारोग्यप्राप्तुनरार्कवर्णविमानाकीरत्नमालिविमानकरणकदेवाप्स २६२
रःसहितशिवपुरजनोत्तराक्षयस्वर्गमहितत्वकामइतिसंकल्पः।अथसप्तव्रीहिधेनवः।विश्वा

मित्रः॥ सप्तव्रीहिमयाः सप्तधेनवः परिकीर्तिताः॥ यथातिलमयीधेनुस्तथैवैतास्तु कारयेत्। यवव्री
हिधेनवः॥ विश्वामित्रः॥ सप्तव्रीहिमयाः सप्तधेनवः परिकीर्त्तिताः॥ यथातिलमयीधेनुतथैवैतास्तु
कारयेत्। यवव्रीहिमयीधेनुर्गोधूमसतिलापरा। माषमुद्गमयी चैव सप्रियंगुश्च सप्तमी। उपस्क
रं तु सर्वासु तिलधेनुवदीरितं॥ सप्तव्रीहिमयाः सप्त यो ददाति हि मानवः॥ स याति परमं स्थानं वायुभूत
श्च मूर्त्तिमान्। धेनुदानेन एतैः सो याति विष्णोः परं पदं। पापक्षयपूर्वकपरमस्थानप्राप्त्युत्तरविष्णुप्रा
प्तिकाम इति संकल्पः॥ अथ गुडादिवृषाः॥ आग्नेये। या मया धेनवः प्रोक्ता वृषास्तावंत एव हि। हरयेत्ता
नियोज्यास्तु हराय च तथा वृषाः॥ तत्र गुडादिवृषाणां स एव विधिः॥ सुवर्णवृषे विशेषस्तत्रैव। भारादि
त्रिपलांतं च वृषं कृत्वा विधानतः॥ युतं धेन्वाथवा दद्याच्छक्तितो नृपसत्तम। गोमयेन समालिप्ते प
द्वे वस्त्रसमावृते। वृषं हेममयं तत्र रौप्यं वा रत्नसंयुतं। तस्मिन्नीलमये शृंगे मौक्तिके चक्षुषी रदाः। द्व

२६५

दा॰चो॰ त्रिंशद्भुअर्द्धजातविद्रुमाख्यौतुनासिकामरकतंतुनिर्दिष्टंकर्णौवैहरिताश्मके।पद्मरागेणवैपादाःखु
२६५ रारूप्यमयाःस्मृताः।राजातानीचरोमाणिक्षौमवस्त्रेणकंबलं।पट्टेनपुच्छमुद्दिष्टंसर्वेषामप्ययंविधिः।
वृषणौस्फटिकस्यापिमणिलिंगेप्रकीर्तितः।तथाधेनुर्य – नड्वान्सुवर्णस्यतुकारयेत्।योवृषोयत्प्रदा
नेभक्तानीकंस्यनिष्फलः।जातरूपमयःसोयंतारितामानसंशयः।एवंसविभवंदानमनंतफलदंस्मृतं।
निःस्वोप्येवमल्पदानादाप्नोत्यविकलंफलंखुतामिति।तातोधेनुंतेनतेनवृषेणसहाथवाधेनुमेववृषमे
ववेतिपक्षत्रयामित्यर्थः।सर्वेषामिति।गुडादिवृषेपिस्मगादिकंउक्तनीलादिघटितमित्यर्थः।तथाधेनु
रिति।यथातथशक्तौविपर्ययेणयोज्यौ।अन्यथाधामयेस्तुपक्रमविरोधापत्तेः।भारादीति।इदमुपलक्षणं।
वृषपंहिरण्येनसहस्रेणाथकारयेत्।तदर्द्धेनाथवाधीमान्तदर्धार्द्धेनवापुनः।अष्टोत्तरशतेनापिवृषभं
धनरूपिणामितिलैंगात्।अत्रसहस्रादिशब्दोनिष्कपरमितिहेमाद्रिः।जांबूनदस्यशुद्धस्यपलेस्त्रिंशति २६५

भिस्तथा तदर्धेन तदर्द्धेन यथाशक्त्या पलैस्त्रिभिः। द्वाभ्यामेकेन वा कार्यो वृषः सर्वांगशोभनः। पलादूनो
न कर्त्तव्यो वृषः शोकभयापह इति गारुडञ्च। तस्य तालमये इति। इदमुपलक्षणं। ललाटे कारयेत्पुंड्रमर्द्ध
चंद्रकलाकृति। स्फटिकेन तु कर्तव्यः खुराश्चरजतेन च। पुंड्रं तिलकं स्फाटिकमित्यर्थः। ग्रीवां तु पद्मरागे
ण ककुद्गोमेदकेन च। ग्रीवायां घंटवलयं रत्नचित्रं तु कारयेदिति लिंगपुराणे। योपस्कराणां गारुडे तु उप
स्करा नोक्ताः। अतः शक्त्या विकल्पः। एवं सविभवमिति। लैंगे तु। वृषांकं कारयेत्तत्र किंकिणीकृतपत्रगं।
वृषांको महेश्वरः। तल्लक्षणं त्रिनेत्रस्तु चतुर्वाहुर्जटामंडलमंडितः। त्रिशूलखड्गवरदाभयपाणिमहेश्वरः।
इति हेमाद्रावुक्तं। वृषभं स्थापयेत्तत्र पश्चिमामुखमग्रतः। ईश्वरं पूजयेद्भक्त्या वृषारूढं वृषध्वजं। वृषेंद्रं पूज
येद्भक्त्या नमस्कृत्वा विधानतः। तीक्ष्णशृंगाय विद्महे धर्मपादाय धीमहि। तन्नो वृषप्रचोदयात्॥ मंत्रेणा
नेन संपूज्यो वृषो धर्मविवृद्धये। होतव्यं च घृताद्यैश्च यथाविभवविस्तरं। वृषगायत्र्यैव होमोष्टशतमष्टसह

265

स्त्रं वा। वृषः संपूज्य दातव्यो ब्राह्मणेभ्यः। शिवाय च। दक्षिणा चैव दातव्या यथावित्तानुसारतः॥ गारुडे तु
पूजामंत्रः॥ नमस्ते जगदाधार प्रियः पुण्यकृतामसि। तद्विहीने जने ह्यस्मिन्न कश्चिच्छुभमश्नुते। नमस्ते धर्म
राजाय वृषरूपधराय वै। त्वं मामुद्धर देवेश दुर्गसंसारसागरात्। यत्राः कीर्तिर्दिनं धान्यं यदन्यदपि संस्तुतं।
तत्तत्प्रयच्छ देवेश परत्र च शुभां गतिमित्युक्तः॥ ततोधिवासनमधिकमुक्तं गारुडे। दानमंत्रस्तु स एव।
अत्र फलं लैंगे। एतद्यः कुरुते भक्त्या वृषदानमनुत्तमं। शिवस्यानुचरो भूत्वा सुचिरं तत्र मोदते इति। गारु
डे तु दत्वा दानमिदं सम्यग्विधिनानेन पार्थिव। कुर्याद्दिग्विजयं विप्रो वेदकर्म समाचरेत्। वैश्यः समुद्रग
मनं शूद्रः कर्म यथेप्सितमित्युक्तं। अथ रूप्यवृषः। कुरुहरवृषदानं तु पितृकृतकर्मविपाकसारात् ज्ञे
यं। हेमाद्रौ स्कांदे। त्रिंशत्पलान् समारभ्य पलत्रितयमंततः। वृषं रौप्यमयं कृत्वा सर्वरत्नैरलंकृतं। क्षौम
वस्त्रपरिच्छन्नं धान्यविन्यासभूषितं। यथोक्तकाले पात्राय याथविध्यायोपपादयेत्। दानमंत्रमिमं प्राज्ञो दान

कालेसमुद्धरेत। धर्मस्त्वंवृषरूपेणजगदानंदकारकः॥ अष्टमूर्त्तेरधिष्ठानमतः पाहिसनातनः॥ एवंददा
तियोभक्त्याकलधोतमयंनृप। सर्वपापविनिर्मुक्तोदेववद्दिविमोदते। गारुडेतु। पलाष्टकेनरौप्येणकृत्वा
वृषभमुत्तमं। मुक्ताफलैरलंकुर्यात्पद्मरागैः॥ शुशोभनैः॥ स्वर्णतिलकोपेतंचारुचामरपूजितं। गत्वाशि
वालयेसम्यक्पूजयित्वा। शिवंततः॥ रुद्राध्यायंजपित्वातुषडंगंसरहस्यकं। होमश्चशिवमंत्रेणतिलाज्ये
नविधीयते। अथाहूयद्विजवरंवेदवेदांगपारगं। वस्त्रालंकारमाल्याद्यैः पूजयित्वाशिवंयथा। उमाप
तेत्रिलोकेशजगत्कारणकारण। स्ववाहनप्रदानेनप्रीतोभवनमोस्तुते। मंत्रेणानेनतंदद्याद्धेमदक्षि
णायान्वितं। दानस्यास्यप्रदानेनशिवलोकेमहीयते। अथैतेषांसर्वसाधारणप्रयोगः॥ कर्त्तादेशकालौ
संकीर्त्यममेहलौकिकायुरारोग्यसमृद्ध्युत्तरहरिस्मरणसहितमरणोत्तरविष्णुपदप्राप्तिकामोगुडधेनु
दानंकरिष्यइतिसंकल्प्यगणेशपूजापुण्याहवाचनेकृत्वाचार्यंवृणुयात्। आचार्योभुवंगोमयेनोपलिप्य

दा. चो. कुशैरास्तीर्य तत्र प्रसारिते कृष्णाजिने पूर्वोक्तान्यतममानेन गुडादिना प्राक्शिरसमुदीचीनापदं धेन्वा
२५८ कारं कृत्वा मुखप्रदेशे घृतपूर्णपात्रं कर्णदेशे शुक्तिके पाददेशे इक्षून्। अक्ष्णोर्मुक्ते तारकयोरिंद्रनीलौ
शिरासु सितवस्त्राणि सास्नायां सितकंबलं ककुदपृष्ठयोस्ताम्रपट्टं रोमसु सितचामरं भ्रूद्वये विद्रुम
द्वयं स्तनचतुष्टये नवनीतपात्रचतुष्टयं पुच्छे क्षौमं दंतेषु नानाफलानि घ्राणयोर्गंधकरंडकान् स्था
पयेत्। ततः सुवर्णशृंगीं रौप्यखुरां कांस्यदोहां सितसूक्ष्मवस्त्राच्छादितां कुर्यात्। एवं धेनोः कृत्वा ततो धेनु
द्रव्यचतुर्थांशेन प्राङ्मुखं वत्सं नाभिमुखं — वत्सं निर्माय धेनूपस्करद्रव्यैरुपस्कृतसवत्सायै गुड
धेनवे नम इति नाममंत्रेण षोडशोपचारैः संपूज्य गंधपुष्पांजलिं दत्वा प्रदक्षिणीकृत्य या लक्ष्मीः
सर्वभूतानां या च देवेष्ववस्थिता। धेनुरूपेण सा देवी मम पापं व्यपोहतु। विष्णोर्वक्षसि या लक्ष्मीर्या या
लक्ष्मीर्धनदस्य च। लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे। स्वधा या पितृमुख्यानां स्वाहा यज्ञभु २५८

ओं त्वया। सर्वपापहरा धेनुस्तस्माछांतिं प्रयछ मे। इतिपद्यपंचके पठित्वा पुष्पांजलिं प्रक्षिप्य पुछदेशे
उपविश्य पूर्वोक्तं फलमुचार्य गाममुकपरिमणगुडनिर्मितां घृतास्यां शुक्तिकर्णामिक्षुपादां मुक्ता
फलेक्षणामिंद्रनीलतारकां नानाफलमयदंतां गंधकरंडघ्राणां सितसूत्रसिरां कंवलसास्नां ताम्रककु
त्पृष्ठां सितचामररोमकां विद्रुमभ्रूयुगां नवनीतस्तनीं क्षौमपुछां कांस्यदोहां सुवर्णशृंगीं रौप्यखुरां सि
तवस्त्रावृतां धेनुद्रव्यतुरीयांशनिर्मिततावदुपस्करसहितवत्सां विष्णुदेवतां तुभ्यं संप्रददे इति पुछं दद्या
त्। ततः कृतस्य गुडधेनुदानकर्मणः प्रतिष्ठार्थं यथाशक्ति सुवर्णं दक्षिणां संप्रददे इति दक्षिणां दत्वा।
भूयसीं संकल्प्य कर्मेश्वरार्पणं कुर्यादिति। घृतधेन्वादौ तु औपदेशिकद्रव्यैरातिदेशिकानां बाधः॥ अ
नुक्तशृंगादिषु इमान्येव ग्राह्याणि। आवाहनमंत्राश्चैत एव। फलोल्लेखो दानमंत्राश्च तत्र तत्र स्पष्टा इ
ति। मीमांसैकधुरंधरः श्रुतिधरो न्यायेपि वागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः॥

यं विद्वन्मणिशेखरो दिनकरः प्रासूत विश्वेश्वरं तेनाकारि समग्रधेनुददतौ सत्प्रीतये पद्धतिः ॥ इति दिनक
रभट्टसूनुगागाभट्टरचिते दिनकरोद्योते दानकांडे गुडादिधेनुदानप्रयोगः ॥ सूनोर्दिनकरस्यैष गागाभट्ट
मनीषिणः ॥ इदानीं देवतादानविधौ लीला विजृंभते । अथ ब्रह्मविष्णुमहेश्वरदानं । हेमाद्रौ लैंगे ॥ अथान्य
संप्रवक्ष्यामि सर्वदानोत्तमोत्तमं । पूर्ववद्देशकाले तु मंडपे वा विधानतः ॥ प्रपायां कूटमध्ये वा स्थंडिले शि
वसंन्निधौ । पूर्वं विष्णुं समाराध्य पद्मयोनिं ततः परं । मंत्राभ्यां विधिनातेभ्यः प्रणवादि नमोंतकं । पूर्वव
त्तुलापुरुषवदित्यर्थः सान्निधानात् । प्रपा कुटी मंडपविशेषौ । स्थंडिले वेद्यामित्यर्थः ॥ शिवसन्निधावित्यु
क्ते । रथोक्तिशिवप्रतिमाकरणं तदुक्तं कामिके । मंडलांतशिवं हैमं पार्श्वयोर्ब्रह्मकेशवौ । तानुद्दिश्य प्रदा
तव्यं श्रोत्रियेभ्यो धनं बहु । उत्तमं त्रिसहस्रं तु मध्यमं द्विसहस्रकं । सहस्रं कन्यसं प्रोक्तं समासात्प्रो
च्यते मया । पूर्ववच्छिवपूजा च ऋत्विगाचार्यदक्षिणा । मंत्रास्त्यामि । नारायणाय विद्महे वासुदेवाय धीमहि

तन्नो विष्णुः प्रचोदयात्। रुहृद्गहृणभेदाय ब्रह्मणे धनदायिने। शिवाय हरये स्वाहा स्वधा वौषट् फटा
नमः। इत्येताभ्यां प्रणवादिनमोंताभ्यां ब्रह्मविष्ण्वोः शिवस्य वक्ष्यमाणरुद्रेणेति हेमाद्रिः। तत्पुरुषाय
विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयादिति शिवगायत्र्या पूजा रुद्रजपो दृष्टेऽर्थ इति वयं। पूजयि
त्वा विधानेन ततो होमं समाचरेत्। सर्वद्रव्यं च होतव्यं द्वाभ्यां कुंडे विधानतः। जप्या रुद्रं सुनियतः शिवैकगतमा
नसः। ऋत्विजौ हौतुकर्तव्यौ सगुणौ वेदपारगौ। तानुद्दिश्य यथान्यायं विप्रेभ्यो दापयेद्धनं। शतमष्टोत्तरं तेभ्यः
पृथक्पृथगनुत्तमं। वस्त्राभरणसंयुक्तं यथाविभवविस्तरं। गुरुश्च ऋत्विजौ चैव ब्रह्मविष्णुमहेश्वरान्।
तेषां पृथक्पृथग्दद्याजयेद्ब्राह्मणानपि। शिवार्चना च कर्तव्या स्नपनादि यथाक्रमं। सर्वमिति स्कलोक्तं तिला
दिः द्वाभ्यां। ऋत्विग्भ्यां गुरुसहिताभ्यां होतव्यमित्यर्थः। महेश्वरानिति विधायेति शेषः। मूर्तित्रयं त्रिभ्यो दद्या
दित्यर्थः। दैशिकं पूर्ववत्संपूज्य ऋत्विजश्चापि पूजयेत्। पुण्याहवाचकान्विप्रान्पूर्ववत्पूजयेद्बुधः। एवं कृ

२६४

ते च लभते सर्वयज्ञफलं नरः। सर्वान्कामानवाप्नोति निर्वाणं चाधिगच्छति। अथ त्रिमूर्तिदानं। ब्रह्मांडे
। त्रिमूर्तिदानं दानानामुत्तमोत्तममुच्यते। विषुवस्ययने वापि चंद्रसूर्यग्रहादिषु। नित्यं वा पंचदश्यां च
जन्मर्क्षेषु समाचरेत्। देवालये नदीतीरे पुण्ये चायतनेषु च। गृहे वा कारयेद्दानं यत्र भूमिः शुचिर्भवेत्। चतु
रस्त्रां समां भूमिं गोमयेनानुलेपयेत्। तत्राक्षताभिर्विकिरेत् पुष्पांजलीन्समंततः। एकहस्ताद्विहस्ता वा
त्रिगुणा दैर्घ्यतः स्मृता। त्रिवेदिका भवत्तिर्यक् श्वेततंडुलमिश्रिता। ब्रह्माथ विष्णुर्भगवान्पुरारिर्हिरण्य
मास्तत्र निवेश्यानीयाः चतुर्भुजाः सायुधभूषणाद्याः किरीटिनश्चापि यथाक्रमेण। स्नातार्घपाद्याचम
नीयवस्त्रगंधादिभिस्तानभिपूज्य भक्त्या। प्रदक्षिणीकृत्य सपुष्पहस्तः प्रणम्य चोद्दास्य ततः प्रदद्या
त्। प्रत्येकमेकं बहुमानपूर्वं संपूज्य दातव्यमनुक्रमेण। त्वया जगत्सृष्टिकरस्त्वमेतत् त्वमेव सर्वस्य पिता
महोसि। त्वमेव कर्त्ता जगतो विकर्त्ता त्वमेव धाता जगतां विधाता। यत्संप्रदानादनघो यथाहं त्वया च सा

युग्ममुपैमिदेव।तथाकुरुत्वंशरणंप्रपन्नेमयिप्रभोदेववरप्रसादं।त्वयामराणाममृतंविधायहालाहलं
संहृतमेवयस्मात्।तथासुराणांत्रिपुरंचदग्धमेकेषुणालोकहितार्थमीशात्वद्रूपदानादहमप्यशेषैर्दोषै
र्विमुक्तःसुगुणान्प्रपद्ये।तथाकुरुत्वंशरणंप्रपन्नेमयिप्रभोदेववरप्रसादं।इत्येवमुक्त्वाविधिवद्ददाति
समाप्तिसायुग्ममथत्रिमूर्तेः।यःकारयेद्धिप्रवरायतस्मैसुवर्णसंख्यापणितंहिरण्यं।दद्याच्चवासोयुगमाद
रेणतथाकृतेयंलभतेफलंतत्।अथत्रिपुरुषदानं।मत्युंजये।सुवर्णरक्तिकानांचशतेनैकेनशक्तितः।का
र्योब्रह्माथविष्णुश्चशंकरश्चतथैवच।पलद्वादशमानेनपीठंलोहेनकारयेत्।देवतास्थापनार्थायचक्र
वत्सरिमंडलं।तत्रब्रह्मास्यस्थाप्या।यमदूतंपुरोन्यसेत्।चतुर्मुखश्चतुर्बाहुःपद्महस्तःपितामहः।शंक
रोद्विभुजःशूलीवृषारूढस्त्रिलोचनः।विष्णुश्चतुर्भुजश्चक्रीगदीगरुडवाहनः।यमदूतःपाशपाणिर्दंड
वान्विकृताननः।सतुलोहमयःकार्योभीतोवद्धवायतः।ततोविधायदेवानांपूजांपुष्पफलादिभिः।

यजमानकरेखड्गंगृहीत्वानिशितनवं।इदंशिरश्छिन्नमीतिदूतस्यास्यदुरात्मनः।इत्युच्चार्यशिरश्छिंद्या
द्दूतस्ययमदिग्मुखः।ततश्चतुर्भिर्विप्रैस्तुकार्यंब्राह्मणवाचनं।ततोब्रह्मादिदेवानांदानंकुर्यात्प्रयत्न
तः।देवालयेगृहेवापितीर्थेवान्यत्रकुत्रचित्।ब्राह्मणायतुलांदद्यादव्यंगायचशीलिने।सुवर्णदक्षि
णायुक्तान्ब्राह्मणाननुपूर्वशः।अपमृत्युभयात्रस्तोयोदद्याद्देवतात्रयं।तस्यमृत्युर्विनश्येत्तद्दानादस्मा
न्नसंशयः।मृत्युनाग्रस्यमानोपिजीवत्येवनरस्फुटं।चामीकरप्रतित्रितयंविधायब्रह्मादिदानमिहयः
पुरुषःकरोतिरोगान्निरस्यसकलानपिदुर्निवारान्नैवापमृत्युभयमेतिनरःकदाचित्।अथचतुर्मूर्त्ति
दानं।ब्रह्माण्डे।।चतुरस्रांसमांभूमिंलिप्तागोमयवारिणा।चतस्रस्तत्रलेखाःस्युःप्राच्योदीच्यस्तताःस
माः।नवकोष्ठानितत्रस्युःकोणकोष्ठानिवर्जयेत्।तत्रतेषुचमूर्तीश्चचतुर्दिक्षुनिवेशयेत्।प्रागाद्यु
त्तरपर्यंतंजातरूपमयीशुभाः।शुभतंडुलपद्मेषुपुण्यकृत्तुनिवेशयेत्।पुरतोवासुदेवंचसंकर्षणमतः

परं। प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तिर्यथाक्रमं। शंखचक्रगदापाणिं पीतवाससमच्युतं। श्रीवत्सांकं चतुर्बाहुं केयूरमुकुटोज्वलं। नीलांबरधरं देवमनंतं मुसलायुधं। संकर्षणं चतुर्बाहुं कटकादिविभूषणं। प्रद्युम्नश्चानिरुद्धश्च शंखचक्रगदाधरौ। पीतश्वेतांबरधरौ केयूरादिविभूषितौ। एवं कृत्वा चतुर्मूर्त्तिं चतुर्बाहुं समर्चयेत्। पलस्यार्द्धसुवर्णेन यथाशक्ति विनिर्मितं। प्रागाद्युत्तरपर्यंतं देवतामर्चताक्रमः। स्वस्वमंत्रेण देवानामाराधनमनुक्रमात्। स्नानं वासोयुगं चार्घ्यं पाद्यमाचमनीयकं। गंधं सुमनसो धूपं दीपं नैवेद्यमेव च। धारात्रयं शुद्धजलैस्तांबूलं विनिवेदयेत्। परितो लोकपालांश्च गंधादिभिरथार्चयेत्। त्रिःप्रदक्षिणमावर्त्य गृहीतकुसुमांजलिः। वेदस्य विप्रानाराध्य रद्यान्मंत्रमुदीरयन्। नमोस्तु वासुदेवाय जगतां पतये नमः। तव संकीर्तनाद्धाना छ्रेयः स्यात्तु सदा मम। संकर्षण नमस्तेस्तु जगत्स्थित्यंतकर्मणा। तव देवदानं मे सर्वपापहरं भवेत्। प्रद्युम्नायाखिलेशाय भक्तानां दुःखहारिणे। नमोस्तु देवदेवाय भक्ताना

दा॰ घो॰ मा। हारिणे। सदा नमोस्तु जगतः स्थितिस्थित्यंतहेतवे। आनिरुद्धाय देवाय विष्णवे परमात्मने। यो हि दद्या
२७॰ च्चतुर्मूर्तिं श्रद्धायुक्तस्तु नारद। नारी वा पुरुषो वापि यथोक्तं फलमश्नुते। अथ पंचमूर्तिदानं। ब्रह्मांडे। अथ
दानं प्रवक्ष्यामि पंचमूर्तेरितिश्रुतं। यत्कृत्वा पुरुषः स्त्री वा सर्वं सिद्धिमवाप्नुयात्। यत्पापं मनसा वाचा कर्मणा
मनुना कृतं। जन्मांतरसहस्रेषु तन्नाशं याति सर्वतः। दानमारोग्यमायुष्यं श्रीकरं भुक्तिमुक्तिदं। चंद्रसूर्यग्रहे चा
थ विषुवत्ययनादिषु। पुण्यकालेषु सर्वेषु गृहे वा दानमाचरेत्। आचार्यं वरयेद्विप्रं तस्यानुज्ञानवाप्य च। विद्या
विनयसंपन्नं सर्वंते नैव कारयेत्। लेपयेत्तु समाभूमिं गोमयेनोदकेन च। चतस्रस्तत्स्थले रेखास्तुः प्राच्योदीच्यासु
ताः समाः। त्रिहस्तमात्रास्ताः सर्वास्तिस्रस्तु नव कोष्ठकाः। तत्र पंचैव संग्राह्याश्चतुःकोणान् विसर्जयेत्। तेषु
पंचसु कोष्ठेषु प्रत्येकं कमलं न्यसेत्। श्वेततंडुलपुंजेन अष्टपत्रं सकर्णिकं। तेषु तंडुलपद्मेषु पंचमूर्तिं निवे
शयेत्। सुवर्णनिर्मिताः पंचमूर्तिः कृत्वा विधानतः। ईशं सौवर्णमासीनं कपर्द्दमुकुटोज्वलं। चतुर्बाहुमुदा २७०

रांगकूटकादिविभूषितं। दक्षिणेपरशुंहस्तेसव्येतुमृगपोतकं। अभयंदीक्षिणेसव्येभल्लंतत्रत्रयंन्यसेत्। स
द्योजातंवामदेवंअघोरंपुरुषंतथा। सुवर्णेनैवकुर्वीतप्रधानादर्धमानतः। सद्यंपश्चादुत्तरेवामदेवंतंचास्यस्मि
न्दक्षिणेवाप्यघोरं। सद्यंसद्योजातंतछ्ठोक्तंपुरुषंपूर्वकोष्ठेतथामध्येचैवमीशानमेव। तछ्ठोनंपुरुषंतत्पु
रुषमित्यर्थः स्नानंवस्त्रंचाप्यपादाचमेयंगंधपुष्पंधूपदीपौहविष्यं। अभ्यर्च्चिताः पंचमूर्त्तीः क्रमेणमंत्रैः पं
चब्रह्मभिमींनपूर्वंसंपूज्यचैवंविधिनोदितनसद्यादिदेवाश्चयथाक्रमेण। पंचब्रह्मणः सद्योजातंप्रपद्यामी।
त्यादिपंचमंत्राः तेनैवविशेषेणचसर्वमेतत्कृत्वैवदानंस्वयमेवकुर्यात्। दानकालेतुसंप्राप्तेतदानारीनरोथ
वा। स्नापितागुरुणातेनमंत्रपूतैः कुशोदकैः। अभ्यर्च्यविप्रंगंधाद्यैर्मंत्रानेतानुदीरयेत्। प्रत्येकमेकादातव्या
देवमूर्त्तिरनुक्रमात्। नमोस्तुसद्योजातायनमोभगवमायिने। भवभंगोभवेन्मह्यंतवरूपप्रदानतः। सोमाद्य
वामदेवायशिवायाग्निवरूपिणे। सदामेशिवमेवास्तुतवरूपप्रदानतः। वामदेवायशिवायग्निवरूपिणे। स

दामेनमोघोरायघो—प्रजगत्सेहतिकर्मणे।शरणंत्वांप्रपन्नोस्मिशंकंममत्र्यंकर।पुरुषायपुराणायमहारायव
रदायच।तस्यरूपप्रदानंमेश्रेयसेस्तुनमोस्तुते।ईशानोजगतामीशोदेवानामभयंकरः।रक्षत्वशेषभूता
नामीशमांशरणागतं।विप्रंदक्षिणमावृत्यगृहीतकुसुमांजलिः।प्रणिपत्यततोदद्याद्देभिर्मंत्रैर्यथाक्रमं।
गुरवेदक्षिणांदद्यादन्यस्मैवाप्रदापयेत्।दक्षिणांगुरवेदद्यात्सुवर्णंचैववाससी।एवन्नरोथवानारीदानंवि
धिवदाचरेत्।मुच्यतेसर्वपापेभ्यःशिवसायुज्यमाप्नुयात्।अथशालग्रामदानं।मदनरत्नेहरिवंशे।चतुः
सागरपर्यंतांसशैलवनकाननां।दत्वायत्फलमाप्नोतिशालग्रामात्तदश्नुते।शालग्रामशिलादानमतिदानं
प्रकीर्तितं।शालग्रामंतथालिंगंयोददातिकुरूद्वह।ममलोकमवाप्नोति।शिवलिंगप्रदानतः।पाद्मे।शालग्रा
मशिलाचक्रंयोदद्याद्दानमुत्तमं।भूचक्रंतेनदत्तंस्यात्सशैलवनकानने।पौरुषेणैवसूक्तेनसंपूज्यचयथावि
धि।सौवर्णेराजतेवापिताम्रेवाभाजनेनवे।नववस्त्रसमास्तीर्णेप्रतिष्ठाप्यहरिंततः।संपूज्यक्षीरपक्वान्नैर्नै

वेद्यादौत्समर्पयेत्। ततः संपूज्य विप्रेंद्रं मधुपर्कपुरःसरं। ततः सुवर्णसहितं वस्त्रयुग्मसमन्वितं। आद्यं सपात्रहस्तेन शिलाचक्रं नराधिप। ततः परमिमं मंत्रं देशकालादिकीर्त्य च। शालग्रामशिलाचक्रे भुवनानि चतुर्दश। तस्मादस्य प्रदानेन प्रीयतां हरिरीश्वरः। नारायण जगन्नाथ शंकर चक्रगदाधर। सप्तजन्मनिबद्धा दैर्वि ग्राह्ये विकृतं मम। चक्रहस्त गदापाणे शमयाशु जगत्पते। प्रणवं च समुच्चार्य शिलाचक्रमदात्सकं। मद्भक्त्याय प्रदातव्यं जलदानपुरःसरं। देवस्यत्वेति राजात्वेतीमं मंत्रस्ततः परं। प्रतिग्रहीताय त्वेन पठनीयो यथाक्रमं। ततः परं कृतं कर्म कार्यं सर्वं मदर्पणं। एवं यः कुरुते भक्त्या शिलादानं यथाविधि। स महापापसंघेभ्यः सद्य एव विमुच्यते। यं यमर्थं समुद्दिश्य शिलादानं करोति यः। स तं तमर्थं लभते मत्प्रसादान्नराधिप। शालग्रामसमं दानं नास्ति कुत्रापि वै यतः। सर्वेषामपि दानानामुत्तमं तत्प्रचक्षते यः करोति विधानेन स मे प्रीतिविवर्द्धनः। व्यासः। यो ददाति शिलां विष्णोः शालग्रामसमुद्भवां। वैष्णवो विष्णुभक्ता

212

दा॰ यो॰
२७२

येतेनेष्टं क्रतुभिः शतैः ॥ अथ लोकपालाष्टकदानं । लैंगे । लोकपालाष्टकं दिव्यं साक्षात्परमदुर्लभं । सर्व
संपत्करं गुह्यं परचक्रविनाशनं । स्वदेशरक्षणं नित्यं गवाजिविवर्द्धनं । पुत्रवृद्धिकरं पुण्यं गोब्राह्मणहिता
वहं । पूर्वोक्तदेशे कालेनु वेदिकोपरि मंडिके । मध्ये शिवं समभ्यर्च्य यथान्यायं यथाक्रमं । दिग्विदिक्षु कर्तव्यं
स्थंडिलं वालुकामयं । अष्टौ विप्रान्समाहूय वेदवेदांगपारगान् । जितेंद्रियान्कुलोद्भूतान्सर्वलक्षणसं
युतान् शिवाभिमुखमासीनानहतेष्वंबरेषु च । वस्त्रैराभरणैर्दिव्यैर्लोकपालान्स्वमंत्रकैः ॥ गंधैः पुष्पैर्दू
पदीपैर्ब्राह्मणांश्चार्चयेत्क्रमात् । पूर्वतो होमयेदग्नौ लोकपालाष्टमंत्रकैः ॥ समिद्धृताभ्यां होतव्यं अग्निक
र्मक्रमेण तु । एवं कृत्वा विधानेन ब्राह्मणान्वेदपारगान् । यजमानः समाहूय सर्वाभरणभूषितान् । स्नात्वा ता
न्पूजयित्वाथ द्विजेभ्यो दापयेद्धनं । पृथक्पृथक्स्वमंत्रैश्च दशानिष्कं च भूषणं । दशानिष्केण वस्त्राद्यैआ
सनं कंवलं पृथक् । स्नपनं तस्य कर्तव्यं शिवस्य विधिपूर्वकं । दक्षिणा च प्रदातव्या यथाविभवविस्तरं । २७२

अत्रकुंडमंडपादितुलापुरुषोक्तेतिकर्तव्यताभवतीति हेमाद्रिः। वेदिकामात्रंतुलोक्तं अन्यद्यथोक्तं। अ
तिदेशे प्रमाणाभावादिति वयं। पश्चिमप्रदेशे मध्ये शिववेदिकाः परितो दिग्विदिक्षु वेदिकाष्टके लोकपा
लपूजा। आचार्यसहितब्राह्मणाष्टकापदानं प्रद्वीतौ होमः निष्कदशकं दक्षिणा। हूवाचार्यायेति पृथ्वावि
भवं दक्षिणेत्यपि हेमाद्रिः। कामिके तु। एकस्मिन् स्थंडिले वाथ कुंडे वा होममाचरेत्। लोकपालाष्ट मंत्रैस्तु
पृथगष्टोत्तरं शतं। समिद्भूताभ्यां होतव्यं अंते पूर्णाहुतिं ददेत्। एवं यः कुरुते दानं लोकेशानां तु भक्तितः। लो
केशानां चिरं स्थित्वा स्थानेषु सुसुखं नरः। कल्पं शिवपुरे स्थित्वा सार्वभौमो भवेद्भुवि। अथ नवग्रहदानं ब्रह्मां
डे। ग्रहदानं यथावक्ष्ये सर्वसिद्धिकरं परं। सर्वशांतिकरं नृणां सर्वपापप्रणाशनं। विषुवत्ययने तद्वद्ग्रहणे श
शिसूर्ययोः। जन्मर्क्षे सौरवारे वा पंचदश्यां तथैव च। पुण्यकालेषु सर्वेषु पुण्यदेशे विशेषतः। ग्रहदानं तु क
र्तव्यं नित्यं श्रेयोभिकांक्षिणा। हस्तमात्रं द्विहस्तं वा त्रिहस्तं वाथ नारद। चतुरस्रां समां भूमिं गोमयेनानुले

पयेत्। रेखाः प्राच्यउदीच्यश्च स्युश्चतस्रस्तथासमाः। नवकोष्ठेषु पद्मानि विन्यसेश्वेततंडुलैः। आदित्यश्चं
द्रमाभौमो बुधजीवसितार्कजाः। राहुकेतुरितिप्रोक्ता ग्रहालोकसुखावहः। एषांहैरण्यरूप्यापि कारयित्वा यथा
विधि। त्रिनिष्केणाथवाकुर्यात्स्वथाशक्त्या पृथक्पृथक्। आदित्यंमध्यमे कोष्ठेदक्षिणेंगारकंन्यसेत्। उत्तरेतु
गुरुं विंद्यात्बुधमुत्तरपूर्वके। भार्गवंपूर्वतोन्यस्य सोमंदक्षिणपूर्वकं। पश्चिमेर्कसुतंन्यस्य राहुंपश्चिमदक्षिणे।
पश्चिमोत्तरकेतुंच संनिवेश्यमयथाविधि। तद्वर्णगंधपुष्पाद्यैस्त्वर्चयेत्स्वस्वमंत्रकैः। दानंभद्रेथवाकुर्यास्त्रीवा
तन्मतुनारद। भूलेपनादियत्कार्यंसर्वंविप्रेणकारयेत्। स्नानकालेतुसंप्राप्तेस्नात्वातिलकुशोदकैः। प्रयतोय
जमानस्तु धौतवस्त्रः प्रसन्नधीः। अर्चयित्वास्वयंदद्यात्स्वकरमुखान्ग्रहान्। प्रत्येकमेकविप्रासौस्वर्ण
मंत्रमुदीरयेत्। पद्मासनःपद्मकरोद्विबाहुःपद्मद्युतिःसप्ततुरंगवाहः। दिवाकरोलोकगुरुःकिरीटीमयिप्रसा
दंविदधातुदेवः। श्वेतांबरःश्वेतविभूषणश्चश्वेतद्युतिर्दंडधरोद्विबाहुः। चंद्रोमृतात्मावरदःकिरीटीश्रेयांसिम

स्यं प्रददातुदेवः॥ रक्तांबरोरक्तवपुः किरीटीचतुर्भुजोमेषगमोगदाभृत् । धरासुतः शक्तिधरश्चशूलीस
दासमेस्याद्वरदः प्रशांतः॥ पीतांबरः पीतवपुः किरीटीचतुर्भुजोदंडधरश्चहारी । चर्मासिधृक्सोमसुतः
सदामे — साधिरूढोवरदोबुधश्च । पीतांबरः पीतवपुः किरीटीचतुर्भुजोदेवगुरुः प्रशांतः । दधातिदंडं
चकमंडलुंचतथाक्षसूत्रंवरदोस्तुमह्यं॥ श्वेतांबराश्वेतवपुः किरीटीचतुर्भुजोदैत्यगुरुः प्रशांतः । दधातिदंडं
चकमंडलुंचजयंचबिभ्रद्वरदोस्तुमह्यं । नीलद्युतिः शूलधरः किरीटीगृध्रस्थितस्त्राणकरोधनुष्मान् । चतुर्भु
जः सूर्यसुतः प्रशांतोवरप्रदोमेस्तुसमंदगामी॥ नीलांबरोनीलवपुः किरीटीकरालवक्त्राकरवालशूली । चतुर्भुज
श्चर्मधरश्चराहुः सिंहासनस्थोवरदोस्तुमह्यं । धूम्रोद्विबाहुर्वरदोगदाभृत्गृध्रासनस्थोविकृताननश्च । किरी
टकेयूरविभूषितांगः सदास्तुमेकेतुगणः प्रशांतः॥ इत्युक्त्वादापयेत्सर्वानादित्याद्यान्नवग्रहान् । पुरुषोवाथ
नारीवायथोक्तेफलमाप्नुयात् । मध्यमंगुरवेदद्यादन्यस्यैवाप्रदापयेत् । अथादक्षिणादेयासुवर्णवाससी

२७५

दा.खो.
२७४

शुभे। अथ दशावतारदानं। विश्वामित्रः। दानानामुत्तमं दानं हैमं विष्णोः स्वरूपकं। तस्मात्पुण्यार्थिना देया है
मा विष्णोः स्वरूपकाः। मत्स्यः। कूर्मोथ वाराहो नारसिंहोथ वामनः। रामो रामश्च कृष्णश्च बुध कल्की च ते दश। वा
मे शंकं गदां दक्षे बिभ्रद्धैमत्स्वरूपधृक्। नरो हि मत्स्यरूपी वा मत्स्यरूपि जनार्दनः। एतदेव कूर्मललणं। मधुपिं
गलवर्णं च चतुर्बाकायुधैर्युतं। नरांगं सूकरास्यं च मनाक्पीतं सुभाषणं। श्रीवामकूर्परस्थात्तु धरा नंतोपद
नुगौ। एतद्रूपधरं देवं वाराहं भुक्तिमुक्तिदं। ज्वलदग्निसमाकारं सिंहवक्त्रं नरांगकं। दंष्ट्राकरालवदनं ललज्जि
ह्वं सुभीषणं। रक्ताक्षं जटिलं कुंडं आलीढं पीनवक्षसं। अभेद्यतीक्ष्णनखरं वामोरुस्थदानवं। तद्वक्षो दारयं
तं च कराभ्यां नखरैर्भृशं। गदाचक्रधरं वाभ्यां नरसिंहं जगत्प्रभुं। दंडी छत्रधरो द्विभुजो वामनः परिकीर्तितः। क्ष
त्रांतकारणं घोरं दृढहन्नपरशुं करे। जामदग्न्यः प्रकर्तव्यो रामो रोषारुणेक्षणः। युवा प्रसन्नवदनः सिंहस्कं
धो महाबलः। आजानुबाहुः कर्तव्यो रामो वाहुधनुर्द्धरः। पद्मासनस्थो द्विभुजो ध्यायी बुद्धः प्रकीर्तितः। खड्गो

२७४

घातकरः कुद्धेहयारूढोमहाबलः। म्लेछोछेदकरः कल्की द्विभुजः परिकीर्तितः। यथाशक्त्या प्रकुर्वीतसु
वर्णेनविजानतासमेनषोडशेनैवसमान्येतान्निकारयेत्। संपूज्य नामभिस्तैस्तैःपुष्पधूपनिवेदनैः। भक्ति
नम्रः प्रणामंतेनिवेद्यश्रद्धयाततः। आहूयब्राह्मणान्राजन्पादौप्रक्षाल्ययत्नतः। उपवेश्यासनेसर्वाश्चं
दनेनाविलेपयेत्। सुगंधैः कुसुमैश्चैवधूपदीपैस्तथैवच। आछाद्यवस्त्रयुग्मैस्तुग्रहणेचंद्रसूर्ययोः। ग्राह
कान्विष्णुरूपांस्तु अर्हयेतविमत्सरः। एकैकंदेवरूपंतमेकैकस्यसमर्पयेत्। अथवाविदुषेसर्वान्दद्यात्संपू
ज्यमानवः। देवरूपंमयाविप्रकारितंकांचनंशुभं। तद्ब्राह्मणप्रदानेनप्रीयतांविश्वरूपधृक्। एतदुच्चार्यविप्र
स्यहस्तेतोयंक्षिपेत्स्वयं। प्रदक्षिणंततोदद्यात्संपूज्यप्रविशेद्गृहं। अथद्वादशादित्यदानं। ब्रह्मांडे। शृणुनारद
भद्रंतेदानमादित्यसंज्ञितं। यथोक्तंलोकगुरुणाविष्णुनाप्रभविष्णुना। कृतुः पापहरंपुण्यमायुष्यंश्रीकरंशु
भं। आरोग्यंसर्वमांगल्यंदुःस्वप्नाद्भुतनाशनंसर्वशांतिकरंह्येतत्सर्वसिद्धिफलप्रदं। विषुवत्सयनेराहुग्रह

यो चंद्रसूर्ययोः। जन्मर्क्षे सौरवारे च पंचदश्यर्कसंगमे। सप्तम्यां वाथ सावित्रे नक्षत्रेऽद्भुतदर्शने। दुःस्वप्न
दर्शने कुर्याद्व्रतमादित्यसंज्ञितं। देवालये नदीतीरे तडागे वरुणालये। अन्येषु पुण्यदेशेषु देवदानं समाच
रेत्। आलिख्य वै द्वादशारं हस्तदैर्घ्यं क्षितिं यथा गोमयसंयुताभिः। तस्मिन्सितैस्तंदुलपुंजकैश्च विस्तारये
द्द्वादश पंकजानि। प्रादेशमात्राणि शुभान्वितानि सकर्णिकान्यष्टदलेषु तेषु हिरण्यरूपाणि रवेर्विधाय य
थाक्रमादुत्तरतोपवर्गः। तेषां लक्षणं प्रागुक्तं प्रत्यङ्मुखान्प्राङ्मुख एव देवांस्तद्धूपगंधादिभिरर्चयित्वा॥
दद्यादपूपं सघृतं गुडाढ्यं वस्त्रैस्तथा वेष्ट्य यथाक्रमेण प्रत्येकमेकद्विजपुंगवाय आरभ्य गंधादिभिरादरे
णसंप्रीयतामिस्तथ चक्रमेण प्रत्येकमुच्चार्य तदीयनाम। धाता च मित्रश्च ततः परेण मार्तंडनामा च यथा
र्यमा च। शक्रश्च देवो वरुणस्तथा सौ भगो विवस्वान्नवमस्तथैषां। आदित्यनामा सविता तथान्यस्त्वष्टा त
थैकादशमश्च तेषां। विष्णुस्तथा द्वादशमश्च मंत्रैराराधयेद्देववरान्द्विजांश्च। अथ मरुद्व्रतं। व्रतखंडे। अथा

तः संप्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः। यद्यत्काममयते दाता तत्तत्फलमुपाश्नुते। पुण्यकालेषु सर्वेषु जन्मर्क्षे
षु विशेषतः। पुण्यदेशेषु सर्वेषु गृहे वा दानमाचरेत्। देवा एकोनपंचाशद्देवेंद्रसमतेजसः। भ्रातरः पुरु
हूतस्य मरुतः सूर्यवर्चसः। किरीटहारकेयूरकटकादिविभूषिताः। खड्गचर्मधरा नित्यं शक्रस्यानुचराः स
दा। तेषां तु प्रतिरूपाणि जातरूपेण कारयेत्। तेषां दानादितत्सर्वं विप्रेणैव समाचरेत्। शुचौ देशे समां भूमिं
लिप्य गोमयवारिणा। दक्षिणोत्तरतो विद्याल्लेख्याः षट् तत्र ताः समाः। प्रागेकादशरेखाः स्युः पंचाशत्कोष्ठ
मुच्यते। चतुरस्राः समाः सर्वे हस्तत्रितयसम्मिता। कोष्ठे मध्यमवीथ्यां वै षष्ठे वोत्तरतः स्थितं। इंद्रमास
नमिंदुत्वाभ्यंतरे मरुतस्तथा। कोष्ठेषु सर्वेषु सरोरुहाणि कृत्वा सिते तंडुलमंडलेषु। पद्मानि देवासनमार
भेत संस्थापयेत्तेषु यथाक्रमेण। अत्र दक्षिणोत्तरायतं रेखाषट्कमालिख्य पूर्वपश्चिमायिताभिरेकादश
रेखाभिः पंचाशत्कोष्ठनिष्पत्तिः स्यात्। तत्र मध्यमावीथ्यां उत्तरतः षष्ठे कोष्ठके इंद्रासनं अवशिष्टकोष्ठ

दा॰ प्रो॰ काः मरुतामासनं। मरुन्नामानि। वायुपुराणे। ततस्तेषांतुनामानिमातापित्रोमबबन्धतु। षड्विधैः कर्म
२७६ भिश्चैवमरुतां तौ पृथक्पृथक्। शुक्रज्योतिस्तथादित्यः सत्यज्योतिस्तथापरः। चित्रज्योतिश्चज्योतिष्मा
नयंहास्कृतपास्तथा। प्रथमोयंगणाप्रोक्तो द्वितीयंतुनिबोधत। ऋतजित्सत्यजिच्चैवसुषेणः सेनजित्तथा।
अंतिमित्रोह्यमित्रश्चदूरेमित्रस्तथापरः। गणएषद्वितीयस्तुतृतीयंतुनिबोधत। ऋतः सत्योध्रुवोधर्ता
विधर्ताचविधारयः। धरुणश्चतृतीयेच्च चतुर्थंमेनिबोधत ध्वांतश्चधुनिश्चैवउग्रोभीमस्तथैवच। अभि
युक्तोक्षिपश्चैवसासह्वाश्चगणास्मृतः। ईदृक्षैवतथान्यादृक्सदृक्प्रतिसदृक्तथामितश्चसंमितश्चैवस
भराश्चतथागणः। ईदृक्षा पुरुषश्चैवजन्यादृक्षासएतनो संमिताः समदृक्षासः प्रतिदृक्षाचवैगणः। म
रुतैंद्रससरस्तथादेवविशोपरः। यज्ञश्चैवानुवर्त्मानस्तथान्योमानुषीविशः। दैत्यदेवाः समाख्याताः सप्त २७६
तैसप्तकागणाः। एतेह्येकोनपंचाशन्मरुतोनामतः स्थिता इति। प्रागादिपूर्वोत्तरमत्रचैवसर्वाणिकृत्वा

नित्वकारयित्वा। वस्त्रैरथावेष्ट्य कुशोदकैश्च संप्रोक्ष्य तल्लिंगसुतैर्यजुर्भिः॥ मध्ये महेंद्रं त्रिगुणेन हेम्ना च
क्रायुधः शक्तिधरः किरीटी। हारादिकेयूरविभूषितांगो देवाधिपो लोकपतिः प्रशांतः॥ कार्योऽस्य ध्याह
यौ। मासे शुभे पुण्यकाले प्रदाता स्नात्वा ततः तिलमिश्रैः कुशोदकैः॥ प्रदक्षिणं पुष्पगृहीतहस्तः कृत्वा
नु विप्रैः सहैव सर्वान् प्रणम्य पुष्पांजलिना च सर्वं प्रदापये देवगणं क्रमेण। प्रत्येकमेकेद्विजपुंगवानां
प्रणम्य मंत्रं समुदाहरेद्वै। शृणोमि देवं मुरुतां नतं तथैकं माय प्रभो देव कुरु प्रसादं। तव प्रसादादघनाशनं मे स्व
र्णरूप त्वं सदामरेश। इत्येवमुक्त्वा महतः प्रदाय ततो महेंद्रं प्रददे च देवं। यः कारयेद्विप्रवरस्तु तस्मै स्वस्ती
ति विप्रांश्चतुरो निधाय। ततः संपूज्य गुरवे दक्षिणां च यथोचितां। स्वस्तिवाचकविप्राणां दक्षिणां च यथाह
तः॥ त्रैलोक्यनाथो जगतामधीशो देवाधिपो दैत्यगणाग्निहंता। श्रेयांसि मह्यं प्रददातु देवाग्रजो वज्रधरः
प्रशांतः॥ इत्युच्चार्य ततो दद्याद्देवं वज्रधरं हरिं। पूजायामपि शक्रस्य मंत्र एषः प्रकीर्तितः॥ य एवं कुरुते

277

दा॰ द्यो॰ दानंमहत्तांविधिपूर्वकं। ससर्वकालसंपन्नोदेववद्दिविमोदते। यथोक्तंब्रह्मणाचेदंनारदायमहर्षये। त
२७१ थातथापिवासवेयोक्तंवैमुनिसत्तमाः। अथचंद्रादित्यदानं। विष्णुधर्मोत्तरे। चंद्रादित्यौतुदातव्योसरूपसौवर्ण
उच्यते। शुद्धस्परजतस्यैवमंडलंहिमवत्विषः। द्वादशांगुलहस्तंतुउभयोरपिमंडलं। वृत्तौपद्मसमाकारौम
ध्येचैवतुकर्णिका। भानुंताम्रमयेपात्रेघृतपूर्णेतुनिक्षिपेत्। सोमशंखेक्षीरपूर्णेतुपरिस्थापयेद्बुधं। अर्च्यं
तुरक्तकुसुमैःसोमंशुक्लैस्तथैवच। आदित्यायसुगंधिंचधूपंचप्रतिपादयेत्। सोमस्यगुग्गुलुंदेयोगंधः
शुक्लस्तथैवच। कुंकुमंतुपतंगायदीपंचैवघृतेनतु। एवंसंपूज्ययत्नेनचंद्रादित्यौपृथक्कृतौ। अमृतपूर्तये
सोमंनमोंतेनैवपूजयेत्। आहूयब्राह्मणंभक्त्यावेदवेदांगपारगं। कुटुंबिनंदरिद्रंवाआहिताग्निंतथैवच।
रक्तेनवाससाछाद्यकुंकुमेनाविलेपयेत्। संपूज्यधूपदीपैश्चद्विजंसूर्यमिवापरं। समर्पयेद्ब्राह्मणाय २७१
मंत्रेणानेनभूमिपः। रुक्मंचपुरुषंचैवपर्णपुष्करमेवच। त्रयीविद्याचसांगातुयस्यांगेविश्वरूपिता

समोदियाक्ररोदेवः प्रीयतां विप्र माचिरं । एवमुच्चार्य भाजं तु ब्राह्मणाय निवेदयेत् । क्षीरखंडं स्वस्ति तं देवं द्वि
जराजं तथैव च । अमृतमूर्त्तिं शीतांशुं ददामि ते द्विजोत्तम । गायत्र्यैव तु सूर्यस्य अर्हणं जायते विभो । सोमंत
रलमंदीति शुचिः शुद्धेन चेतसा । एवं चंद्ररविं दत्वा वलीराज्यमवाप्नुह् । अथ कालपुरुषदानं । भविष्योत्तरे । पु
मान् कृष्णतिलैः कार्यो रौप्यदंतः सुवर्णदृक् । खड्गोद्यतकरो दीर्घो जपाकुसुमकुंडलः । रक्तांबरधरः स्रग्वी शं
खमालाविभूषणः । तीक्ष्णासिपुत्रीवंधेन विस्फारितकटीतटः । उपानद्युगयुक्तांघ्रिः कृष्णकंबलपार्श्वकः ।
गृहीतमांसपिंडश्च वामे करतले तथा । एवंविधः पुमान् कृत्वा गृहीतकुसुमांजलिः । संपूज्य गंधपुष्पाद्यैर्नैवेद्यं
च निवेदयेत् । यजमानप्रसन्नात्मा इमं मंत्रमुदीरयेत् । सर्वं कलयसे यस्मात्कालस्त्वं तेन चोच्यते । ब्रह्मविष्णुशि
वादीनां त्वमसाध्योसि सुव्रत । पूजितस्त्वं मया भक्त्या प्रार्थितश्च यथासुखं । यद्युज्यवेत तव विभो तत्कुरुष्व न
मो नमः । एवं संपूजयित्वा तं ब्राह्मणाय निवेदयेत् । दक्षिणां भक्तितो दद्यात्प्रणिपत्य विसर्जयेत् । अत्र द

२७८

क्षिणा॥ ज्ञेयं निष्कशतं पार्थ दानेषु विधिरुत्तमः॥ मध्यमस्तु तदर्द्धेन तदर्धेनाधरः स्मृतः॥ अशक्तस्यापि कु
सोयं पंच सौवर्णिको विधिः॥ अथोप्यल्पेन यो दद्यान्महादानेनरोत्तमः॥ प्रतिगृह्णाति यास्तस्य दुःखशोक
भयापहम्मिलुक्ता। अनेन विधिना यस्तु दानमेतत्प्रयच्छति॥ नापमृत्युभयं तस्य न च व्याधिकृतं भवेत्॥ भ
वत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः॥ देहांते सूर्यभवनं भित्वा याति परं पदं॥ पुण्यक्षयादिहागत्य राजा भव
ति धार्मिकः॥ माघ्यां चतुर्दश्यां चतुर्थ्यां भद्रायां वा देशकालौ संकीर्त्य ममापमृत्युव्याधिभयनाशाव्याहतैश्व
र्यसूर्यभवनभेदपूर्वकपरमपदस्थितिसुतरजन्मांतरावछिन्नधार्मिकराजत्वभवनकामः कालपुरुषदानं
करिष्य इति संकल्प्य गणेशं संपूज्य ब्राह्मणं वृत्वा वासोभूषणादिभिः संपूज्य कालपुरुषं नाममंत्रेण संपू
ज्य पुनः फलपुष्पचर्यैरिमं कालपुरुषं द्रोणाधिकपरिमाणकृष्णतिलनिर्मितं मद्दूरखड्गकरं जपानिर्मितकुंडलं
रक्तांबरं शंखमालं छुरिकटिं सोपानत्कपादं कृष्णकंबलपार्श्वकं वामकरगृहीतमांसपिंडं तुम्ब्यं संप्रददे॥ ततः

कृतस्यकालपुरुषदानस्यप्रतिष्ठाप्यमुक्तंनिष्कशतान्यतमांदक्षिणांदद्यात्इति। अथपापपुरुषदानं।
स्कांदे। अज्ञानात्ज्ञानतोवापियत्पापंकुरुतेनरः। पापपुरुषदानेनमुच्यतेनात्रसंशयः। मन्वादिदिवसेप्राप्तेच
दासर्यदिनंभवेत्। तदास्यमूर्तिःकर्तव्याहैमीविप्रायतुष्टये। अत्रार्थिकंमानमितिमदनरत्नादयः। पला
धिकंसहस्रपलावधिकमितिकल्पतरुः। तुलापुरुषवत्कार्यःकुंडमंडपयोर्विधिः। परंहोमःप्रकर्तव्यो
गायत्र्याकेवलंनृप। तुलापुरुषवादेलनेनेकाग्निपक्षःकूटपक्षश्चोक्तः। गायत्र्येतिसूर्यएवदेवता। अन्य
होमबाधःकेवलमित्यनेन। संस्थाप्यपंचगव्येनततःस्नातोपिपूजयेत्। पंचविंशतिसंख्याभिःश्वेतपुष्पैर्न
राधिप। संस्थाप्येत्यस्यप्रतिमामित्यादिः। स्नात्वेतिअधिवासनोत्तरंप्रातरभिषिक्तइत्यर्थः। ॐपृथिव्यैन
मः जलायतेजसे। वायवे। आकाशाय। श्रोत्रायत्वचे। चक्षुषेजिह्वायै। घ्राणाय। शब्दायास्पर्शाय। रूपाय।
रसाय। गंधाय। वाचे। पाणिभ्यां। पादाभ्यां। पायवे। उपस्थाय। मनसे। बुद्ध्यै। अहंकाराय। आत्मनेपरमा

स्नेद्वति। एवंसंपूज्यराजेंद्रकर्पूरंदीपमाचरेत्। धूरसीतिचधूपंच। अग्निर्ज्योतीतीतिदीपकं। युवासुवासेति
ततोवाससीपरिधापयेत्। ततोब्राह्मणमानीयवेदवेदांगपारगं। आचार्यंपूजयित्वेत्यर्थ इतिकेचित्। प्रतिग्र
हकोऽन्यआचार्यादिभ्यः पारितोषिकीदक्षिणेत्यन्ये। प्रक्षाल्यचरणौतस्यवस्त्रादिपरिधापयेत्। केयूरैः क
टकैश्चैवअंगुलीयकभूषणैः। भूषयित्वातनुंतस्यततोमूर्त्तिंसमानयेत्। स्पर्शेदित्यर्थः। मंत्रेणातेनराजेंद्र
ततस्तस्मैनिवेदयेत्। एषआत्मामयादत्तस्तुभ्यंहेममयोद्विज। यत्किंचिद्दिहितपूर्वंपापंनाशयमेखिलं। तत
स्तुब्राह्मणोमंत्रमिमंराजन्समुच्चरेत्। यदेतद्दिहितंपापंत्वयापूर्वंमयाहितत्। गृहीतंमूर्त्तिरूपंतेजातस्त्वं
पापवर्जितः। एवंकृतेततस्तस्मैदत्वाचाप्यथदक्षिणां। यथातुष्टिंसमभ्येतिततः पापाज्जयत्यसौ। एकजन्मकृ
तंपापंनिजकोपेननिर्मितां। शिवालयेतदेवास्यसहस्त्रगुणितंहरेत्। अत्रैकजन्मकृतज्ञाताज्ञातसकलपातक
क्षयकामकृतिसंकल्पः। शेषंस्पष्टं॥ अथात्मप्रकृतिदानं। भविष्ये। हैमींप्रतिकृतिंरम्यांकारयित्वाततोनृप।

ऽ॰भ॰। लोकसहितां सर्वोपस्करसंयुतां अभीष्टलोकाः स्कंदभार्यादिः। नेत्रपटपट्टीवस्त्रैश्छादितां स्वग्वि
भूषणैः कुंकुमेनानुलिप्तांगीं कर्पूरागरुवासितां। स्त्रीवेद्ददाति शयने शायीतां कारयेत्स्वयं। यद्यदिष्टतमं किं
चित्तत्सर्वं पार्श्वतो न्यसेत्। उपकारकरं स्त्रीणां उरुषाणां च यद्भवेत्। तत्सर्वं स्थापयेत्पार्श्वे स्वयं संचिंत्य चेत
सी। एतत्सर्वं स्थापयित्वा स्वे स्वे स्थाने नियोजयेत्। गुर्वीत्विजां होमादिकर्तुमाज्ञापयेदित्यर्थः। पूजयित्वा लो
कपालान्ग्रहान्देवी विनायकं। राज्ञो होम इति केचित्। तुलापुरुषवदित्यत्रके हैमप्रामावौ पदेशिक्यां सत्या
पिनाधिवासनमित्यन्ये। ततः शुक्लांबरः स्नात्वा गृहीतकुसुमांजलिः। इममुच्चारयेन्मंत्रं विप्रस्य पुरतः स्थितः
१ आ॰ ल॰ गः प्रतिमा चेयं सर्वोपकरणैर्युता। सर्वरत्नसमायुक्ता तुभ्यं विप्र निवेदिता। आत्मा शंभुः शिवः शौरिः
शाङ्करी वरुणो युतः। तस्माद्दानप्रदानेन मम चास्मात्प्रसीदतु। इत्युच्चार्य ततो दद्यात् ब्राह्मणाय युधिष्ठिर। ब्रा
ह्मणश्चाथ गृह्णाति कोदादिति च कीर्तयेत्। ततः प्रदक्षिणीकृत्य ब्राह्मणं तं विसर्जयेत्। सार्धं वर्षशतं भव्यं

284

दा·पो·
२९०

सर्वलोकैःस्तरैर्वृतः।अ - ष्टकलदानेनसोभीष्टफलभाग्भवेत्।पचैवोत्पद्यतेजंतुःप्राप्तकर्मक्षयःक्षणं।त
त्रैवसर्वकामानांफलभोक्ताभवेन्नृपः।इष्टैर्वंधुजनैःसार्द्धंनवियोगःकथंचन।प्राप्नोतिपुरुषोराजन्स्वर्गे
नानंत्यमश्नुते।अथकालचक्रदानं।मृत्युंजये।चक्रंरूप्यमयंकृत्वामुक्तारश्मिमयात्मकांकृत्वामूर्द्धिश
खंद्रंरश्मिमाभ्यंतरास्थितं।तमांस्यनेकरूपाणिगात्रेषुचसमंततः।एवंध्यानवतस्तस्यसचेद्दःकृत्स्नतांव्र
जेत्।ततोप्यनंतरंपश्चात्स्थित्वाविप्रःप्रदक्षिणं।तंगृहीत्वाव्रजेद्वत्तेअदृष्टत्वमपिव्रजेत्।स्वयंचामृतसंघा
तपूर्णकायइतिस्थितः।इमंतंराजतेंचंद्ररश्मिजालसमाकुलं।अपमृत्युविनाशायददामीतिसमुच्चरेत्।स
वर्णदक्षिणायुक्तंब्राह्मणायनिवेदयेत्।ततोगृह्योक्तविधिनास्थापयेज्जातवेदसं।जुहुयात्कालनाम्नातु
शतमष्टोत्तरंतिलैः।ततस्तुभोजयेद्भक्त्याविप्रान्द्वादशसंख्यकान्।स्वयमक्षारलवणंभुंजीतसकृदेवहि।ए
वंकृतेनरोनूनंचिरंजीवेन्नसंशयः।तथाकृतेविनश्येतअपमृत्युर्नसंशयः।मीमांसैकधुरंधरःश्रुतिध २९

रोन्यायेपिवागीश्वरः साहित्यामृतसागरः सज्जनतावल्लीरसालद्रुमः । यं विद्वन्मणिशेखरो दिनकरः प्रासूत वि
श्वेश्वरं तेनाकारि समस्तदेवददतौ दानेऽधियापद्धतिः । शास्त्रपणं स्वकृतिकुचिकवागभीरमुद्घाटयन् दिन
करः सुषुवेयमेषः । विश्वेश्वरः सकलदैवतरूपदाने कृत्वाथ पात्रददतौ विधिमातनोति । हेमाद्रौ स्कांदे । भाज
नं पश्चमच्छेतविप्रेभ्यो भाजनं शुभं । सगंधर्वपदं प्राप्य उर्वश्या सह मोदते । ताम्रं यो भाजनं दद्यात् ब्राह्मणेभ्यो
विशेषतः । स भवेद्यक्षराजस्य मंडुवैलसमन्वितः । क्षेमप्रकाशे । प्रथमं तिलपात्रं स्यादाज्यपात्रं द्वितीयकं ।
लवणं च तृतीयं स्याच्चतुर्थं शर्करान्वितं । पंचमं क्षीरपात्रं स्याद्दधिषष्ठमुदाहृतं । सप्तमं गुडपात्रं च व्रीहिपात्रं
ततः परं । नवमं रसपात्रं च नवनीतमथापि वा । एकादशं वारिपात्रं फलपात्रमतः परं । त्रयोदशं तैलपात्रं
मधुपात्रमतः परं । रत्नपात्रं ततः पात्रं संख्ययादशपंचमं । वाराहेतुकार्पासपात्रं षोडशमिक्षुकं । पात्रमा
नं मदनरत्ने । उत्तमं पलषष्टिश्च चत्वारिंशत्तु मध्यमं । द्वाविंशदधमं पात्रं तत्पात्रं चायसं स्मृतं । अयो धातु

281

मात्रं। वाराहे। कृत्वाताम्रमयंपात्रंयथाविभवविस्तरं।उमयासहितंशंभुंहरींसश्रीकमेववाकृत्वातुकांच
नींमूर्तिंसंपूज्यावाहनादिभिः॥विप्रस्यवारणंकुर्याद्वस्त्रभूषानुलेपनैः।ततःप्रतिष्ठयेत्पात्रंस्वैस्वैर्मंत्रैश्चपू
जयेत्।पश्चाद्विप्रायदातव्यंसुवर्णैकेनसमन्वितं।प्रतिमांब्राह्मणेदद्यात्पात्रंभक्तेविपश्चितः॥एवंदत्वा
तुराजासोसप्तजन्मांतरेभवेत्।सुभगोदर्शनीयश्चनारीवापुरुषोपिवा।आत्मानंसकलंवंशंनयेत्ब्रह्मणों
तिकं।अत्रचषोडशपात्राण्येकदैवसंस्थाप्यसर्वान्मंत्रान्पठित्वाब्राह्मणेभ्योदद्यात्।शक्त्याद्वित्राण्येकंवा
पात्रंसंस्थाप्यदद्यादितिवा।पात्राणिषोडशादायब्राह्मणायनिवेदयेत्।षोडश।षोडशस्यार्द्धमर्द्धंवादद्या
दल्पफलेपिवेतिमदनरत्नेवाराहात्।सर्वपात्रेषुसकलपापक्षयपूर्वकात्मसकलवंशब्रह्मसमीपनयनो
त्तरसप्तजन्मावच्छिन्नसुभगदर्शनीयराजत्वदर्शनीपुराजत्वभवनकामसकलपापक्षयपूर्वकात्मसकल
वंशब्रह्मसमीपनयनोत्तरसप्तजन्मावच्छिन्नसुभगदर्शनीयराजत्वभवनकामसकलपापक्षयपूर्वकविष्णु

लोकप्राप्तिकाम इतिवा संकल्पः। सर्वपात्रेषु विष्णुर्दैवता। यथाशक्तिसुवर्णं दक्षिणा। यद्वा मम स्तिलपा
त्रे। आज्यपात्रे वह्निः। लवणपात्रे सिंधुः शर्कराक्षीरपात्रेषु चंद्रः। गुडपात्रेऽग्निः। व्रीहिपात्रे प्रजापपतिः। र
सपात्रेऽग्निः। जलपात्र इंद्रो वरुणो वा। फलपात्रे ब्रह्मा। तैलपात्रे पर्जन्यः। मधुपात्रे वनस्पतिः। रत्नपात्रे समुद्रः।
अथ क्रमेण मंत्राः। देवदेव जगन्नाथ वांछितार्थफलप्रद। तिलपात्रप्रदानेन शांतिर्भवतु मे सदा। आज्यं तेजः
समुद्भूतमाज्यं पापहरं स्मृतं। आज्यं देवानामहार आज्ये देवाः प्रतिष्ठिताः। लवणे वै रसाः सर्वे लवणे सर्वदेवताः
। तदधीनानि चान्नानि रसाः स्वादुयुतः सदा। तस्माल्लवणदानेन समृद्धिर्मेस्तु सर्वदा। दर्पे कार्मुकसंभूता रस
स्यार्थे विनिर्मिता। देहस्थपापनाशाय शर्करा पुष्टिदा स्मृता। तस्मादस्याः प्रदानेन मम संतु मनोरथाः। क्षीरा
दमृतसंभूतिः क्षीराज्जातः कलानिधिः। क्षीरात्क्षीरोदकीकिर्तिः क्षीरे विश्वस्य संभवः। क्षीरपात्रप्रदानेन
मम संतु मनोरथाः। पवित्रं मंगलं चैव ह्ठं देंडु धवलं दधि सर्वमंगलदं यस्मादतः शांतिं प्रयच्छ मे। मया तदंडक

यातैर्नवनीतं ततोद्धृतं। तस्य दानाच्छरीरं मे प्रातास्तु व्रतमुत्तमं। नवनीतं पवित्रं हि सदा गोषु व्यवस्थितं। तस्मात्तत्पात्रदानेन मम शांतिर्भवेदिह। सहेमक्षीरमाध्वीकं सर्वपुष्परसैर्युतं। सौभाग्यदं भवास्माकमतः शांतिं प्रयछमे। रत्नानि सर्वदेवानां भूषणानि स्त्रियामपि। रत्नपात्रप्रदानेन समृद्धिर्मेस्तु सर्वदा। अथ महातिलताम्रपात्रदानं। विष्णुः। ताम्रपात्रे तिलान् कृत्वा पलषोडशकल्पिते। सहिरण्यं स्वशक्त्या च विप्राय प्रतिपादयेत्। नाशये त्रिविधं पापं वाङ्मनःकायसंभवं। तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं। ताम्रपात्रं दशपलं जघन्यं परिकीर्तितं। द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तमं स्मृतं। स्वर्णमेकं जघन्ये तु द्विगुणं मध्यमे क्षिपेत्। त्रिगुणं चोत्तमे तद्वत्स्वर्णं परिकीर्तितं। सुवर्णदक्षिणां दत्वा सर्वपापक्षयो भवेत्। अथ तिलकांस्यपात्रं। शुद्धकांस्यस्य पात्रस्य प्रमाणं पंचविंशतिः पलानामत्र निर्दिष्टं तिलानां प्रस्थसप्तकं। गोमयेनाथ संलिप्य गृहमध्ये च सर्वतः लिखेत्पद्मं द्वादशारं कुंकुमेनाथ चंदनैः। ततो वह्निस्थापयित्वा होमं कुर्याद्यवैस्तिलैः। तत्र पात्रं प्रतिष्ठाप्य प

जपेद्भक्तिसंयुतः॥ गंधचंदनपुष्पादिधूपदीपैश्च शोभितं। पादौ प्रक्षाल्य विधिवन्मातृश्राद्धं समाचरेत्॥ त
त्र संरञ्जयेद्विप्रं पुष्पधूपविलेपनैः॥ वस्त्राणि परिधाप्यो सौसुभव्यानि मृदूनि च। जीवंतीभूषयैद्वस्त्रैर्भोज्यै
रपि विभूषणैः॥ अमावास्या यथा दत्ता पितॄणां च मया पुरा। तथा माघी मया दत्ता मातॄणां नात्र संशयः॥ दत्तं अन्नं
डुतस्मान्नं विधिवत्तर्पणं कृतं। तदक्षय्यफलं सर्वं जायते मुक्तिरेव च। विप्रं संपूजयित्वा च तस्मात्त्वं तस्य दा
पयेत्। प्रणम्य विधिवद्भक्त्या मंत्रमेतमुदीरयेत्। कांस्यपात्रं मया दत्तं मातुरानृण्यकांक्षया। भगवन्वचना
त्तुभ्यं यथा मुक्तिस्तथा वद। दशमासांश्च उदरे जनन्या संस्थितस्य मो क्लेशिता बालभावे च स्तनपानैर्द्विजो
त्तम। नलमूत्रादिसंलेपलिप्ता पश्चकृता मया। भवतो वचनादस्या मम मुक्तिर्भवेदृणात्। कांस्यपात्रं सुवर्णं च
तिलवस्त्रादिदक्षिणां। सप्तधान्यं मया दत्तं। मया मुक्तिर्भवेदृणात्। कांस्यपात्रप्रदानेन तत्क्षणान्नशरीरके। त
थाहेमप्रदानेन परमात्मानमव्ययं। आच्छादनं तु त्रलोंडेगुह्यमेतत्सनातनं। विप्राच्छादनदानेन परमात्मा मु

पूजितः॥ तिलसंख्याकृतं दुःखं जनन्मामम सेवितं। तिलदानप्रभावेन कृते मुक्तो भवाम्यहं। एवमुक्त्वा ततः
पात्रं प्रदद्याद्ब्राह्मणाय वै। ब्राह्मणेन ततो वाच्यं जननीसंभवादृणात्। मुक्तस्त्वं पात्रदानेन महेश्वरवचो यथा। द
त्वा विप्रस्य पात्रं तु होमं कुर्यात्प्रयत्नतः। सोपस्करं सतांबूलं क्षमाप्यनुविसर्जयेत्। अन्येषामपि विप्राणां भोजना
दि प्रदापयेत्। अथ भांडदानं॥ तानि च स्वर्णराजतताम्रकांस्यलोहदारुवंशमृन्मयानि। हेमाद्रौ लैंगे। स्वर्णरौ
प्यमयं भांडं देवतार्थे ददाति यः। कुबेरलोकमासाद्य मोदते बहुवत्सरान्। ताम्रायसानां भांडानां दाता यक्षाधि
पो भवेत्। हरिभक्तिविलासे। देवस्रोभोपयोग्यानि शिल्पभांडानि यो नरः। दद्याद्वाद्यभांडानि गणेशत्वमवा
प्नुयात्। वारिधानीं तथा दत्वा वारुणं लोकमश्नुते। कमंडलुप्रदानेन यन्यस्य फलमाप्नुयात्। माल्याधारं तथा
दत्वा धूपाधारं तथैव तु। गंधाधारं तथा पात्रं कामानां पात्रतां व्रजेत्। समुद्रजानि पात्राणि दत्वा वै तैजसानि
च। पात्रं भवति कामानां विद्यानां च धनस्य च। मंत्रउक्ताः। अथ स्थालीदानं। भविष्योत्तरे। कृत्वा ताम्रमयीं

स्थालीपलानांपंचाभिःशतैः॥ अशक्तस्तुतदर्धेनचतुर्थांशेनवापुनः॥ सर्वशक्तिविहीनस्तुमन्मयीम
पिकारयेत्॥ सुगंभीरोदरहरीदृढदंडकडछकां॥ कडछकोदर्वी॥ मृदुतंडुलनिष्पन्नकृत्रक्षीरेणपूरितां॥ पवि
सपूर्णामित्यर्थः॥ उपदंशोदकघृतांमतपात्रसमन्वितां॥ स्थाप्यमंडलकेवस्त्रैःपुष्पधूपैरथार्चयेत्॥ आदि
त्यवारेसंक्रांतौचतुर्दश्यष्टमीषुच॥ एकादश्यांतत्तीयायांविप्रायप्रतिपादयेत्॥ मंत्रः॥ ज्वलनेसतिपार्श्वस्थै
स्तंडुलैःसजलैरपि॥ नतावद्भोज्यसंसिद्धिर्भूतानांपिठरींविना॥ त्वंसिद्धिःसिद्धिकामानांत्वंपुष्टिःपुष्टिमिच्छतां॥
अतस्त्वांप्राणतोयाचेसत्यंकुरुवचोमम॥ ज्ञातिबंधुसुहृद्वर्गविप्रेषुस्वजनेतथा॥ अभुक्तवस्तुनाश्नीयांतथा
भववरप्रदा॥ इत्युच्चार्यप्रदातव्याहंडिकाद्विजपुंगवे॥ स्थालीविशालवदनांसंकडछकांचयच्छंतियेमधुरश्रु
च्चवर्तींद्विजेभ्यः॥ तेषांसुहृत्स्वजनविप्रजनेनभोज्यंसंभुज्यमानमपिकृत्स्नतयाविनाशं॥ अथापाकदानं॥ भावि
ष्योत्तरे॥ आपाकाख्यंमहादानंकथयामियुधिष्ठिर॥ गृहतारावलंबुध्वाकुंभकारंचपूजयेत्॥ वासोभिर्भूषणैश्चै

वपुष्यैश्चागरूचंदनैः। ब्रूयात्तथेदं सामान्यं यथात्तुष्टोभिजायते। त्वं मे भांडानि चित्राणि गुरूणी च लघूनि च। आम
णिकारीनि शुभ्राणि स्थाल्यश्च सुमनोहराः। घटकान्करकांश्चैव प्रणीताः कुंडकानि चाशरावादीनि पात्राणि
भांडान्युच्चावचानि। एवमन्यच्च यत्किंचिदुपभोग्यं भवेद्गृहे। संपादय महाभाग विश्वकर्मा त्वमेव हि। भार्गवोपि प्र
यत्नेन भांडौघैरन्वितं शुभं। आपाकं कल्पयेदेवं विधिदृष्टेन कर्मणा। सहस्रमेकं भांडानां स्थापयित्वा विचक्षणः।
संध्याकाले मथित्वा तु दत्वा चापि हुताशनं। रात्रौ जागरणं कुर्यात् गीतमंगलनिःस्वनैः। ततः प्रभाते विमले ज्ञात्वा
निर्वापितं शनैः। रक्तवस्त्रैः समाच्छाद्य पुष्पमालाभिरर्चयेत्। यजमान ततः स्नात्वा शुक्लांबरधरः शुचिः। हेम
रौप्याणि भांडानि ताम्रलोहमयानि च। परितः स्थापयित्वा च स्वशक्त्या तानि षोडश॥ तानि चत्वारि चत्वारि न्यसेत्स
र्वादिदिक्क्रमात्। पूजयित्वा प्रयत्नेन कृत्वा चापि प्रयत्नतः। नार्यश्चाविधवास्तत्र समानीय प्रपूजयेत्। प्रदक्षि
णां ततः कृत्वा मंत्रमेतमुदीरयेत्। आपाकब्रह्मरूपोसि भांडानी — — — — — प्रजानां ते प्रजापुष्टिः स्वर्गश्चास्तुमम

माक्षयः।भांडानियानियान्यत्रकल्पितानिमयाकिल।भूत्वासत्वानुरूपाणिउपतिष्ठंतुतानिच।योह्यर्थीयेनभां
डेनतत्तस्यप्रतिपादयेत्।स्वेछयाचैवगृह्णंतुननिवार्यस्तुकश्चन।अनेनविधिनायस्तुदानमेतत्प्रयछति।
विश्वकर्माभवेत्तुष्टस्तस्यजन्मत्रयंनृपानारीदत्वाचसौभाग्यमतुलंप्रतिपद्यते।गृहंसर्वगुणोपेतंभर्तृमित्रजनै
र्वृतं।अविद्योगसदाभर्त्रारूपंचानुत्तमंलभेत्।सौभाग्यवैधव्यसर्वगुणोपेतगृहप्राप्तिपुत्रपौत्रादिसंततिस्वा
म्ययोगसदासुखकामोहमिमंमापाकंनानाभांडरचितंवैलवंनानाजनेभ्यउत्सृजामीतिसंकल्पः।मीमांसै
कधुरंधरःश्रुतिधरोन्यायेपिवागीश्वरःसाहित्यामृतसागरःसुजनतावल्लीरसालद्रुमः।यंविद्वन्मणिशेखरो
दिनकरःप्रास्तविश्वेश्वरंतेनाकारीसमस्तपात्रददतौसत्प्रीतयेपद्धतिः।अथमेष्यादिदानं।भविष्योत्तरे।
शृणुपार्थपरंदानंसर्वकिल्बिषनाशनं।सुवर्णरोमांसौवर्णांप्रलक्षांवासुशोभनां।सुवर्णतिलकोपेतांस
र्वालंकारभूषितां।दिव्यपुष्योपहारांश्चसर्वधातुरसैर्युतां।सप्तधान्यसमायुक्तांफलपुष्पवतीतथा।शतेन

कारयेत्तां तु सुवर्णस्य प्रयत्नतः॥ यथाशक्त्याथवा कुर्यात् वित्तशाठ्यं न कारयेत्। दुस्वप्नदर्शने चैव जन्मर्क्षेति
थिसंक्षये। यदा वा जायते वित्तं चित्तं श्रद्धासमन्वितं। तत्र संस्थाप्य देवेशं उमया सह शंकरं। ब्रह्माणं सह गायत्र्या
सश्रीकं श्रीधरं तथा। रत्या सह तथानंगं लोकपालान् ग्रहांस्तथा। उमाशंकरस्वरूपमाह विश्वकर्मा। चर्मधारी चतु
र्बाहुः शूलखट्वांगपाशभृत्। वृषांकः शंकरो गौरी वामोत्संगे स्थिता भवेत्। ब्रह्मगायत्री लक्ष्मीनारायणरतिका
ममूर्तयो ब्रह्मांडे हेमहस्तिरथकल्पवृक्षदानेषूक्ताः। तांस्तु पूज्य विधानेन गंधपुष्पनिवेदनैः। अलंकृत्य द्विजं
शांतं वासोभिः परिपूज्य च। तल्लिंगमंत्रैर्होतव्यं तिलाज्यं ज्वलितेनले। ब्रह्मगायत्री लक्ष्मीनारायण रतिका
मदेवप्रकाशकैरित्यर्थः। ते च ब्रह्मजज्ञानं॰ गायत्री। सकुमिव। इदं विष्णुः। रतिकामयोर्नाममंत्रौ। ग्रहलोक
पालानां प्रसिद्धाः। ततस्तां तिलकुंभस्थां लवणासनसंस्थितां। पूजयित्वा विधानेन मंत्रमेतमुदीरयेत्। रो
मत्वम्मां समजाद्यैः सर्वोपकरणैः सह। जगतः संप्रवृत्तासि त्वामतः प्रार्थये शिवं। वाङ्मनःकायजनितं

यत्किंचिन्ममदुःकृतं। तत्सर्वं विलयं यांतु त्वद्दानादुपसंचितं। एवमुच्चार्य तां दद्यात् ब्रह्मणाय कुटुंबिने।
नाभिभाषेत ततोद — तन्मुखं नावलोकयेत्। दक्षिणा च सुवर्णादिः। अपुत्रो लभते पुत्रम धनो लभते धनं।
दत्वा दानं शुभां कांतिं विपुलां च तथा श्रियं। य इमं शृणुयान्निसंदान कांडमनुत्तमं। अहोरात्रकृतात्पापा
न्मुच्यते नात्र संशयः। अथ मेषदानं। भारते। अजाविकं च माहिषं दत्वा विप्राय शक्तितः। घृतक्षीरवहा नद्यो
यत्र तत्र स मोदते। मंत्रः। अस्य यस्मात्त्वं छागयज्ञानामफुतिले व्यवस्थितः। यानं विभावसोर्नित्यमतः शांतिं
प्रयच्छ मे। मेषस्य। देवानां योमुखं हव्यवाहनं सर्वदेवताः। तस्मत्वं वाहनं पूज्यं देवैः सेंद्रैर्महर्षिभिः। अग्नि
मांद्यं पूर्वकर्मविपाकोत्थं तु यन्ममं। तत्सर्वं नाशय क्षिप्रं जठराग्निं विवर्धय। अग्निमाद्यहरमेषस्य। अथा
जादानमंत्रः। प्रजापतिस्तपस्तप्त्वा अजामुत्पादयत्ततः। यज्ञार्थे तु सुतं कल्प्य पशुं यज्ञसमुद्भवा वि
लुपक्रम्य। अयने विषुवे चैव युगादौ ग्रहणेषु च। अमावास्यामजादानं पौर्णमास्यां च शस्यते। विधिं त

286

दा॰घो॰ २९७

स्यप्रवक्ष्यामिविश्वामित्रेणनिर्मितं। सर्वरत्नोपसंपन्नांसप्तधान्योपरिस्थितां। वस्त्रमाल्योपमाल्यैस्तुभू
षितांप्रभुजानकीं। वज्रनेत्रांहेमशृंगींताम्रपृष्ठांसदोहनां। सरूतारौप्यपादांचक्रक्षौद्रघृत्रिलोदकां।
गोदानवत्सप्रयुंजीतंमंत्रेणानेनसंयतः। मंत्रावासेअजेश्वरस्योसर्वसंपत्करेशुभे। स्पृष्टात्वंहरमेपापंजन्मांत
रशतैःकृतं। एवंसमुच्चरेद्धन्यांद्विजहस्तेजलंक्षिपेत्। प्रीयतांयज्ञनाथायवास्तुदेवायवैनमः। एवंप्रद
क्षिणीकृत्यसर्वंसमवलोकयेत्। ततश्चगच्छेत्स्वगृहंहरिंसंस्मरमाणवः। यद्बाल्येकृतंपापंकामतोवाथ
कामतः। यौवनेवार्धकेवापिदेहसंगेनापिपातकं। अजादानस्यमाहात्म्यात्त्रिःपापोजायतेनरः। विष्णुधर्मे
तु। तस्माद्गोमयछत्वंततःसर्वमवाप्स्यसि। मंत्रेणानेनविधिवद्दलंकृत्स्वशक्तितः। त्वंपूर्वंब्रह्मणासृ
ष्टापवित्रंभवतीपरं। त्वत्प्रसूतौस्थितायज्ञास्तस्मात्संतिकरीभव। प्रतिगृह्णीततांचैवपृष्टदेशेद्विजोत्त
मः। एवंप्रदायविप्रायसर्वपापैःप्रमुच्यते। अश्वमेधफलंप्राप्यमोदतेवैसुरपुरे। अथाजदानं। भारते।

२९७

अजादानमुक्त्वा तमेव लोकमाप्नोति दत्वाजं विधिवन्नरः। तं वह्निलोकं। विधिवादिस्वजादानेतिकर्त्तव्यताति
देशः॥ अथ महिषीदानं। हेमाद्रौ। महिषीं सुप्रजां राजन्क्षीराढ्यां सुवंतीं तथा। दत्वा चैव तु कार्त्तिक्यां धेनुप्रसू
रसंयुतां। दशधेनुप्रदानेन यत्फलं तत्समश्नुते। प्राप्नोति पुत्रपौत्रांश्च सूर्यलोकं स गच्छति। भविष्योत्तरे। महि
षीदानमाहात्म्यं कथयामि युधिष्ठिर। पुण्यं पवित्रमायुष्यं सर्वकामसमृद्धिदं। चंद्रसूर्यग्रहे पुण्ये कार्त्तिक्याम
यने तथा। शुक्लपक्षे चतुर्दश्यां सूर्यसंक्रांतिवासरे। यदा वा जायते वित्तं च कुरुनंदन। तद्देवदेया महिषी संसा
रभयभीरुणा। सुपयोधरा सुजघना सुशृंगी चखुखुरव तथा। प्रथमसूता तरुणी सुशीला दोषवर्जिता। स्वर्ण
शृंगतिलका घंटाभरणभूषिता रक्तवस्त्रावृता रम्या ताम्रदोहनकान्विता। पिण्याकपिटकोपेता सहिरण्या च
शक्तितः। सप्तधान्ययुता दद्यात् ब्राह्मणे वेदपारगे मंत्रस्तु। इंद्रादिलोकपालानां या राज्यमहिषी शुभा। म
हिषी शुभा महिषीदानमाहात्म्यात् सास्तु मे सर्वकामदा। धर्मराजस्य सहाय्ये यस्याः पुत्रः प्रतिष्ठिताः। महिषा

सुरस्यजननीयासात्त्ववरदाममा दद्यात्स्वदक्षिणीकृत्यब्राह्मणेतांपयस्विनीं। प्रतिग्रहस्वतत्तस्याः पृष्ठ
देशेस्वयंभुवा। एवंदत्वाविधानेनब्राह्मणस्यगृहंनयेत्। क्षमापयेत्ततोविप्रंसुसंतुष्टोभवेतिच। अनेन
विधिनादत्वामहिषींद्विजपुंगवा। सर्वान्कामानवाप्नोतिइहलोकेपरत्रच। यास्त्रीददातिमहिषींसाराजम
हिषीभवेत्। महाराजपुमांश्चस्याव्यासस्यवचनंयथा। मह्याजीभवेद्विप्रः क्षत्रियोविजयीभवेत्। वैश्यस्त
धान्यवान्शूद्रः सर्वकामार्थसंयुतः। तस्मान्नरेणादातव्यामहिषीविभवेसति। पुत्रपौत्रप्रपौत्रार्थमात्मनः
शुभमिच्छता। दशधेनुसमांराजन्महिषींनारदोब्रवीत्। विंशद्धेनुसमांव्यासः सर्वदानोत्तमांकविः। महिषी
दानमाहात्म्यंयः शृणोतिसदानरः। सर्वपापविनिर्मुक्तः शिवलोकेमहीयते। दुग्धाधिकांचमहिषींनव
मेध्यवर्णांसेतुष्टतर्णकवतींजघनाभिरामां। दत्वासुवर्णतिलकांद्विजपुंगवायलोकद्वयंजयतितेनकिम
त्रचित्रं। अत्रसुवर्णेदक्षिणा। सुलुंजयमहिषीदानेतुसुवर्णोदद्याकं। तद्विधिः पितृकृतकर्मविपाकोक्तो २९८

तेसम ९॥ अथ महिषदानं भारते। अजाविकं च महिषं दत्वा विप्राय शक्तितः। घृतक्षीरवहा नद्यो यत्र तत्र समोदते। विष्णुधर्मे। महिषस्य प्रदानेन यमस्य लोके महीयते। अंगे प्रतिग्रहः। महिषीनोक्तस्य विधिः॥ यममहिषीदानं तु लोहपात्रे राजतमण्डलं कृत्वा तत्र सौवर्णीं प्रतिमां खड्गधरां भीषणां ताम्रकांस्यपित्तलनिर्मितपुरुषत्रययुतां संपूज्य सोपस्करां यमप्रतिमां महिषपृष्ठे संस्थाप्याज्यपूर्णघटयुतं मृत्युविमोकफलोद्देशेनाष्टम्यां चतुर्दश्यां वा हिरण्यदक्षिणायुतं दद्यादिति। अथोष्ट्रदानं विष्णुधर्मे। उष्ट्रं वा गर्दभं वापि यः प्रयच्छति तु द्विजे। अजामुखं तगरं यथाशक्त्या सदक्षिणां। अलकां स समासाद्य यक्षेंद्रैः सह मोदते। सर्वकामसमृद्धात्मा सर्वयज्ञफलं लभेत्। महिषीदानस्य विधिः। निर्ऋतिदेवता। आह्वय प्रतिग्रहः। अथ कृष्णाजिनदानं। विष्णुः। अथ वैशाख्यां पौर्णमास्यां कृष्णमृगाजिनं सखुरं सशृंगं रौप्यखुरं मुक्तालांगुलभूषितं कृत्वाविके वस्त्रे प्रसारयेत्। ततस्तिलैः प्रच्छादयेत्। सुवर्णनाभं च कुर्यात्। अहतेन वासो

288

दा॰घो॰
२९९

युगेनप्रछादयेत्। चतसृषुदिक्षुचत्वारितैजसानिपात्राणिक्षीरदधिमधुसर्पिःपूर्णानिनिधायागृहि
ताग्रयेब्राह्मणायवासोयुगप्रछादितायदद्यात्। वैशाख्यामित्युपलक्षणं। कार्त्तिक्यांपौर्णमास्यांवैशाख्यां
वाचंद्रसूर्यग्रहेविषुवस्ययनयोर्वेतिपुलस्त्योक्तेः। पौर्णमासीतुयामाघेआषाढीकार्त्तिकीतथा। उत्त
रायणंद्वादशीवातस्यांदत्तंमहाफलमितिमात्स्याच्च। युगादौवाप्रयच्छेतिविधिनायेतुवैद्विजायेतिकालि
कापुराणाच्च। द्वादश्यांचचतुर्दश्यांकृष्णायांतुविशेषतइत्याग्नेयाच्च। अत्रविशेषतइत्युक्तेः शुक्ला
पिचतुर्दशीकालः। सशृंगमित्युपलक्षणं कृष्णमृगाजिनं — — — — — — — मव्रणंमनोहरंहिरण्यशृं
गंरूप्यखुरंमुक्तालांगूलभूषितमंतर्मांसंबहिर्लोमप्राग्ग्रीवंगोमयोपलिप्तायांभुविकुतपानास्तीर्यत
स्मिन्नाविकंवस्त्रंप्रसार्येतिपुलस्त्योक्तेः। तथाचकृष्णाजिनखुरपुच्छेषुसुवर्णशृंगादीनिरूप्यानीति।
अंतरितिउपरिलोमकमधस्तात्दृशासनमित्यर्थः। रूप्यखुरमित्युपलक्षणं। कर्तव्येरुक्मशृंगंतु २९९

रूप्यंदंतंतथैवच। हेममुक्ताविद्रुमंचदाडिमंबीजपूरकं। प्रशस्तपत्रश्रवणेखुरेश्रृंगाढकानिच। एवं
कृत्वामयोक्तेनसर्वशाखाफलानिचेति। मात्स्यात्। कुतपोनेपालकंबलः। बहुवचनात्त्रकुशा इति हे
माद्रिः। ततस्तिलैरितिपूर्वंसुवर्णंकृत्वाजिनमध्येसंस्थाप्यपश्चात्तिलाछादनंमर्थात्। यद्यप्यत्रतिल
मानेनोक्तं। तथापितिलैरात्मसमंकृत्वावासमाछादयेद्बुध इतिमात्स्यादुपदेशात्समराशिकरणसमर्थ
त्वमार्थिकपरिमाणंबोध्यं। भविष्योत्तरेतुद्रोणमितत्वमुक्तं। तैजसानीतिपात्राणिस्थाप्यानीतिशेषः। कां
स्यमयानीत्यर्थः। कांस्यपात्राणिचत्वारिदिक्षुदद्याद्यथाक्रममितिमात्स्यात्। पुलस्त्यस्मृतौतुचतसृ
षुदिक्षुचत्वारिपात्राणिताम्ररौप्यकांस्यसौवर्णानियथाशक्तितः इत्युक्तं। तत्रयथाशक्तित इत्युक्तेः।
पात्रचतुष्टयेताम्रमयत्वरौप्यमयत्वकांस्यमयत्वस्वर्णमयत्वानांविकल्प इतिकेचित्। शक्तित इत्यस्य
यथाशक्तिपरिमाणानीत्यर्थात्। क्रमेणपात्रचतुष्टयमित्यन्ये। क्षीरेति। क्षीरादिपूर्णानिमृन्मयानिस्था

प्यानीत्यर्थः॥ रूक्मवर्णनाभं तत्कुर्यादलंकुर्याद्विशेषतः॥ रत्नैर्गंधैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत्। कां
स्यपात्राणि चत्वारि दिक्षु दद्याद्यथाक्रमं॥ मन्मयेषु च पात्रेषु पूर्वादिक्रमकेण तु। क्षीरं दधि घृतं क्षौद्रमेवं
दत्वा यथाविधीति मात्स्यात्। अत्र सर्वरत्नैरित्यस्यालंकरणे लितस्यास्याप्याकांक्षाया कांस्यपात्रेष्वपि सं
वेधात्सर्वरत्नानां कांस्यपात्रेषु स्थापनं क्षीरादीनां मृन्मयेषु निधानमिति हेमाद्रिः॥ तत्र सौवर्णे क्षीरपात्रं
तु पूर्वस्यां दिशि स्थापयेत्। राजतं दधिपात्रं तु दक्षिणस्यां निधापयेत्। ताम्रपात्रं घृतपूर्णं पश्चिमायां निधा
पयेत्। कांस्यपात्रं क्षौद्रपूर्णमुत्तरेण निधापयेदिति विष्णुधर्मविरोधादुपेक्ष्यं॥ कल्पतरुस्तूभयत्रापि
क्षीरादीनिधानमित्याह। कांस्यपात्राणि केवलानि क्षीरादीनि तु मन्मयेष्वेवेति कनिष्ठपितृव्यचरणाः।
मात्स्ये विशेषोप्युक्तः॥ चंपकस्य तथाशाखामव्रणं कुंभ — वचावाह्योपस्थापनं कृत्वा शुभचित्तो निवे
दयेत्। दानदेशाद्बहिश्चंपकशाखायुक्तं कुंभं स्थापयेदित्यर्थः॥ चतसृषु दिक्षु चतस्रो गक्षीर्निदध्यादि

तिपुलस्त्यः॥ मात्स्येतु धातुमयानि पात्राणि पादेष्वस्य निवेशयेत्। लोहताम्ररौप्यसुवर्णपात्रचतुष्टयं
चतुर्भिर्मंत्रैः पादेषु स्थापयमित्यर्थः॥ मंत्राः प्रयोगे वक्ष्यंते। पुलस्त्यस्मृति विष्णुधर्मोत्तरयोर्हेमोप्युक्तः॥
पश्चिमे भागे सुसमिद्धमग्निं कृत्वा परिसमुह्य पर्युक्ष्य परिस्तीर्य आगग्रैर्दर्भैर्महाव्याहृतिभिस्तिलान्घृ
ताक्तान्जुहुयात्। शूद्रस्य नमस्कारेण। तत आहिताग्नये ब्राह्मणाय सर्वांगैः परिपूर्णाय पाठसंयुक्ता
यविदुषे वस्त्रयुगोपछन्नायालंकृताय दद्यात् सर्वगुणविशिष्टं कृष्णाजिनं ददामीति नाभिं स्पृशन्नति
द्ये कृष्णाजिनं प्रतिगृह्णामीत्यसावपि गृह्णीयात्। विष्णुधर्मे तु संपूज्य वस्त्रयुग्मेन अलंकारैश्च
शोभनैः॥ दिशः संप्रोक्ष्य गायत्र्या तिलमिश्रेण वारिणा। कृष्णाजिनं द्विजश्रेष्ठ सशिरोगखुरभिर्यु
तं ददामि प्रतिगृह्णीष्व प्रीयतां धर्मराडिति। नाभिं स्पृशन्निति पूर्वस्थापितस्य वर्णदेशं स्पृशन्नि
त्यर्थः॥ अदितय इति प्रतिगृहीतापुछस्पर्शनं प्रतिग्रहकाले अदितिर्द्यौरिति मंत्रं जपेदित्यर्थः॥ प्रतिग्र

२९०

दा॰ खं॰ हस्तेतस्योक्तः पृष्ठदेशे महीपत इति मात्स्यात्। अदितिर्द्यौरिति जपेत्स्वर्णवेणाभिनंदितामिति विष्णु
३०१ धर्मात्। अत्र विष्णुधर्मोत्तरे। गोभूहिरण्यसंयुक्तं मार्गमेतद्ददाति यः इत्युक्ते गोभूहिरण्यादीनां दक्षिणा
त्वमिति हेमाद्रिः। गारुडे तु शतनिष्कसमोपेतं तदर्द्धार्द्धमथापि वा। अतो न्यूनं न दातव्यं मध्यिकं फलमर्जि
तं। उत्तमं तु शतेनैव मध्यमं तु तदर्द्धतः। तदर्द्धेन कनिष्ठं तु देयं कृष्णमृगाजिनं। न वित्तशाठ्यं कुर्वीत फल
हानिस्तु कारयेदित्युक्तं। कालिकापुराणे तु पलं पलार्द्धमथार्द्धं वा वितरेद्धेमसंयुतमित्युक्तं। दानोत्तरं
च स्वगृहान्प्रेष्य तं विप्रं जलैः स्नानमथाचरेत्। पूर्णकुंभेन राजेंद्र शाखयाचंपकस्य च। कृत्वाचार्यो
जलं सिंचेन्मंत्रेणानेन मूर्द्धनि। अप्यायस्वसमुद्रज्येष्ठाऋचो ज्ञेयास्तु षोडश। अहते वाससी वीन आचां
तः शुचितामियात्। जीर्णवस्त्रेण वा तेन सर्वांगानि च मार्जयेत्। तद्वस्त्रं कुंभसहितं नीत्वा क्षेप्यं चतु
ष्पथे। इत्युक्तं। अत्र फलं। स — र्वपापकर्मापि सायुज्यं ब्रह्मणो व्रजेदित्युक्तो मात्स्ये तु। समग्रभूमिदानस्य ३०१

फलंप्राप्नोतिमानवः॥ सर्वांल्लोकांश्चचरतिकामचारीविहंगमः॥ आभूतसंप्लवंयावत्स्वर्गलोकेमही
यते। नपितृपुत्रमरणंनियोगंभार्ययासह। धनदेशपरित्यागंनचैवेहप्रयात्क्वचित्॥ त्रिंशत्कोट्यस्तु
लक्षाणि अष्टौसप्ताधिकापुरा॥ सिंहासनोपविष्टस्तुश्वेतवस्त्रपरिच्छदः। वसतेतत्रवैकालंयावदाभू
तसंप्लवं। यदिमानुष्यमायातिकदाचित्कालपर्यये। चतुर्वेदिगृहेजन्मजायतेमहतांकुले। रूपवान्बलवां
श्चैवदीर्घायुः प्रियदर्शनः॥ वल्लभः सर्वनारीणांदाताभोक्तातथैवचेत्युक्तं। इतिगागाभट्टकृतदानोद्योतेकृ
ष्णाजिनदानविधिः॥ अथप्रयोगः॥ देशकालौसंकीर्त्यसर्वपापक्षयपूर्वकब्रह्मसायुज्यकामसमग्रभू
दानसमफलप्राप्तिसर्वलोकचरणकामचारित्वसमग्रभूतसंप्लवाकालावच्छिन्नस्वर्गलोकेमहितत्वा
क्षीष्टाधिकात्रिंशत्कोटिवर्षावच्छिन्नसिंहासनोपवेशनब्रह्मलोकमहितत्वोत्तरैहिकवेदचतुष्टयावि
द्विप्रकुलजन्मरूपबलदीर्घायुष्ट्वसकलनारीप्रियत्वपूर्वकराजराजत्वभवनकामोबाकृष्णाजिनदा

२९१

नं करिष्य इति संकल्प्य गणेशं संपूज्याचार्यं वृणुयात्। ततः आचार्यः स्वयं वा गोमयोपलिप्त चतु
हस्ते कुशानास्तीर्य तत्र कंबलं भागग्रं तदुपरि कृष्णाजिनं सपुच्छं सखुरं सशृंगं सकर्णं यथालब्धं वा प्रा
ग्रीवमुत्तरलोमास्तीर्य तत्र मध्ये यथाशक्ति हिरण्यं निधाय तदुपरि द्रोणमितानुपविष्टान्समराशीक
रणयोग्यान्वा तिलान्निधाय यथाशक्ति सुवर्णशृंगाटकानि च खुरेषु पलाशपत्रद्वयं कर्णयोर्मुक्ताफला।
नि पुच्छे रूप्यं दंतदेशे संस्थाप्य वासोद्वयेनाच्छाद्य रत्नैर्गंधादिभिर्भूषयेत्। पूर्वादिदिक्षु चत्वारि कांस्य
पात्राणि ताम्राणि रूप्याणि सौवर्णानि वा एकैकं वा ताम्ररूप्यकांस्यसुवर्णमयं स्थापयेत्। यदा चैकै
कं तदा क्षीरपूर्णं सौवर्णं पूर्वतः। दधिपूर्णं राजतं दक्षिणास्यां। घृतपूर्णं ताम्रं पश्चिमस्यां। मधुपूर्णं
स्यमुत्तरस्यां। यत्र तु सर्वाण्येकधातुमयानि तदाभ्यन्यान्येव। तत्पात्रे चतुष्टयं च पूर्वादिक्रमेण क्षी
रदधिघृतमधुपूर्णं सिद्धः प्रसृतगोचतुष्टयं च स्थाप्य। ततो यः स्यात्तद्रूपं यापानि यानि काम्यानिम ३२

यानि काम्यानि मया लोभात्कृतानि वै । लोहपात्रप्रदानेन प्रशांम्यंति मम माशु वै । इति पश्चात्तरोत्तरखु
रे दक्षिणखुरे च मंत्रावृत्त्यानिधेयं । ततोग्रभागदक्षिणखुरे । परापवादपैशुन्यान्मृष्टमांसस्य भक्षणात् ।
तत्रोत्थितं च मे पापं ताम्रपात्रात्प्रणश्यतु । इति मधुपूर्णताम्रपात्रं संस्थोत्तरखुरे तिलपूर्णरजतपात्रं
कन्यानृतं गवां चैव परदारप्रघर्षणं । रौप्यपात्रप्रदानेन क्षिप्रं नाशं प्रयातु मे इति स्थाप्य मध्ये तिलव
स्त्रोपरि अक्षतपूर्णं सुवर्णपात्रं जन्मसहस्रेषु कृतं पापं कुबुद्धिना । सुवर्णपात्रदानात्तन्नाशं यातु ज
नार्दनेति स्थापयेत् । समंताच्च हैमनक्षाप्रवालदाडमीवीजपरादिफलानि शाकांश्च स्थापयेत् । ततः
कृष्णाजिनस्थापनदेशाद्बहिरुत्तरतश्चंपकशाखायुक्तं जलपूर्णकलशं स्थापयेत् । ततः कृष्णाजि
नं संपूज्य पश्चिमतः स्वगृह्योक्तविधिनाग्निं प्रतिष्ठाप्याज्यभागांते भूर्भुवः स्वर्महोजनस्तपः सत्यं स्वा
हेत्यष्टसहस्रमष्टशतं वा जुहुयात् । प्रजापतिर्देवता । नमः स्वाहेति शूद्रस्य मंत्रः । ततः आचार्यंव

दा॰यो॰ स्त्रद्वयेनालंकारादिभिः संपूज्य पूर्वोक्तफलमुच्चार्येदं कृष्णाजिनं तिलद्रोणयुतं मध्यस्थितसुवर्णसुव
३०३ र्णशृंगं रूप्यखुरं मुक्ताभूषितलांगूलं रजतदंतेलोहताम्रराजतपात्रचतुष्टयस्थितखुरं दिक्चतुष्टयस्थित
गर्षिचतुष्टयकांस्यपात्रे दिक्चतुष्टयस्थितक्षीरादिरण्णीमस्ताच चतुष्टयंमुत्तानांगिरोदेवस्तं तुभ्यं संप्रदद
इति तिलमध्यस्थितसुवर्णे हस्तं स्थापयित्वा पात्रहस्ते संकल्पयेत्। ततः सर्वगुणविशिष्टं कृष्णाजिनं द
दामीति पठेत्। कृष्णाजिनं द्विजश्रेष्ठ सर्वाशिरोर्यष्टिभिर्युतं। ददामि प्रतिगृह्णीष्व प्रीयतां धर्मराडिति वा
प्रतिग्रहीता पुच्छे हस्तं स्थापयित्वा अदितये कृष्णाजिनं प्रतिगृह्णामीत्युक्त्वा अदितिर्द्यौरिति मंत्रं पठेत्। स्व
स्तीत्युक्त्वा दानस्कृतिं च। ततः कृतस्य कृष्णाजिनदानस्य प्रतिष्ठार्थमिदं सुवर्णमाग्नेयं दक्षिणां संप्रद
दद्युक्तपरिमाणं सुवर्णं दक्षिणां दद्यात्। ततस्त्वाताजीर्णपीतवस्त्रद्वयेनांगप्रावरणं कृत्वा तद्धस्ते चं
पकशाखासहितं कुंभं चतुष्पथे क्षिपेत्। ततः मेश्वरार्पणं कुर्यात्। इति गागाभट्टकृतदानदिनकरोद्यो ३०३

तेकृष्णाजिनदानप्रयोगः । अग्निपुराणेतु । संलिप्यगोमयेनाथचतुर्हस्तप्रमाणतः । वस्त्रंप्रसारयेद्भू
मावाजिनंतत्रविन्यसेत् । कृष्णैस्तिलैस्तुसंछन्नंकृत्वातत्रोपरिन्यसेत् । मधुसर्पिर्युतंपात्रंहैमंचौदुंब
रंतथा । रुक्मवर्णंप्रक्षिपेत्तत्रपलंवाथस्वशक्तितः । संछादयेत्तच्छुभैर्वस्त्रैः पात्रंयज्ञोपवीतिना । कुंभा
श्चाष्टौतथादिक्षुसवस्त्राः पात्रसंयुताः । संस्थाप्यावाहनंकृत्वाविधिवत्पूजयेत्केशवं । कृष्णाजिनंसमभ्य
र्च्यब्राह्मणायोपपादयेत् । कृष्णोसिकर्मणाकृष्णः कृष्णाजिनमतस्तिलैः । कृष्णैर्युतंप्रतीच्छस्वकृष्णः
संप्रीयतामिति । एवंदत्त्वाद्विजेभ्यस्तुपश्चाद्दद्याच्चदक्षिणां । तिलाहारोभवेत्तत्रब्राह्मणान्भोजयेत्ततः
। एवंकृष्णाजिनंदत्त्वानरोविगतकल्मषः । पितामहान्समुद्धृत्यस्वर्गंयातिनसंशयः । सर्वपापक्षयपितृउद्धा
रणपूर्वकपित्रादियुतस्वर्गभोगोत्तरविष्णुपदप्राप्तिकाम इतिसंकल्पः । अथार्द्धकृष्णाजिनदानं । भूमिंप्रा
क्प्रवणांशुद्धांगोमयेनोपलेपयेत् । तस्यांहरितदर्भांस्तुघनानास्तीर्ययत्नतः । मध्येकृष्णाजिनंराजन्नार्द्धंस

293

दा॰धो॰ वींगिकं दद्यात्। आस्तीर्य शृंगसहितं प्राग्ग्रीवं शिरसा सह। केतितं ब्राह्मणं पूर्वं पात्रलक्षणलक्षितं। केतित
३४ मिति मंत्रितमित्यर्थः। प्रक्षाल्य पादौ तस्मै वदद्याच्छुक्ले तु वाससी। सौवर्णे कुंडले देये कंठाभरणमेव च। सौ
वर्णे कंकणे देये हस्ताभरणमेव च। स्नातमभिषिक्तं संपूज्य शृंगयोर्मध्यदेशतः। प्राङ्मुखं ब्राह्मणं स्थाप्य म
गं सौवर्णशृंगिकं। तिलैराच्छादयेत्कृत्स्नं ब्राह्मणं। शिरसा सह। यदा शिरो ब्राह्मणस्य मग्नं भवति भूमिप। जपेद्वै
सूक्तमंत्रं तु गायत्रीं वा समाहितः। पापं संचिंत्य चित्तेन ह ~ ब्राह्मणस्य तु। नाभिमात्रे समुद्धृत्य तिलैः संछादये
त्पुनः॥ संछादिते पुनर्विप्र जपेन्मंत्रं च पूर्ववत्। पुनरुद्धृत्य विप्रं तु नाभिं यावत्तु पार्थिव। पुनः संछादयेत्तस्य
शिरः कृत्स्नं तिलैस्तथा। त्रिः कृत्वस्तु निमज्यैवं दाता दद्यान्मृगाजिनं। पात्रं मनसि संपूज्य तोयमध्ये विनिक्षिपे
त्। प्रीयतां विश्वकर्मा तु विश्वात्मा विश्वरूपधृक्। एवं कृत्वाजिनं दत्वा ब्रह्महत्यां व्यपोहति। पापिष्ठः परमं स्था ३४
नं वाति यत्र न शोचति। इति ते गुह्यमाख्यातं दानं सर्वाघनाशनं। मुंडितेन तु कछाय ब्राह्मणो याति ते सति। सहस्त्रे

दक्षिणां दद्यान्नियतं ब्राह्मणाय तु। अथ प्रयोगः॥ देशकालौ संकीर्त्य ब्रह्महत्यापापक्षयपूर्वकशोचनीयस्थानप्राप्तिकाम आर्द्रकृष्णाजिनदानं करिष्य इति संकल्प्य बहुवारं प्रथमकृतप्रतिग्रहनिष्क्रयं पात्रं दत्वा कृष्णवस्त्रद्वयं कुंडलकंठाभरणकंकणाद्यलंकरणगंधमाल्यैः संपूज्य गोमयेनोपलिप्तभूमौ हरितदर्भेष्वार्द्रकृष्णाजिनमास्तीर्य स्वर्णशृंगादीनि प्रतिमुच्य तच्छृंगयोर्मध्ये प्राङ्मुखं ब्राह्मणमुपवेश्य तदुपरि तिलान्दद्यात्। यथा ब्राह्मणास्तिलमध्ये निमज्जति तथा ब्राह्मणोवृशतं तिलोसि सोमदेवस्य इति वा मंत्रं जपेत्। ब्रह्महत्यां मनसि विभाव्य नाभिपर्यंतं विप्रमुद्धृत्य पुनरन्यैस्तिलैः पूरयेत्। एवं त्रिः कृत्वा पूर्ववत्फलमुद्दिश्येदमार्द्रकृष्णाजिनं सस्वर्णशृंगादि तुभ्यं संप्रददे। प्रीयतां विश्वकर्मा तु विश्वात्मा विश्वरूपधृगिति पठित्वा सहस्रसुवर्णं दक्षिणां संकल्पयेत्। अन्यत्पूर्ववत्। इति गागाभट्टपूरितदानदिनकरोद्योते आर्द्रकृष्णाजिनदानप्रयोगः॥ २८ गजदानं कर्मविपाकसारे स्पष्टं। अथ दशदानानि। गोभूतिलहिरण्याज्य

२९४

दा. षो. वासोधान्यगुडानि चारौप्यं लवणमित्याहुर्दश दानानि पंडिताः। एतत्परिमाणं धर्मप्रवृत्तावुक्तं। गोमू
२०५ ल्यं सुवर्णरूप्यमो निष्कं तदर्द्धं तदर्द्धं वा। भूमाने गोचर्म दशहस्ता पंचहस्ता वा। सुवर्णनिष्को दक्षिणा। तिल
द्रोणा मिताः। तदर्द्धं तदर्धं वा। षोडशतिलमितं तिलपात्रं वा। माषचतुष्टयमितं सुवर्णं दक्षिणा। हिरण्यमेक
स्तोलकस्तावत्येव दक्षिणा। आज्यमत्र षष्टि चत्वारिंशत् द्वादश वा पलानि। हेममाषो दक्षिणा। वासांसि त्री
णि। धान्यं पंचद्रोणास्तदर्धं स्तदर्द्धं वा। शक्त्या दक्षिणा। लवणं षष्टि चत्वारिंशत् द्वादश वा पलानि। गुडश्चैव त
द्द्विगुणः। हेममाषद्वयं दक्षिणा। रूप्यं तोलकचतुष्टयं। तदर्द्धं तदर्धं वा। चतुर्थांशो दक्षिणा। अथ दानाष्टकं॥
तानि च तिला लोहं हिरण्यं च कार्पासं लवणं तथा। सप्तधान्यं मही गावः प्रत्येकं पावनं स्मृतं। एतन्मानं द्विवोदा
सीये प्रकारद्वयेन। तिला दशद्रोणमिताः। लवणं द्रोणपंचकं॥ सार्द्धसप्तदशद्रोणं सप्तधान्यमुदाहृतं। गोचर्ममा
त्रा पृथिवी तिस्रो गावः सवत्सकाः। दियद्रव्यतृतीयांशं दक्षिणां परिकल्पयेत्। तदभावे दशांशं तु यथाशक्त्या २०५

थवाभवेत्।भूमि – श्चीयथाशक्तिति। – लाद्रोणद्वयंतथा।।गोः सुशीलाचद्रोग्ध्रीचकुंभैराज्यंचपंचभिः।प
लमेकंतुरूप्यस्यसुवर्णस्यसुवर्णकं।दत्त्वावस्त्रैर्महादानंदातव्यंसुविचक्षणाः।अथमंत्राः।गवामंगेषुतिष्ठंति
भुवनानिचतुर्दश।यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच।।गोः।सर्वभूताश्रयाभूमिर्वराहेणसमुद्धृता।अनंत
सस्यफलदा अतः शांतिंप्रयच्छमे।भूमेः।महर्षेर्गोत्रसंभूताः कश्यपस्यतिलाः स्मृताः।तस्मादेषांप्रदानेनम
मपापंव्यपोहतु।तिलानां।हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः अनंतपुण्यफलदमतःशांतिंप्रयच्छमे।
सुवर्णस्य।कामधेनुषुसंभूतंसर्वक्रतुषुसंस्थितं।देवानामाज्यमाहारमतःशांतिंप्रयच्छमे।आज्यस्य।शरणं
सर्वलोकानांलज्जायारक्षणंपरं।सुवेषधारिवस्त्रत्वमतः शांतिंप्रयच्छमे।वाससः।सर्वदेवमयंधान्यंसर्वोत्प
त्तिकरंमहत्।प्राणिनांजीवनोपायमतःशांतिंप्रयच्छमे।धान्यस्य।यथादेवेषुविश्वात्माप्रवरश्चजनार्द
नः।सामवेदस्तुवेदानांमहादेवस्तुयोगिनां।प्रणवः सर्वमंत्राणांनारीणांपार्वतीयथा।तथारसानांप्रव

298

दा॰ द्यो॰ ३०६ वरः सदैवेक्षुरसो मतः। ममतस्मात्सरांलक्ष्मींददस्वगुडसर्वदा। गुडस्य। प्रीतिर्यतः पितॄणांच विष्णुः शंकर
योः सदा। शिवनेत्रोद्भवंरूप्यमतः शांतिंप्रयच्छमे। रजतस्य। यस्मादन्नरसाः सर्वेनोत्कृष्टा लवणंविना। शंभोः
प्रीतिकरंनित्यमतः शांतिंप्रयच्छमे। लवणस्य। इमानिदशदानानि प्रायश्चित्तानंतरंसभ्येभ्य एवदेयानी
ति। जगद्गुरुनारायणभट्टचरणाः। वस्तुतस्त्वेषामंगत्वाभावादन्येभ्योपीतियुक्तं। इमानिचप्रायश्चित्ता
नंतरमन्यस्मिन्काले दातव्यानि। आचारस्तुप्रायश्चित्तोत्तरमेवेति। इतिश्रीभट्टसूरितदानदिनकरोद्यो
ते दशदानप्रयोगः। नक्षत्रयुक्ततिथिवारभयोगकल्पसंक्रांतिमासकरणेषुयुगादिकाले। संवत्सरेषुस
कलेष्वपिदानक्रियान्यालोच्यदैनकरिरातनुतेप्रयोगः। तत्रादौतिथिदानानि। प्रतिपद्यथपुष्पाणां द्वि
तीयायां घृतस्य चाऽपानस्तृतीयायां चतुर्थ्यांमोदकान्पुनः। पंचम्यां तु फलानां वै षष्ठ्यां स्नानस्य मा ३०६
नदा सप्तम्यां चाथपूपानामष्टम्यां च गुडस्य च। कुल्माषस्य नवम्यां तु दशम्यां भोजनस्य च। एकादश्यां सु

वर्णस्य द्वादश्यां वसनस्य च। त्रयोदश्यां तु गंधानां शिवायास्तदनंतरं। दानं च परमान्नस्य पंचदश्यां महाफ
लं। माधवीये भविष्योत्तरे। प्रतिपत्सु द्विजान्सम्यक्पूजयित्वा प्रजापतिं। सौवर्णमरविंदं च कारयित्वाष्टप
त्रकं। कृत्वा त्वौदुंबरे पात्रे सुगंधिघृतपूरिते। पुष्पैर्धूपैः पूजयित्वा विप्राय प्रतिपादयेत्। अथ नक्षत्रयुक्त
पौर्णमासीदानानि। हेमाद्रौ विष्णुस्मृतौ। मार्गशीर्षीं चंद्रस्यांशुकमृगशिरोयुक्तायां च चूर्णितलवणस्य सुव
र्णनाभं प्रस्थमेकं चंद्रोदये ब्राह्मणाय प्रतिपादयेत्। अनेन कर्मणा रूपसौभाग्यवानभिजायते। पौषी च पुष्य
युक्ता स्यात्तस्यां गौरसर्षपकल्केनाच्छादितशरीरो गव्यघृतपूर्णकुंभेनाभिषिक्तः सर्वौषधिभिः सर्वैर्गंधैः स
र्वबीजैश्च स्नानं घृतं घृतेन च भगवंतं वासुदेवं स्नापयित्वा पुष्पगंधधूपदीपनैवेद्यादिभिश्चाभ्यर्च्य वैष्ण
वैः शाकैर्बार्हस्पत्यैश्च मंत्रैः पावकं हुत्वा सुवर्णेन घृतेन ब्राह्मणान्स्वस्ति वाचयेद्वासोयुगं च दद्यात्। अनेन कर्म
णा पुष्यति। माघी मघायुक्ता चेत्स्यात्तस्यां तिलैः श्राद्धं कृत्वा पूतो भवेत्। भोजनार्थे श्राद्धे तिलान्दत्वा सर्वज

दा॰यो॰ न प्रियो भवति। फाल्गुनी फल्गुनीभयुता चेत्तस्यां ब्राह्मणाय सुसंस्कृतं स्वास्तीर्णं शयनं निवेद्य भार्यां मनो
३०७ ज्ञां पक्षवतीं द्रविणवतीं प्राप्नोति। नार्यपि भर्तारं॥ चैत्री चित्रायुता चेत्तस्यां चित्रवस्त्रप्रदाने सौभाग्यमाप्नो
ति। वैशाख्यां पौर्णमास्यां ब्राह्मणसप्तकं क्षौद्रयुतैस्तिलैः संतर्प्य धर्मराजं प्रीणयित्वा पापेभ्यः पूतो भवति।
ज्येष्ठी ज्येष्ठायुता चेत्तस्यां छत्रोपानह्प्रदानेन नगराधिपत्यमाप्नोति। आषाढ्यामाषाढयुक्तायामन्नपानदा
नेतद्देवाक्षयमवाप्नोति। श्रावण्यां श्रावणयुक्तायां जलधेनुमन्नवासोयुगान्वितां दत्त्वा स्वर्गलोकमवाप्नो
ति। प्रौष्ठपद्यां तद्युक्तायां गोदानेन सर्वपापविनिर्मुक्तो भवति। आश्वयुज्यामाश्विनीगते चंद्रेसिघृतपू
र्णभाजनं सुवर्णयुतं विप्राय दत्त्वा दीप्ताग्निर्भवति। कार्तिकी चेत्कृत्तिकायुक्ता तस्यां सितसन्नवर्णमन्यव
र्णं वा शशांकोदये सर्वसस्यरत्नगंधोपेतं दीपमध्ये ब्राह्मणाय दद्यात्। कांतारभयं न पश्यति। अथवा ३०७
रदानानि हेमाद्रौ स्कांदे। दद्यादादित्यमादित्ये सोमे सोमं कुजं कुजे एवं बुधादीन्मंदे राहुकेतु शनेश्चरा

नृ॥ एतेषां लक्षणानि प्रागुक्तानि। मंत्राश्च ग्रहदाने यथाशक्ति सुवर्णं दक्षिणा। ब्रह्मप्रोक्ते। आदित्यवा
रे सुवर्णमयमादित्यं कृत्वा रक्तवस्त्रं प – रागं च ब्राह्मणाय प्रतिपादयेत्। कपिलां वा। सत्यलोके सर्वान्
कामानवाप्नोति निष्कामो मोक्षं। सोमदिने राजतं सोमं शंखं वा। मंगलदिने सौवर्णं मंगलं रक्तं धुरंधरं वा।
बुधे सौवर्णं बुधं ज्ञानप्राप्तये दद्यात्। गुरुदिने सौवर्णं बृहस्पतिं पीतं वा वस्त्रं दद्यात्। शुक्रदिने राजतं शुक्रं श्वे
तहयं वा तस्मीतयेद्दद्यात्। शनैश्चरे सौवर्णं शनैश्चरबिंदु नीलयुतं कृष्णां गां वा तस्मी नयेद्दद्यात्। तस्मिन्नेव
दिने राहुमायसेन समन्वितं दद्यात्। केतुन्न छागसमन्वितं तस्मी नयेद्दद्यात्। तस्मिन्नेव दिने। अन्यराहुके
तयोपि सौवर्णी एव। एवं विशेषदानेन सर्वान्कामानवाप्नुयात्। विष्णुधर्मोत्तरे। लवणाज्यगुडोपेतमपू
पं सर्यवासरे। सहिरण्यं नरो दत्वा नरोगैरभिभूयते। एवं विधं वेंदुदिने दत्वा सौभाग्यमाप्नुयात्। काष्ठदानं
भौमदिने शत्रुनाशमवाप्नुयात्। बुधे क्रीडनकानां च दानं बाले प्रशस्यते। जीवाह्नि वस्त्रदानेन परां पुष्टिं

दा॰ घो॰ समश्नुते। सर्वं वरान् समाप्नोति शुक्रे दत्वा रतिं स्त्रियः अभ्यंगं सूर्यदिवसे दत्वा जीवीतमाप्नुयात्। अथ न
३०८ क्षत्रदानानि। हेमाद्रौ भारते। कृत्तिकासु महाभागे पा — सेन ससर्पिषा। संतर्प्य ब्राह्मणान् साधून्। लोकानाप्नो
त्यनुत्तमान्। रोहिण्यां पांडवश्रेष्ठ माषैरन्नेन सर्पिषा। पयोनुपानं दातव्यं अनृण्यार्थं द्विजातये। दोग्ध्रीं सवत्सां
तु नरो नक्षत्रे सोमदैवते। दत्वा दिव्यविमानस्थः सर्वं प्राप्नोत्यनुत्तमं। सोमदेवतं मृगशीर्षं। आर्द्रायां कृसरं दत्वा
तिलमिश्रं समाहितः नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान्। पूपं पुनर्वसौ दत्वा घृतपूर्णं सुपातितं। यशस्वी
रूपसंपन्नो बह्वन्ने जायते कुले। पुष्ये तु कांचनं दत्वा कृतं चाकृतमेव च। अनालोकेषु लोकेषु सोमवत्स विराजे
ते। घृतमलंकारादिरूपं। आश्लेषासु तथा रूप्यं वृषभं वा प्रयच्छति। स सर्वभयनिर्मुक्तः शास्त्रवानभि
जायते। शास्त्रज्ञानवानित्यर्थः। मघासु तिलपूर्णानि वर्द्धमानानि मानवः। प्रदाय पशुमांश्चैव पुत्रवांश्च प्रजा ३०८
यते। फाल्गुनीपूर्वसमये ब्राह्मणानामुपोषितः। भक्ष्यान् फाणितसंयुक्तान् दत्वा सौभाग्यमृच्छति। घृतक्षी

रसमायुक्तं विधिवत्षष्टिकोदनं । उत्तराविषये दत्वा स्वर्गलोके महीयते । यद्धाप्रदीयते दानमुत्तराविषयेन
रैः । सदा फलमनंतं च भवतीह विनिर्णयः । हस्ते हस्तिरथं दत्वा चतुर्युक्तमुपोषितः । नरस्तरति दुर्गाणि क्षु
रधाराश्च पर्वतान् । चतुर्युक्तं हस्तिचतुष्टययुक्तमित्यर्थः ॥ – आयामृषभं दत्वा पुण्यांगंगां च भारत । चर
त्यप्सरसां लोके रमते नंदने वने । स्वातिष्वथ धनं दत्वा यदिष्टतममात्मनः । प्राप्नोति लोकान्स शुभानिह चैव म
हद्यशः । विशाखायामनड्वाहं धेनुं दत्वाथ दुग्धदां । सप्रासंगं च शकटं सधान्यं वस्त्रसंयुतं । प्रासंगो युग – षं
। पितॄन्देवांश्च प्रीणाति प्रेत्य चानंत्यमश्नुते । न स दुर्गाण्यवाप्नोति स्वर्गलोकं च गच्छति । अनुराधासु प्रावारं व
स्त्रोत्तरमुपोषितः । दत्वा युगशतं चापि नरः स्वर्गे महीयते । प्रावारः प्रावरणवस्त्रं । परिधानवस्त्रसहितं । का
लशाकं तु विप्रेभ्यो दत्वा मर्त्यः समूलकं । ज्येष्ठायामृद्धिमुच्छाय गतिमिष्टां च गच्छंति । मूले मूलफलं दत्वा ब्राह्म
णेभ्यः समाहितः । स्वपितॄन्प्रीणयेद्देवगतिमिष्टां च गच्छति । अथ पूर्वास्वषाढासु दधिपात्राण्युपोषितः । कुल

दा॰ चो॰ वृतोपसंपन्ने ब्राह्मणे वेदपारगे। प्रदाय जायते श्रेष्ठे कुले बहुगुणाकुले। पुत्रपौत्रैः परिवृतः पशुमान् धनवां
३०९ स्तथा। उदमंथं सर्पिष्कं प्रभूतमधुफाणितं। दत्वोत्तरास्वषाढासु सर्वलोकानवाप्नुयात्। उदमंथः उदकमिश्राः
सक्तवः। फाणितं खंडविकारः। मधुघृतं त्वभिजिते योगे दत्वा मधुघृतान्वितं। धर्मनिष्ठो मनीषिभ्यः स्वर्गलोके म
हीयते। उत्तराषाढनक्षत्रचतुर्थपादः श्रवणस्याद्यघटिकाचतुष्टयमभिजिद्योग इत्यर्थः। श्रवणे कंबलं द
त्वा वस्त्रांतरितमेव च। श्वेतेन याति यानेन स्वर्गलोके न संवृतः। गोयुक्तं च धनिष्ठासु यानं दत्वा समाहितः। वस्त्र
मस्मिन्नेव दत्वा प्रेत्य राज्यं प्रपद्यते। गंधं शतभिषायोगे दत्वा सागरुचंदनं। प्राप्नोत्यप्सरसां लोकं प्रेत्य गंधांश्च
शाश्वतान्। पूर्वाभाद्रपदायोगे राजमाषान् प्रदाय वै॥ सर्वभक्ष्यफलोपेतः स वै प्रेत्य सुखी भवेत्। औरभ्रमुत्तरा
योगे यस्तु मांसं प्रयच्छति। पितॄन् प्रीणाति सकलान् प्रेत्य चानंत्यमश्नुते। उरभ्रो मेषः। कांस्योपदोहनां धेनुं रे ३०९
वत्यां यः प्रयच्छति। स प्रेत्य कामानादाय दातारमुपतिष्ठति। रथमश्वसमायुक्तं दत्वाश्विन्यां नरोत्तमः। हस्त्यश्व

रथसंपन्नोवर्चस्वान्‌जायतेकुले। भरणीषुद्विजातिभ्यस्तिलधेनुंप्रदाय — गाःप्रसूताश्चप्राप्नोतिनरःप्रेत्य
यशस्तथा। विष्णुधर्मोत्तरेतु। कृत्तिकासुसुवर्णस्यदानंबहुफलंस्मृतं। रक्तवस्त्रस्यरोहिण्यांसौम्येगुलवण
स्यच। कृशरस्यतथार्द्रायामादित्येरजतस्यतु। घृतस्यतुतथापुष्येगंधानामथसार्पभे। तिलानांचतथापै
त्र्येप्रियंगोर्भगदैवते। अर्यम्णेचाथपूपानांसावित्रेपायसस्यतु। चित्रायांचित्रवस्त्राणांसक्तूनांवायुदेवते। ऐं
द्राग्नेचैवलोकानांमैत्रेमाल्यफलस्यच। छत्रस्यतुतथाशक्रेमूलेमूलफलस्यच। हेम्नस्यमधुयुक्तस्यदान
मापेमहाफलं। विश्वेश्वरेन्नपानस्यश्रवणेवसनस्यच। धान्यस्यवासवेविप्रावारुणेचौषधस्यच। आज्येपुराण
बीजानांसस्यानांवदनंतरे। गोरसानांतथापौष्णेयवानामथचाश्विने। तिलानांचमहादानंभरणीषुमहाफलं
। अथयोगदानानि। विष्कंभेसर्वधान्यानांदानंसर्वाघनाशनं। प्रीतौतथान्नपानानामायुष्मतीघृतस्यच। सुं
भ — दानंसौभाग्येयवदानंचशोभने। अतिगंडेचवस्त्राणांपायसस्यसुकर्मणि। धृतौरजतदानंचशूलेशूलादि

294

दा॰सो॰ दानकं। गंडेमंडनदानेचवृद्धौगोदानमिष्यते। ध्रुवेचयवरत्नानांव्याघातेकांणितस्यच। हर्षतेगंडदानेस्याद्व
३१० ज्रेदद्यान्मणीनपि। सिद्धौसिद्धार्थकादेयाव्यतीपातेचकांचनं। वरीयसितिलादद्याच्छत्राणिपरिघेतथा। जलकुं
भाः शिवेदेयाः सिद्धेसिद्धान्नमिष्यते। साध्येलंकरणानांचछत्रदानंशुभेशुभं। शुक्लेचोपानहोदानं। शस्त्रबल
णिसर्पिषः। ऐंद्रेचदीपकान्दद्यात्वैधृतेकनकंहितं। दानान्येतेषुयोगेषुयथोक्तानिद्विजोत्तमाः। भक्तियु
क्तोद्विजेदत्वालोकेवसतिचक्रिणः। अथकरणदानानिविष्णुधर्मोत्तरे। करणेषुचवक्ष्यामिदानानिद्विज
सत्तमाः। ववेपायसदानंस्यात्सक्तुदानेचबालवे। कौलवेगोरसान्दद्यात्तिलांस्तैतीलनामनि। गराभिधानेलव
णं। वणिजेद्देमवरं। विष्टौचषष्टिकान्नानिशकुनौसर्पिरेवच। मधुदानंचतुःपादेशस्तंनागेचवाससां।
दानंप्रियंगवोःकिंस्तुघ्नेश्रेष्ठमुक्तंद्विजोत्तमाः। अथससंक्रांतिदानानि। विश्वामित्रः। मेषेसंक्रमणेभानोर्मे
षदानंमलाफलं। वृ– संक्रमणेदानंगवांप्रोक्तंतथैवच। वस्त्रान्नपानदानानिमिथुनेविहितानिच। घृतधे ३१०

नुप्रदानं च कर्कटे परिशस्यते। ससुवर्णछत्रदानं सिंहेपि विहितं सदा। कन्याप्रवेशे वस्त्राणां सुरभीणां त
थैव च तुलाप्रवेशे धान्यानां बीजानामेव चोत्तमं। कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च। कीटो वृश्चिकः।
धेनुः प्रवेशे वस्त्राणां यानानां च महाफलं। मृषप्रवेशे दारूणां दानमग्नेस्तथैव च। कुंभप्रवेशे दानं तु गवांबु
तृणस्य च। मीनप्रवेशे स्नानानां माल्यानामपि चोत्तमं। दानान्यथैतानि मया द्विजेंद्राः प्रोक्तानि कालेतु नरः प्र
दत्वा। प्राप्नोति कामान् मनसस्त्वभीष्टान् तस्मात्प्रशंसंति हि कालदानं। स्कांदे। धेनुं तिलमयीं राजन् दद्याद्य
श्चोत्तरायणे। सर्वकामानवाप्नोति विंदते परमं सुखं। विष्णुधर्मोत्तरे। तिलप्रदानान्नाप्येतु याम्यं लोकं च गछति।
प्रियंगुं लांगुले दत्वा प्रियो भवति भूतले। चैत्रे चित्राणि वस्त्राणि दत्वा सौभाग्यमश्नुते। अपूपानां प्रदानेन
वैशाखे स्वर्गमश्नुते। छत्रदानात्तथा ज्येष्ठे सर्वान्कामान्समश्नुते। श्रावणे वस्त्रदानस्य कीर्तितं सुमहत्फलं। प्रो
ष्ठपादे तथा मासि प्रदानात्फाणितस्य च। आश्विने घृतदानेन रूपवानभिजायते। कार्तिके दीपदानेन स सदौज्वल्य

दा॰ घो॰
३११

माप्नुयात्। लवणंमार्गशीर्षेतुदत्वासौभाग्यमश्नुते। पौषेकनकदानेनपरांतुष्टिंतथैवच। पुष्याणांचसिनेपक्षे
दानंलक्ष्मीकरंस्मृतं। फलानांचतथादानंकृष्णपक्षेमहाफलं। वामनपुराणेमाघेमासितिलाःशस्तातिलधेनु
श्चदानवत्। इंधेंधनादयश्चान्येमाधवप्रीणनाय तु। फाल्गुनेव्रीहयोगावोवस्त्रंकृष्णाजिनान्वितं। गोविंदप्रीण
नार्थायदातव्यंपुरुषर्षभे॥ चैत्रेविचित्रवस्त्राणिशयनान्यासनानिच। विष्णोःप्रीत्यर्थमेतानिदेयानिब्राह्म
णेष्वथ। गंधाश्चमाल्यानितथावैशाखेसुरभीणिच। देयानिछिन्नतृष्णेभ्योमधुसूदनतुष्टये। उदकुंभांश्चधेनुं
चतालवृंतंसचंदनं। त्रिविक्रमस्यप्रीत्यर्थंदातव्यंसाधुभिःसह। उपानद्युगलंछत्रंलवणामलकानिच। आ
षाढेवामनप्रीत्यैदातव्यानितुशक्तितः। घृतंचक्षीरकुंभांश्चघृतधेनुफलानिच। श्रावणेश्रीधरप्रीत्यैदात
व्यानिशिपिविष्टते। मासेभाद्रपदेदद्यात्। पायसंमधुसर्पिषा। हृषीकेशप्रीणनार्थंलवणंसगुडौदनं। तिला
स्तरंगंवृषभंदधिताम्रायसादिकं। प्रीत्यर्थंपद्मनाभस्यदेयमाश्वयुजेनरैः॥ रजतंकनकंदीपान्मणिमुक्ता ३११

फलादिकं। दामोदरस्य प्रीत्यर्थं प्रदद्यात्कार्त्तिके नरः॥ खरोष्ट्राश्वतुरो नागान् सकाढसमजादिकं। दातव्यं
केशवप्रीत्यै मासि मार्गशिरे नरैः॥ प्रासादनगरादीनि गृहप्रावरणानि च। नारायणस्य तुष्ट्यर्थं — — देयानिय
त्नतः॥ दासीदासमलंकारमन्नं षड्रससंयुतं। पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सर्वकालिकं। यद्यदिष्टतमं किंचिद्यद्वा
प्यस्ति शुभं ग्रहे। तत्तद्द्विदेयं प्रीत्यर्थं देवदेवस्य चक्रिणः॥ देवीपुराणे। मार्गे ससोत्तमं दद्यात् घृतं पौषे महाफलं।
रसोत्तमं लवणं। तिलान्माघे मुनिश्रेष्ठ सप्तधान्यानि फाल्गुने। विचित्राणि च वस्त्राणि चैत्रे दद्याद्द्विजोत्तमे।
वैशाखे द्विजगोधूमान् ज्येष्ठे तोयभक्तं घटं। आषाढे चंदनं देयं सकर्पूरं महाफलं। नवनीतं नभोमासि छत्रं
प्रोष्ठपदे मतं। गुडशार्करवर्णाढ्यान् लड्डुकानाश्विने मुने। दीपदानं महापुण्यं कार्त्तिके यः प्रयच्छति। सर्वका
मानवाप्नोति क्रमेणैवमुदाहृतं। व्रतान्ते गां शुभां दद्यात्। सवत्सां कांस्यदोहिनीं सयुगां सस्रजं वस्त्र दापयेद्द्वि
धिनामुना। देवीं विरिंचिनं सूर्यं विष्णुं वाथ यथाविधि। स्वभावशुद्धे विधिवत्पूजयित्वा द्विजोत्तमं। दात

307

व्यावीतरागेतुकामक्रोधविवर्जिते। अयाचकेसदाचारेविनितेविनयान्विते। गोदानाल्लभतेकामान्गो
लोकेसुमनोरमान्। तथा। आषाढेतोयधेनुंचघृतंभाद्रपदेतथा। माघेतुतिलधेनुःस्यात्तांदत्वालभतेहि
तं। तथा। धे॰ तिलमयींमाघेदद्याज्ज्ञाश्चोत्तरायणे। सर्वकामानवाप्नोतिज्येष्ठेतिलमयींतथा। पुष्येघृतमयीं
दद्यात्श्रेष्ठाहेविधिनामुने। आदित्यपुराणे। ज्येष्ठेमासितिलान्दत्वापौर्णमास्यांविशेषतः। अश्वमेधस्यप
पुण्यंतत्प्राप्नोतिनसंशयः। यमः। घृतमाश्वयुजेमासिनित्यंदद्यात्द्विजातये। प्रीणायित्वाश्विनौदेवौरूपभा
गभिजायते। विष्णुः। आश्विनंसकलंमासंविप्रेभ्यःप्रत्यहंघृतं। प्रदायाश्विनौप्रीणयतिरूपभाग्यवती। त
स्मिन्नेवमासिप्रत्यहंगोरसैर्ब्राह्मणान्भोजयित्वाआरोग्यभाग्भवति। भारते। माघेमासितिलान्यस्तुब्राह्म
णेभ्यःप्रयच्छति। सर्वसत्वसमाकीर्णंनरकंनसपश्यति। अथर्तुदानानि। विष्णुधर्मोत्तरे। स्नानानुलेपनादी
नांवसंतेदानमिष्यते। पानकानांतथाग्रीष्मेछत्राणांतदनंतरे। देवीपुराणे। यःपुनर्विधिनावत्सदेवीमुद्दिश्य

प्रावृषि। विप्रेषु विप्रकन्यासु तिलादीन्संप्रयच्छति। तस्य संतुष्यते देवी अचिरेण तु विंध्यया। विष्णुधर्मोत्त
रे। शरद्यन्नस्य धर्मज्ञा वस्त्राणामपि हेमने। वन्हिदानं नरः कृत्वा सूर्यस्योदयनं प्रति। शिशिरे सततं वन्हिं
तर्पयित्वा तथा तिलैः। कुल्माषं सघृतं दत्वा यथा शास्त्रं द्विजातिषु। कामाग्निदीप्तिप्राकाशं शत्रुनाशं च
विंदति। सक्तुं सिताखंडयुतं मधुसैवाहकान्वितं। लवणाज्ययुतं दत्वा तथा हरितकान्वितं। मध्याह्ने प्रवृषि
स्नातः सततं द्विजपुंगवाः। जलकुंभोपरिकृतं ह्यक्षयं फलमश्नुते। यमः। शशरंमोचयित्वा स्वशक्त्या शि
शिरे द्विजान्। प्रतीमाग्निमवाप्नोति स्वर्गलोकं च गच्छति। अथ संवत्सरदानानि। विष्णुधर्मोत्तरे। संवत्सरे
तु दातव्यं तिलदानं महाफलं। परिपूर्वे तथा दानं यवानां द्विजसत्तम। परिवत्सर इत्यर्थः। यदा पूर्वे च वस्त्रा
णां धान्यानां चानुपूर्वके। इत्सवै रजतस्यापि दानं प्रोक्तं महाफलं। प्रभवादिवत्सरपंचस्येवैका संज्ञा। अथ
कल्पदानानि। मदनरत्ने मात्स्ये। कल्पानुकीर्तनं वक्ष्ये सर्वकामफलप्रदं। यस्यानुकीर्तनादेव देवदेवपुण्ये

दा॰घो॰
३१२

नयुज्यते। प्रथमश्वेतकल्पस्तु द्वितीयोनीललोहितः॥ वामदेवस्तृतीयास्तु ततोराद्यततोपरः॥ रौरवपंचमः
प्रोक्तः षष्ठप्राण इतिस्मृतः॥ सप्तमोथबृहत्कल्पः कंदर्पोष्टमउच्यते। सद्योथनवमः प्रोक्त ईशानोदशमः
स्मृतः॥ ध्यानयेकादशः प्रोक्तस्तथासारस्वतःपरः॥ त्रयोदशउदानस्तु गारुडोथचतुर्दशः॥ कौर्मःपंचदशः
प्रोक्तः पौर्णमासीप्रजायते। षोडशोनारसिंहस्तु समानस्तु तथापरः॥ आग्नेयोष्टादशःप्रोक्तः सोमकल्पस्त
थापरः॥ मानवोविंशतितमस्तत्पुमानितिचापरः॥ तत्पुरुषद्वस्तथः॥ वैकुंठश्चापरोकल्पोलक्ष्मीकल्पस्तथाप
रः॥ चतुर्विंशतमः प्रोक्तः सावित्रः कल्पसंज्ञितः॥ पंचविंशस्ततोघोरोवाराहस्तु ततोपरः॥ सप्तविंशोथवैरा
जोगौरीकल्पस्तथापरः॥ माहेश्वरस्ततः प्रोक्तस्त्रिपुरोयत्रघातितः॥ पितृकल्पस्तथांतेतुयाकुहूब्रह्मणस्मृ
तः॥ इत्येवंब्रह्मणोमासः सर्वपातकनाशनः॥ आदावेवहिमाहात्म्यंयस्मिन्यस्यविधीयते। तस्यकल्पस्य
तन्नामविहितंब्रह्मणापुरा। यस्मादष्टादिमान्कृत्वाहेमान्सर्वाणिपर्वणि। ब्रालंरिक्षुपरोकल्पंमुनिभिः ३१२

पूज्यते यदि। सर्वपापक्षयकरं कल्पदानं यथो भवेत्। मुनिरूपांस्ततः कृत्वा दद्यात्कल्पान्विचक्षणः। शो-
षिताशेषपापाय दंडयज्ञोपवीतिने। जटाकमंडलुधृते मुनिरूपाय ते नम इति संपूज्य दद्यात्। एवमन्यान्।
प्रतिगृह्णीत्वरण्मदिदानांतरवत्। अथ युगादिदानं। युगाद्यः संग्रहे। वैशाखमासस्य च या तृतीया नवस्य
सौ कार्त्तिकशुक्लपक्षे। नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पंचदशी च माघे। एताश्चतस्रस्तिथयो युगा-
द्याः दत्तं हुतं चाक्षयमाशु विंद्यात्। पंचदशी च माघे। इति पौर्णमास्यमावास्ययोरन्यतरत्। तथा। नवम्यां शु-
क्लपक्षस्य कार्त्तिके निरगीकृतं। त्रेता सिततृतीयायां वैशाखे समपद्यत। तर्शे तु माघमासस्य प्रवृत्तं द्वापरं
युगं। कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गमः। भविष्ये तु। माघे पंचदशी राजन्कलिकादिर्निरुच्यत
इत्युक्तं। अत्र दानं हेमाद्रौ भविष्योत्तरे। वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुं। नारायणं पूजयेथाः पुष्पगं-
धादिलेपनैः। लक्ष्मीनारायणमित्यर्थः। ततस्तस्याग्रतो धेनुर्लवणस्याढकेन तु। कार्या कुरुकुलश्रेष्ठ च

तुभागेनवत्सकः।अविचर्मोपरिस्थातकल्पयित्वाविधानतः।शास्त्रोक्तक्रमयोगेनब्राह्मणायप्रदापये
त्।श्रीधरःश्रीपतिःश्रीमान्श्रीशःसंप्रीयतामिति।अनेनविधिनादत्वाधेनुंविप्रायभारत।गोसहस्राद्
शगुणंप्राप्नोतीहनसंशयः।तथैवकार्तिकेमासिनवम्यांनक्तभुग्नरः।उमासहायंवरदंनीलकंठमथार्चये
त्।दत्वाचैवंविधानतः।अष्टमूर्त्तिर्नीलकंठःप्रीयतामितिकीर्त्तयेत्।दत्वाचैवंविधानेनशिवलोकमवाप्नु
यात्।त्रयोदशीनभस्येवाकृष्णेतस्यांसमर्चयेत्।पितृभ्योन्नप्रदानेनमधुनाचतथैवच।भोजयेद्ब्राह्मणान्
भक्त्यावेदवेदांगपारगान्।प्रत्यक्षागौर्महाराजतरुणीसुपयस्विनी।पितापितामहश्चैवतथैवप्रपितामहः।
प्रीयतांगोप्रदानेनइतिदत्वाविसर्जयेत्।पुत्रान्पौत्रान्प्रपौत्रांश्चधनंस्वमहदीप्सितं।इहप्राप्नोतिपुरुषः
परात्रचशुभांगतिं।पंचदश्यांचमाघस्यपूजयित्वापितामहं।गायत्र्यासहितंवेदंवेदवेदांगभूषितं।नवनीत
मयींधेनुंफलैर्नानाविधैर्युतां।सहिरण्यांसवस्त्रांचब्राह्मणायनिवेदयेत्।कीर्तयेत्प्रीयतामत्रपद्मयोनिःपि

तामहः। यत्स्वर्गे यच्च पाताले यन्मर्त्ये किंतु दुर्लभं। तदेवाप्नोत्यसंदिग्धं पद्मयोनिप्रसादतइति। मीमांसैकधु
रंधरः श्रुतिधरोन्यायेपिवागीश्वरः साहित्यामृतसागरः सुजनतावल्लीरसालद्रुमः। यं विद्वन्मणिशेखरोदिनक
रः प्रासूत विश्वेश्वरं तेनाकारि समस्तकालददतौ सत्प्रीतये पद्धतिः। समस्तकालदानेषु कृत्वा निर्णयमाद
रात्। सर्वोपस्करदानेषु गागाभट्टो वदत्यथ। अथ रत्नदानं जाबालिः। रत्नानि यो द्विजे दद्यात् बहुमूल्यानि मान
वः। अलंकारनिमित्तं वा देवताप्नोति यत्नतः। स पापपटलायनिर्मुक्तो मुक्तिमेव समश्नुते। स्कांदे। विद्रुमाणां प्रदानेन
रुद्रलोकं व्रजेन्नरः। सर्वपापविनिर्मुक्तो ममदानेन जायते। लोकमाप्नोति दानेन नरो वज्रस्य वज्रिणः। तथा प्रदत्ते
गोमेदै मोदते नंदने वने। सर्वे ग्रहाः प्रतुष्यंति पुष्यरागस्य दानतः। गारुत्मते मरुत्वंतं नियतं जपति श्रिया। वैडूर्यैः
सूर्यलोकं च पद्मरागैररोगतां। प्रदानैरिंद्रनीलानां लीलानां भाजनं भवेत्। सुखी शंखप्रदानेन शक्तिमुक्ताप्रदानतः।
भगंदरगलगंडहरत्नदानं पितृकृतकर्मविपाकसारात् ज्ञेयं। अथालंकारदानं। ब्रह्मवैवर्ते। द्विजातिभ्यस्तु यो दद्या

दा॰प्रो॰ दलंकारान्समुद्धतान्। सोलंकृतः स्वर्गलोके क्रीडत्यप्सरसां गणैः। अलंकारप्रदानेन सरूपः सुभगो भवेत्॥
३१५ तथालंकारदानेन दीर्घमायुश्च विंदति। नराभरणदानेन तुष्टिं याति सदाशिवः। योषिदाभरणे दत्ते प्रीयते हि
मशैल —। विष्णुधर्मोत्तरे। मूर्द्धाभरणदानेन व्रजेन्मूर्द्धाभिषक्ततां। कर्णजैस्तैः सुकीर्तिः स्याल्लक्ष्मीः कंठजैः रं
कुंठिता। पाणिजैः पाणिजेन्नः स्यात् जघन्यैर्जघन्यजः। जानुजैः सानुजां जैत्रं स्तरणं चरणोद्भवैः। मूर्द्धाभर
णं। मुकुटादि। कर्णजं कुंडलादि। कांठं वर्णमालादि। पाणिजं मुद्रिकादि। जघनभवं सुवर्णकटिसूत्रादि। जानु
जं किंकिण्यादि। चरणोद्भवं नूपुरादि। मंत्राः पूर्वोक्ताः। अथ वस्त्रदानं। देवलः। कांतियुक्स्रभगक्स्रभगः
श्रीमान्भवत्संवरदानवान्। भविष्यामध्यमोत्तमवस्त्राणि यो दद्यादहतानि च। स तेनैवानुसारेण प्राप्नो
ति विपुलं फलं। विष्णुधर्मे। नीलं वस्त्रं तथाजीर्णं न देयं ब्राह्मणस्य तु। देयांबरं चांगिरसं लोकं याति बृहस्पतेः २१५
दत्वा कार्पासकं वस्त्रं स्वर्गलोके महीयते। तद्वसरोमतत्रापि फलं दशगुणं भवेत्। सरोमरोमनिर्मितं। तद्व

सइत्यर्थः। आविकं वसनं दत्वा भृगूणां लोकमाप्नुयात्। छागं दत्वा चांगिरसं क्षौमं दत्वा बृहस्पतेः। वस्र
नां लोकमाप्नोति कुशकौशेयवाससां। कृमिजं च तथा दत्वा सोमलोके महीयते। अग्निष्टोममवाप्नोति
दत्वैवमृगलोमिकं। दत्वा वल्कलजं वासो वस्त्रनां लोकमाप्नुयात्। समोचककदल्यादि दत्वा चैवनथाजि
नं। वारवाणमुरस्त्राणं शिरस्त्राणं तथैव च। पादत्राणं च ददतः पृथग्यज्ञफलं लभेत्। दानात्कुंकुमर
क्तस्य लावण्यमहदाप्नुयात्। रंगैरन्यैश्च नीलैश्च रक्तं दत्वा सुविभवेत्। यथा यथा तु वस्त्रस्य महती
महर्घता। यथा यथा तु शुभता तथा पुण्यफलं महत्। अन्येषामपि दानानामेतदेव प्रकीर्तितं। अथ रुद्रै
कावस्त्रदानं। हेमाद्रौ। वस्त्रयुग्मं सितं सूक्ष्ममेकैकस्य प्रकल्पयेत्। एकादशानां विप्राणां रुद्रैकादशा
रूपिणां। गंधपुष्पैरलंकृत्य भोजयित्वा विधानतः। उत्का मंत्रमथैतेभ्यस्त्वभिवस्त्राणि दापयेत्। प्रसी
दतु भवो नित्यमस्माकं कृत्तिवाससः। वस्त्राण्यस्मत्प्रदत्तानि प्रतिवाससः। वस्त्राण्यस्मत्प्रदत्तानि प्रति

दी॰पो॰ ग्हत्वा – शंकरः। दत्तेषु वस्त्रेषु नरस्तंतुभिर्गणिताः समाः। रुद्रतुल्यबलो भूत्वा रुद्रलोके महीयते। एका
३१६ दशरुद्रनामानि रुद्रैकादशातिलदाने उक्तानि। नंदीपुराणे। उर्णीषदायिनो मर्त्या जायंते मुकुटोज्वलाः। वि
स्तीर्णराजवंशेषु सितछत्राग्रलक्षणाः। विष्णुधर्मोत्तरे। उर्णीषाणि विचित्राणि यो प्रदद्याद्द्विजातिषु।
रक्तानि वाथ श्वेतानि कौसुंभान्यथवा पुनः। सौदर्यं च परं प्राप्य वनितावल्लभो भवेत्। नारदीये। आर्दितेभ्यः
करुणया वस्त्रमौर्णं दद्यात्प्रियः। आधिविनिर्मुक्तः सोक्षयं सुखमश्नुते। स्कांदे। आसनं चित्रवर्णं तु यः प्रय
च्छति भक्तितः। स दिव्यभोगसंभोगमरोगः सर्वदाश्नुते। तस्योर्णीमयते ऊर्णीमंत्रः। अन्यथा वस्त्रसपाभे।
चंद्रोदयं तु यो भक्त्या प्रयच्छति सुपुण्यधीः। न तस्य श्रेयसामंतः कदाचिदपि जायते। चंद्रोदये वितानं। वि
ष्णुधर्मे। वितानकप्रदानेन सर्वपापैः प्रमुच्यते। नंदिपुराणे। वासांसि च विचित्राणि सारवंतीदृढंतिच। स्न
पितानि च यो दद्यात्स केशानि नवानि च। स्नपितं क्षालितं। वाराहे। क्षौमांबराणि यो दद्यात्स्त्रोर्णीनि च वक्रि ३१६

यक्षकर्दमस्तु कस्तुरिकाया द्वो भागो द्वो भागो कुंकुमस्य च॥ चंदनस्य त्रयो भागा शशिनस्त्वेक एव च॥
यक्षकर्दम इत्युक्तः सस्त सुरवल्लभः॥ शशिकर्पूरः कुंकुमं केसरं।

यो कार्यो सजानिवादघाङ्क्को वित्तानुसारतः॥ तत्र वासांसि यावंतस्तंतूनां परमाणवः॥ तावद्वर्षसहस्राणि विस्नुलोके महीयते। भविष्ये। वन्हेर्वस्त्रप्रदानेन ब्रह्मलोकं प्रपद्यते। अथ यज्ञोपवीतदानं। मदनरत्ने। यज्ञोपवीतदानेन जायते ब्रह्मवर्चसी॥ तस्मात्तानि प्रदेयानि ब्राह्मणेभ्यो विपश्चिता। अत्रिः। क्षौमजं वापि कार्पासं पट्टसूत्रमथापि वा। यज्ञोपवीतं योदद्यात् ध्वतवर्णं सुशोभनं। यथाशक्त्या विधानेन अग्निष्टोमफलं लभेत्। रोगघ्नं यज्ञोपवीतदानं। पितृकृतकर्मविपाकसारे ज्ञेयं। अथ गंधादिदानं। स्कांदे। स नरः सुवर्णदेहत्वं गंधदानादवाप्नुते। भोगवान् जायते नित्यं शरीरं नास्य तथाति। विस्नुधर्मे। सौभाग्यकारकं प्रोक्तं। प्रदानं कुंकुमस्य तु। तथा कर्पूरदानेन सर्वान्कामानवाप्नुयात्। मृगदर्पप्रदानेन यशस्वी भुवि जायते। यक्षकर्दमदानेन साम्राज्यं प्राप्तमश्नुते। अथ पुष्पदानं। मदनरत्ने। कांचनानि च पुष्पाणि मणिमुक्तामयानि च। तुलसीपत्रदानस्य कलां नार्हंति षोडशीं। अथ धूपदानं। हेमाद्रौ भारते। धूपदः सुरभिर्निसंपुष्प

दा॰खो॰ दः सुभगः सदा। तस्माद्देवाय विप्राय दातव्यं तत्सुखार्थिभिः। मंत्रा उक्ताः। नंदीपुराणे। अथ दीपदानं। सं
३२७ वर्त्तः। देवागारे द्विजानां च दीपं दत्वा चतुष्पथे। मेधावी ज्ञानसंपन्नश्चक्षुष्माञ्जायते नरः। गारुडे। वर्षासु दी
पदानेन पितॄणामनृणी भवेत्। यस्त्वब्राह्मणगेहेषु दीपेमालां प्रयच्छति। स निर्जित्य तमो घोरं ज्योतिषांलोक
माप्नुयात्। भारते। वर्षास्तु दीपदानेन शशिवछोभते नरः। व्रतहेमाद्रौ विष्णुधर्मे। महावर्त्तिः सदा देया भूमि
पाल महाफला। कृष्णपक्षे विशेषेण तत्रापि च विशेषतः। देवस्य दक्षिणे पार्श्वे देया वैल्लतुलान्वप। पलाष्ट
कयुतां राजन्वर्त्तिं चात्र प्रदापयेत्। वाससा तु समग्रेण सोपवासो जितेंद्रियः। महावर्त्तिद्वयमिदं सकृत्कृत्वा म
हीयते। स्वर्लोकं सुचिरं भुक्त्वा जायते भूतले यदा। तदा भवति लक्ष्मीवान्रूपसौभाग्यसंयुतः। राष्ट्रे वा जायते
तस्मिन्देशे वा नगरे तथा। कुले वा राजशार्दूल तत्रस्या दीपवत्प्रभो। एकामथव्यवादद्वादभीष्मनयो
र्द्वयोः। मानुष्ये सर्वमाप्नोति। यदुक्तं ते मयानघ। सामान्यस्य तु दीपस्य राजन्दानं महाफलं। किं पुनर्महतो य ३१७

स्यफलस्यांतो न विद्यते। किंपुनर्द्देवदेवस्य अनंतस्य महात्मनः॥ गिरिशृंगेषु दातव्यं नदीनां पुलिनेषु च। चतुष्पथेषु रथ्यासु ब्राह्मणानां च वेश्मसु। वृक्षमूलेषु गोष्ठेषु कांतारगहनेषु च। दीपप्रदानेन सर्वत्र महत्फलमुपाश्नुते। इति दीपदानं॥ अथान्नदानं॥ मदनरत्ने॥ अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्वदः। तस्मादन्नप्रदानेन सर्वदानफलं लभेत्। धर्मार्थकाममोक्षाणां देहः परमसाधनं। स्थितिस्तस्यान्नपानाभ्यामतस्तत्स्वर्गसाधनं। अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्वयं॥ तस्मादन्नसमं दानं न भूतं न भविष्यति। अत्रान्नशब्दो नामान्नपरः। तस्य पृथग्दानोक्तेः॥ नापि पक्वान्नपरः॥ दधिगुडक्षीरपक्वमाषमुद्गादिष्वन्नशब्दप्रयोगात्। किंतु ओदनमात्रपरः। भिस्सा स्त्री भक्तमंधोऽन्नमित्यमरात्। विष्णुधर्मे। नात्र पात्रपरीक्षा स्यान्न कालनियमस्तथा। न च देशः परीक्ष्योत्र देयमन्नं सदैव तु। श्वभ्यश्च पतितेभ्यश्च अंत्यजेभ्यस्तथैव च॥ कृमिकीटपतंगेभ्यो देयमन्नं सदैव तु। ब्रह्मवैवर्ते। तस्मादह—हर्देयमन्नमेव विचक्षणैः॥ अपरीक्ष्यैव

